CC-0. In Public Domain. Digitization by eGangotri

A2-55

॥ संस्कृत ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

SANSKRIT STUDY MADE EASY SERIES No. 1

॥ संस्कृतबालादर्शः ॥

(SAMSKRITA BALADARSA)

—:o:—

INFANT READER

PUBLISHED BY
R. S. VADHYAR & SONS,
BOOK-SELLERS & PUBLISHERS,
KALPATHI : : PALGHAT-678003.
S. INDIA.

1978

Rs. 2/-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

SANSKRIT STUDY MADE EASY SERIES
A Reformed Series of Four Illustrated Sanskrit Readers.

Infant Reader	संस्कृत बालादर्शः	34th Edn.	2 00
Reader I	संस्कृत प्रथमादर्शः	19th Edn.	2 25
Reader II	संस्कृतद्वितीयादर्शः	12th Edn.	2 50
Reader III	संस्कृत तृतीयादर्शः	8th Edn.	3 00

Easy Texts on Sanskrit Grammar संस्कृतव्याकरण ग्रन्थाः

1. शब्दमञ्जरी-तिङन्त-अव्यय - समासप्रकरण - शब्दार्थकोश सहिता.
The addition of an Interesting chapter on समासप्रकरण with examples in श्लोकाs & वाक्याs is a Special Feature to this enlarged 15th Edition. 3 00

2. धातुरूपमञ्जरी- Deals with 500 most common roots with Sans. & Eng. meanings etc., 5th Edition. 4 00

3. संस्कृत व्याकरण प्रवेशिका—The First Book of its kind containing 47 Lessons dealing on Nouns, Gender, Verbs, Tenses, Parsing, Analysis, etc., 2nd Edn. 2 50

Easy Texts on Sanskrit Poetry लघु काव्य ग्रन्थाः

श्रीरामोदन्तम्-with instructive Notes in Sans. & English 1 25

रघुवंशमहाकाव्यम्—लघुसञ्जीविनी टीका in Sanskrit and English Canto 1. Do. 2 00

श्रीकृष्णविलासकाव्यम्— Canto 2. Do. 0 50

महात्मविजयः— with English Translation & Notes. 1 50

Sanskrit Copy Books—संस्कृत प्रतिलेखावलिः

These are suitably graded with selected Maxims and Quotations. In No. 1 Copy Book Diagram to correctly write the entire Sanskrit Alphabet isgiven.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

॥ संस्कृतबालादर्शः ॥

(SAMSKRITA BALADARSA)

INFANT READER

By

Vidyasagar K. L. V. SASTRI,

Mahopadhyaya, Siromani, Sahityanipuna, Vidyalankara etc.,
Retired Senior Sanskrit Pandit,
The Presidency College, Madras.

Revised Thirty-Fourth Edition

ALL RIGHTS RESERVED.

Paper used : Double Crown 11.8 Kg. White Printings.

PUBLISHED BY

R. S. VADHYAR & SONS,
BOOK-SELLERS & PUBLISHERS,
KALPATHI : : PALGHAT-678003.
S. INDIA.

1978

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

॥ भारतदेशीयगीतम् ॥

जन गण मन अधिनायक जय हे !
भारत-भाग्यविधाता ।
पंजाब सिन्धु गुजरात मराठा
द्राविड उत्कल बंगा ॥
विन्ध्य हिमाचल यमुना गंगा
उच्छल जलधि तरंगा ।
तव शुभ नामे जागे
तव शुभ आशिष मागे
गाहे तव जय गाथा ॥
जन गण मंगल दायक जय हे !
भारत-भाग्य-विधाता ।
जय हे ! जय हे ! जय हे !
जय ! जय ! जय ! जय हे ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

INDIAN NATIONAL ANTHEM

Thou art the ruler of the minds
of all People,
Thou Dispenser of India's Destiny.
Thy name rouses the hearts of the Punjab,
Sind, Gujarat and Maratha,
of Dravid, Orissa and Bengal.
It echoes in the hills of the Vindhyas and Himalayas,
mingles in the music of Jamuna and Ganges,
and is chanted by the waves of the Indian Sea.
They pray for Thy Blessings,
and sing Thy Praise,
The Saving of all People waits in Thy hands.
Thou Dispenser of India's Destiny,
Victory ! Victory ! Victory to Thee !

This Stanza composed by Sree Rabindranath Tagore has been adopted by the Indian Constitution as the National Anthem of India, on 24th January, 1950.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri



Sanskrit Study Made Easy Series

A Reformed Series of Four Illustrated Sanskrit Readers
With Grammatical conversational Exercises,
Glossary etc.,
For a Pleasant & Quick Study of Sanskrit.

Most widely used throughout India and Foreign Countries
Viz: Ceylon, Siam, Bangkok, Germany, Italy, Australia
California, San Francisco etc.

AND SELECTED BY THE EMBASSY OF INDIA
and The Ministry of Education and Scientific Research of Govt. of India for Presentation to Foreign Students of Sanskrit

PRINTED AT
NEW BHARATHI VIJAYAM PRINTERS
MADRAS-600 005

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अनुक्रमणिका—CONTENTS

		पृष्ठम्
	भारतदेशीय गीतम्	ii
	Do English Translation	iii
A.	अक्षरमाला— Alphabet	१—११
	स्वराः अथवा अचः—Vowels	१
	व्यञ्जनैः सह अचां योगे अचां चिह्नानि	१
	व्यञ्जनानि अथवा हलः—Consonants	२
	स्वर व्यञ्जन योगरीतः	२
	स्वर युक्त व्यञ्जनानि —Consonants with Vowels	३
	संयुक्त अक्षराणि	१०
B.	Lessons	१२-९०
	१. प्रथमः पाठः अजः— गजः	१२
	२. द्वितीयः पाठः वृक्षः— लता	१४
	३. तृतीयः पाठः बालौ— फले	१६
	४. चतुर्थः पाठः हंसाः— पद्मानि	१८
	५. पञ्चमः पाठः अश्वः— रथः	२०
	६. षष्ठः पाठः नौका— शकटम्	२२
	७. सप्तमः पाठः धेनुः— व्याघ्रः	२४
	८. अष्टमः पाठः शाखा— पर्णम्	२६
	९. नवमः पाठः माता— दुहिता	२८
	१०. दशमः पाठः काकः— भेकः	३०
	११. एकादशः पाठः वीणा— घण्टा	३२
	१२. द्वादशः पाठः पुस्तकम्— पेटिका	३४

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

संस्कृतबाल दर्शे—अनुक्रमणिका

			पृष्ठम्
१३. त्रयोदशः	पाठः	नक्षत्राणि	३६
१४. चतुर्दशः	पाठः	भ्राता स्वसा च	३८
१५. पञ्चदशः	पाठः	हस्तौ	४०
१६. षोडशः	पाठः	लेखनम्	४२
१७. सप्तदशः	पाठः	विद्यालयः	४४
१८. अष्टादशः	पाठः	क्रीडा	४६
१९. एकोनविंशः	पाठः	पुष्पगुच्छः	४८
२०. विंशः	पाठः	वर्षाकालः	५०
२१. एकविंशः	पाठः	द्वौ सखायौ	५२
२२. द्वाविंशः	पाठ	शुकः	५५
२३. त्रयोविंशः	पाठः	वृद्धस्य कौशलम्	५८
२४. चतुर्विंशः	पाठः	विनायकः	६१
२५. पंचविंशः	पाठः	सुबुद्धिः दुर्बुद्धिश्च	६४
२६. षड्विंशः	पाठः	चैत्रो मैत्रश्च	६७
२७. सप्तविंशः	पाठः	कुक्कुटः	७०
२८. अष्टाविंशः	पाठः	मेषपालः	७३
२९. एकोनत्रिंशः	पाठः	सत्यं जयति नानृतम्	७६
३०. त्रिंशः	पाठः	उपदेशमाला—पद्यम्	८०

C. Selected **पर्याय** Slokas from **अमरकोश** ९१—९४

Tables to be studied by heart ९५

Model Questions & Translation Exercises ९३

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

श्रीरामजयम्

—:o:—

॥ विद्यया विन्दते अमृतम् ॥

॥ संस्कृतबालादर्शः ॥

अक्षरमाला—ALPHABET

स्वराः अथवा अचः—VOWELS

अ a	आ ā	इ i	ई ī
उ u	ऊ ū	ऋ r	ॠ r̄
ऌ l	—	ए ē	ऐ ai
ओ ō	औ au	अं aṃ	अः aḥ

॥ व्यञ्जनैः सह अचां योगे अचां चिह्नानि ॥

अ = — ; आ= ा	ऋ = ृ ; ॠ = ॄ	ओ = ो; औ= ौ
इ = ि ; ई= ी	ऌ = ॢ;	
उ = ु ; ऊ= ू	ए = े ; ऐ = ै	अं = ं ; अः = ः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

व्यञ्जनानि अथवा हलः—CONSONANTS

क ka	ख kha	ग ga	घ gha	ङ ṅa
च ca	छ cha	ज ja	झ jha	ञ ña
ट ṭa	ठ ṭha	ड ḍa	ढ ḍha	ण ṇa
त ta	थ tha	द da	ध dha	न na
प pa	फ pha	ब ba	भ bha	म ma

य ya	र ra	ल la	व va
श śa	ष ṣa	स sa	ह ha
ळ ḷa	क्ष kṣa	ज्ञ j-ña	

॥ स्वर व्यञ्जन योगरीतिः ॥

*क् + अ = क ।	क् + आ = का ।	क् + इ = कि ।
क् + ई = की ।	क् + उ = कु ।	क् + ऊ = कू ।
क् + ऋ = कृ ।	क् + ॠ = कॄ ।	क् + ऌ = कॢ ।
क् + ए = के ।	क् + ऐ = कै ।	क् + ओ = को ।
क् + औ = कौ ।	क् + अं = कं ।	क् + अः = कः ।

---

* Note that the addition of अ to a Consonant is known by the removal of the stroke under it,

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

क *ka*	ख *kha*	ग *ga*	घ *gha*	ङ *ña*
का *kā*	खा	गा	घा	ङा
कि *ki*	खि	गि	घि	ङि
की *kī*	खी	गी	घी	ङी
कु *ku*	खु	गु	घु	ङु
कू *kū*	खू	गू	घू	ङू
कृ *kṛ*	खृ	गृ	घृ	ङृ
कॄ *kṝ*	खॄ	गॄ	घॄ	ङॄ
कऌ *kḷ*	खऌ	गऌ	घऌ	ङऌ
के *ke*	खे	गे	घे	ङे
कै *kai*	खै	गै	घै	ङै
को *ko*	खो	गो	घो	ङो
कौ *kau*	खौ	गौ	घौ	ङौ
कं *kam*	खं	गं	घं	ङं
कः *kha*	खः	गः	घः	ङः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

च *ca*	छ *cha*	ज *ja*	झ *jha*	ञ *ña*
चा	छा	जा	झा	ञा
चि	छि	जि	झि	ञि
ची	छी	जी	झी	ञी
चु	छु	जु	झु	ञु
चू	छू	जू	झू	ञू
चृ	छृ	जृ	झृ	ञृ
चॄ	छॄ	जॄ	झॄ	ञॄ
चऌ	छऌ	जऌ	झऌ	ञऌ
चे	छे	जे	झे	ञे
चै	छै	जै	झै	ञै
चो	छो	जो	झो	ञो
चौ	छौ	जौ	झौ	ञौ
चं	छं	जं	झं	ञं
चः	छः	जः	झः	ञः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ट *ta*	ठ *tha*	ड *da*	ढ *dha*	ण *ṇa*
टा	ठा	डा	ढा	णा
टि	ठि	डि	ढि	णि
टी	ठी	डी	ढी	णी
टु	ठु	डु	ढु	णु
टू	ठू	डू	ढू	णू
टृ	ठृ	डृ	ढृ	ण
टॄ	ठॄ	डॄ	ढॄ	णॄ
टॢ	ठॢ	डॢ	ढॢ	णॢ
टे	ठे	डे	ढे	णे
टै	ठै	डै	ढै	णै
टो	ठो	डो	ढो	णो
टौ	ठौ	डौ	ढौ	णौ
टं	ठ	डं	ढं	णं
टः	ठः	डः	ढः	णः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

त *tha*	थ *ṭha*	द *ḍa*	ध *ḍha*	न *na*
ता	था	दा	धा	ना
ति	थि	दि	धि	नि
ती	थी	दी	धी	नी
तु	थु	दु	धु	नु
तू	थू	दू	धू	नू
तृ	थृ	दृ	धृ	नृ
तॄ	थॄ	दॄ	धॄ	नॄ
तॢ	थॢ	दॢ	धॢ	नॢ
ते	थे	दे	धे	ने
तै	थै	दै	धै	नै
तो	थो	दो	धो	नो
तौ	थौ	दौ	धौ	नौ
तं	थं	दं	धं	नं
तः	थः	दः	धः	नः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प *pa*	फ *pha*	ब *ba*	भ *bha*	म *ma*
पा	फा	बा	भा	मा
पि	फि	बि	भि	मि
पी	फी	बी	भी	मी
पु	फु	बु	भु	मु
पू	फू	बू	भू	मू
पृ	फृ	बृ	भृ	मृ
पॄ	फॄ	बॄ	भॄ	मॄ
पॢ	फॢ	बॢ	भॢ	मॢ
पे	फे	बे	भे	मे
पै	फै	बै	भै	मै
पो	फो	बो	भो	मो
पौ	फौ	बौ	भौ	मौ
पं	फं	बं	भं	मं
पः	फः	बः	भः	मः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

य *ya*	र *ra*	ल *la*	व *va*	श *śa*
या	रा	ला	वा	शा
यि	रि	लि	वि	शि
यी	री	ली	वी	शी
यु	रु	लु	वु	शु
यू	रू	लू	वू	शू
यृ	—	—	वृ	शृ *or* श्र
यॄ	—	—	वॄ	शॄ *or* शॄ
—	—	—	व्ल	श्ल
ये	रे	ले	वे	शे
यै	रै	लै	वै	शै
यो	रो	लो	वो	शो
यौ	रौ	लौ	वौ	शौ
यं	रं	लं	वं	शं
यः	रः	लः	वः	शः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ष *ṣa*	स *sa*	ह *ha*	ळ *la*	क्ष *kṣha*	ज्ञ *jña*
षा	सा	हा	ळा	क्षा	ज्ञा
षि	सि	हि	ळि	क्षि	ज्ञि
षी	सी	ही	ळी	क्षी	ज्ञी
षु	सु	हु	ळु	क्षु	ज्ञु
षू	सू	हू	ळू	क्षू	ज्ञू
षृ	सृ	हृ	—	क्षृ	ज्ञृ
षॄ	सॄ	हॄ	—	क्षॄ	ज्ञॄ
ष्ऌ	स्ऌ	ह्ऌ	—	क्ष्ऌ	ज्ञ्ऌ
षे	से	हे	ळे	क्षे	ज्ञे
षै	सै	है	ळै	क्षै	ज्ञै
षो	सो	हो	ळो	क्षो	ज्ञो
षौ	सौ	हौ	ळौ	क्षौ	ज्ञौ
षं	सं	हं	ळं	क्षं	ज्ञं
षः	सः	हः	ळः	क्षः	ज्ञः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

संयुक्त अक्षराणि =Conjunct consonants of 2 letters.

क् + क = क्क k-ka	ण् + ण = ण्ण n-ṇa	म् + म = म्म m-ma
क् + त = क्त k-ṭa	त् + त = त्त t-ta	य् + य = य्य y-ya
क् + य = क्य k-ya	त् + न = त्न ṭ-na	र् + क = र्क r-ka
क् + र = क्र k-ra	त् + य = त्य ṭ-ya	र् + य = र्य r-ya
क् + व = क्व k-va	त् + र = त्र or त्र ṭ-ra	ल् + प = ल्प l pa
क् + श = क्श k-sa		ल् + य = ल्य l-ya
क् + ष = क्ष kṣha	द् + द = द्द ḍ-ḍa	ल् + ल = ल्ल l-la
क् + स = क्स k-sa	द् + ध = द्ध ḍ-ḍha	व् + य = व्य v-ya
ग् + ग = ग्ग g-ga	द् + भ = द्भ ḍ-bha	श् + य = श्य ś-ya
ग् + म = ग्म g-ma	द् + म = द्म ḍ-ma	ष् + ण = ष्ण ṣ ṇa
ग् + य = ग्य g-ya	द् + य = द्य ḍ-ya	ष् + म = ष्म ṣ-ma
ङ् + त = ङ्त ṅ-ṭa	न् + न = न्न n-na	स् + क = स्क s-ka
च् + च = च्च ch-cha	प् + त = प्त p-ṭa	स् + न = स्न s-na
ज् + ज = ज्ज j-ja	प् + प = प्प p-pa	स् + स = स्स s-sa
ट् + व = ट्व ṭ-va	प् + र = प्र p-ra	ह् + न = ह्न h-nā
ड् + ड = ड्ड d-da	ब् + ब = ब्ब b-bha	ह् + य = ह्य h-ya
ड् + र = ड्र d-dra	भ् + न = भ्न bh-na	ञ् + ज = ञ्ज n-ja

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

संयुक्त - अक्षराणि=Conjunct Consonants of 3 letters

क् + ष् + ण = क्ष्ण *k-ṣ-na*	द् + भ् + र = द्भ्र *d-bh-ra*
क् + ष् + म = क्ष्म *k-ṣ-ma*	द् + र् + य = द्र्य *d-r-ya*
क् + ष् + व = क्ष्व *k-ṣ-va*	न् + त् + य = न्त्य *n-t-ya*
ग् + भ् + य = ग्भ्य *g-bh-ya*	न् + त् + र = न्त्र *n-t-ra*
ङ् + घ् + य = ङ्घ्य *ṅ-gh-ya*	न् + द् + य = न्द्य *n-d-ya*
च् + छ् + व = च्छ्व *ç-ch-va*	र + ग् + य = र्ग्य *r-g-ya*
ण् + ट् + य = ण्ट्य *ṇ-t-ya*	र् + ध् + व = र्ध्व *r-dh-va*
त् + प् + र = त्प्र *t-p-ra*	श् + च् + य = श्च्य *ś-ç-ya*
त् + म् + य = त्म्य *t-m-ya*	ष् + ट् + य = ष्ट्य *ṣ-t-ya*
त् + र् + य = त्र्य *t-r-ya*	ष् + ट् + व = ष्ट्व *ṣ-t-va*
द् + ध् + व = द्ध्व *d-dh-va*	ष् + प् + र = ष्प्र *ṣ-p-ra*
द् + ब् + र = द्ब्र *d-b-ra*	स् + त् + य = स्त्य *s-t-ya*
	स् + त् + र = स्त्र or स्त्र *s-t-ra*
द् + भ् + य = द्भ्य *d-bh-ya*	ह् + म् + य = ह्म्य *h-m-ya*

The Nnmericaal Figures in Sanskrit with English Figures.

१	२	३	४	५	६	७	८	९	१०
1	2	3	4	5	6	7	8	9	10

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रथमः पाठः ॥ १ ॥

अजः

गजः

अयम् अजः ।

अयं गजः

बाला

माला

इयं बाला ।

इयं माला ।

पात्रम्

नेत्रम

इदं पात्रम् ।

इदं नेत्रम्

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

क)— प्रश्नाः— १. अयं कः ? २. इय का ? इदं किम् ?

ख) 'इदम्' (This) शब्दस्य लिङ्गत्रयेऽपि प्रथमाविभक्ति रूपाणि—

	एकवचनम्	द्विवचनम्	बहुवचनम्
पुंलिङ्गे—	अयम्	इमौ	इमे
स्त्रीलिङ्गे—	इयम्	इमे	इमाः
नपुंसकलिङ्गे—	इदम्	इमे	इमानि

ग) 'इदम्' शब्दस्य रूपैः वाक्यानि पूरयत—

१. — अश्वः। ३. — जिह्वा। ५. —मुखम्।
२. — विश्वम्। ४. — नासा। ६. — नरः।

घ) अक्षरं लिखत — क् + आ = ? त् + आ = ? क् + इम्=?

शब्दार्थकोशः—GLOSSARY

अयं *m* इयं *f* इदं *n* this
कः *m* का *f* किं *n* what
अजः *m* goat
गजः *m* elephant
बाला *f* girl
माला *f* garland
पात्रम् *n* pot
नेत्रम् *n* eye
अश्वः *m* horse
नरः *m* man
जिह्वा *f* tongue
नासा *f* nose
विश्वम् *n* universe

Abbreviations used in Glossary

N. Noun विशेष्यम्
a Adjective विशेषणम् (can be used in all the genders)
m Masculine पुंलिङ्गम्
f Feminine स्त्रीलिङ्गम्
n Neuter नपुंसकलिङ्गम्
P परस्मैपदी
A आत्मनेपदी
U उभयपदी
in Indeclinable अव्ययम्
Pr P. Present Participle
P. P Past Participle

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

द्वितीयः पाठः ॥ २ ॥



वृक्षः

अयं वृक्षः । सः गजः ।
भजः गच्छति । अजः तिष्ठति ।
वृक्षः फलति ।* रामः पठति ॥

लता

इयं लता । सा बाला ।
बाला तिष्ठति । माला म्लायति ।
लता पुष्पति । सीता वदति ॥

पुष्पम्

इदं पुष्पम् । तत् पात्रम् ।
पात्रं पतति । नेत्रं स्फुरति ।
पुष्पं विकसति । मुखं लसति ॥

---

* There are 2 signs (दण्ड) to denote Full Stop.
(1) 'I' This denotes the end of a Sentence or half Sloka.
(2) 'II' This denotes end of a Para or Full Sloka.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

क) प्रश्नाः—१ सः कः ? ३ सा का ? ५ तत् किम् ?
२ कः गच्छति ? ४ का तिष्ठति ? ६ किं पतति ?

ख) 'तद्' (That) शब्दस्य लिङ्गत्रयेऽपि प्रथमाविभक्तिरूपाणि—

पुंलिङ्गे—	सः	तौ	ते
स्त्रीलिङ्गे—	सा	ते	ताः
नपुंसकलिङ्गे—	तत्	ते	तानि

ग) 'तद्' शब्दस्य रूपैः वाक्यानि पूरयत—

१ — चूतः । ३ — वटः । ५ — जाती ।
२ — मालती । ४ — कमलम् । ६ — कुसुमम् ।

घ) The Terminations of the Present Tense are :—

प्र.	ति	तः	अन्ति	e. g. गच्छति	गच्छतः	गच्छन्ति
म.	सि	थः	थ	गच्छसि	गच्छथः	गच्छथ
उ.	मि	वः	म	गच्छामि	गच्छावः	गच्छामः

—o—

सः *m* सा *f* तत् *n* that
वृक्षः *m* tree
लता *f* creeper
पुष्पम् *n* flower
गच्छति *P.* goes
तिष्ठति *P.* stands
फलति *P.* bears fruits
पठति *P.* reads
म्लायति *P.* fades
पुष्प्यति *P.* puts forth
वदति *P.* speaks [flowers
पतति *P.* falls
स्फुरति *P.* throbs
लसति *P.* shines
विकसति *P.* blooms
चूतः *m* mango tree
वटः *m* banyan tree
कमलम् *n* lotus

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तृतीयः पाठः ॥ ३ ॥

बालौ



फले

इमौ बालौ । तौ देवौ । इमे फले ।

इमे बाले । ते पात्रे । ते लते ॥

बालौ पठतः । फले पततः । बाले गायतः ।

वृक्षौ फलतः । गजौ गच्छतः । पुष्पे विकसतः ।

नेत्रे स्फुरतः । अजौ तिष्ठतः । माले म्लायतः ।

लते पुष्पयतः । मुखे लसतः । देवौ वदतः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

क) प्रश्नाः—

१ तौ कौ ?	४ के गायतः ?	७ के स्फुरतः ?
२ ते के ?	५ कौ फलतः ?	८ कौ तिष्ठतः ?
३ कौ पठतः ?	३ कौ गच्छतः ?	९ के म्लायतः ?

ख) 'इदम्—तद्' शब्दयोः रूपैः वाक्यानि पूरयत—

१ — हस्तौ ।	३ — चरणौ ।	५ — पात्रे ।
२ — कुसुमे ।	४ — अङ्गुल्यौ ।	६ — कन्ये ।

ग) 'लट्' (Present Tense) रूपैः वाक्यानि पूरयत—

१ बालौ — (पठ्) ।	६ छात्रौ — लिख्) ।
२ बाले — (गाय्) ।	७ नटौ — (नृत्य्) ।
३ घटौ — (पत्) ।	८ नेत्रे — (पश्य्) ।
४ गजौ — (गच्छ्) ।	९ पादौ — (चल्) ।
५ पुत्रौ — (नम्) ।	१० नेत्रे — स्फुर् ॥

इमौ *m* **इमे** *f* **इमे** *n* these two
तौ *m* **ते** *f* **ते** *n* those two
कौ *m* **के** *f* **के** *n* what
गायति *P.* sings
फलम् *n* fruit
चरणः *m* leg
कन्या *f* girl
घटः *m* pot
पुत्रः *m* son
छात्रः *m* student
नटः *m* dancer
हस्तः *m* hand
अङ्गुली *f* finger
कुसुमन् *n* flower

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

चतुर्थः पाठः ॥ ४ ॥



हंसाः



पद्मानि

इमे हंसाः इमाः लताः । इमानि पद्मानि ।
ते गजाः । ताः मालाः । तानि फलानि ।

हंसाः कूजन्ति । मालाः म्लायन्ति ।
पद्मानि स्फुटन्ति । बालाः गायन्ति ।
गजाः गच्छन्ति । लताः पुष्प्यन्ति ।
अजाः तिष्ठन्ति । पुष्पाणि विकसन्ति ।
फलानि पतन्ति । वृक्षाः फलन्ति ।
मुखानि लसन्ति । बालाः पठन्ति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

क) प्रश्नाः—

१ इमे के ? ५ कानि स्फुटन्ति ? ९ काः म्लायन्ति ?

२ इमानि कानि ? ६ के गच्छन्ति ? १० काः गायन्ति ?

३ इमाः काः ? ७ के तिष्ठन्ति ? ११ काः पुष्प्यन्ति ?

४ के कूजन्ति ? ८ कानि पतन्ति ? १२ कानि विकसन्ति ?

१३ कानि लसन्ति ? १४ के पठन्ति ?

ख) Fill up the blanks with the Forms of 'इदम्—तत्' शब्दा's

१ — कुसुमानि । ४ — गृहाणि । ७ — अचलाः ।

२ — लताः । ५ — छात्राः । ८ — श्लोकाः ।

३ — वृक्षाः । ६ — पर्णानि । ९ — देवताः ।

ग) Fill up the blanks with the Present tense of the roots within the braekets.

१ लताः — (म्लाय्) ।	६ बालाः — नृत्य् ।
२ छात्राः — (पठ्) ।	७ नृपाः — (जय्) ।
३ गजौ — (तिष्ठ) ।	८ मृगाः — (अट्) ।
४ कन्या — (गाय्) ।	९ बालाः — (क्रीड्) ।
५ फले — पत्) ।	१० वृक्षौ — (फल्) ।

हंसः m swan	कूजन्ति *P.* cackle
पद्मं *a* lotus	स्फुटन्ति *P.* bloom
इमे *m* इमाः *f* इमानि *n* these	पर्णं *n* leaf
ते *m* ताः *f* तानि *n* those	अचलः *m* mountain
के *m* काः *f* कानि *n* what	देवता *f* goddess

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पञ्चमः पाठः ॥ ५ ॥



अश्वः



रथः

अयम् अश्वः	अयं रथः ।
तृणम्	सारथिः ।
गृहम्	नृपतिः ।
जलम्	कपिः ।
अहम्	त्वम् ।

सारथिः रथं नयति ।
हरिः गृहं गच्छति ।
बालौ जलम् आनयतः ।
अहं फलानि खादामि ।

कपयः फलानि खादन्ति ।
अश्वाः तृणं चरन्ति ।
नृपतयः अश्वान् आरोहन्ति ।
त्वं वृक्षम् आरोहसि ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

क) प्रश्ना—

१ सारथिः किं करोति ?
२ कपयः कानि खादन्ति ?
३ कः गृहं गच्छति ?
४ अहं कम् आरोहामि ?
५ अश्वाः किं चरन्ति ?
६ बालौ किम् आनयत ?
७ के कान् आरोहन्ति ?
८ त्वं किं खादसि ?

ख) 'लट्' रूपैः वाक्यानि पूरयत—

१ अश्वाः जनान्—(वह्)।
२ नृपतयः प्रजाः—(रक्ष्)
३ वृषभौ तृणं—(चर्)।
४ त्वं जलम्—(आनय्)
५ अहं पुष्पाणि—(पश्य्)
६ त्वं फलं—(खाद्)।

ग) 'इदम्' शब्दस्य रूपैः वाक्यानि पूरयत—

१ —सारथिः रथं नयति
२ —कपयः फलानि खादन्ति।
३ —अश्वौ रथं वहतः।
४ —बालिकाः गृहं गच्छन्ति।

घ) 'अस्मद्' शब्दः (I) अहम् आवाम् वयम्—प्रथमा
'युष्मद्' शब्दः (you) त्वम् युवाम् यूयम्—प्रथमा

रथः *m* chariot	त्वं (all genders) you
तृणं *n* grass	नयति *P* leads
सारथिः *m* charioteer	आनयतः *P* bring
नृपतिः *m* king	खादन्ति *P* eat
कपिः *m* money	चरन्ति *P* graze
अहं (all genders) I	आरोहन्ति *P* ascend

Notes—1. Roots take First Person when 'अस्मद्' शब्द is the subject:—e g अहं पठामि
2. Roots take Second Person when युष्मद्' शब्द is the Subject—e. g. त्वं पठसि
3. Roots take Third Person when any शब्द other than अस्मद्& युष्मद् is the subject e.g.सःपठति

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

षष्ठः पाठः ॥ ६ ॥



नौका



शकटम्

इयं नौका

इदं शकटम्

नाविकः ।	चन्द्रः ।	शाकटिकः ।
क्षेपणी ।	पादः ।	कशा ।
नदी ।	नारी ।	चक्रम् ।
आवाम्		युवाम्

आवां शकटेन गृहं गच्छावः । युवां नौकया नदीं तरथः । नाविकः क्षेपण्या नौकां क्षिपति । शाकटिकः कशया वृषभौ ताडयति । शकटं चक्राभ्यां गच्छति । लता पुष्पैः लसति । बालकः हस्तेन चन्द्रम् आह्वयति । जनाः पादाभ्यां गच्छन्ति । नारी पत्या विलसति ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

क) प्रश्नाः—

१ युवां केन गृहं गच्छथः ?
२ लता कैः लसति ?
३ नारी केन विलसति ?
४ आवां कया नदीं तरावः ?
५ शकटं काभ्यां गच्छति ?
६ जनाः काभ्यां गच्छन्ति ?
७ नाविकः कया नौकां क्षिपति ?
८ शाकटिकः कया वृषभौ ताडयति ?
९ बालकः कथं चन्द्रम् आह्वयति ?

ख) 'तद्' शब्दस्य रूपैः वाक्यानि पूरयत—

१ - नाविकः नौकां क्षिपति। २—लता कुसुमैः विलसति।

ग) 'लट्' रूपैः वाक्यानि पूरयत —

१ इमे बालाः पादाभ्यां पाठालयम् — (गच्छ्)
२ वयं कर्णाभ्यां शब्दम् — (आकर्ण्)।
३ नासिकया वयं गन्धम् — (जिघ्र्) ॥
४ बालकाः विद्यया — (लस्) ॥

नौका *f* boat	**आवां** *m. n.* we two
नाविकः *m* boat-man	**युवां** *m. n.* you two
क्षेपणी *f* oar	**तरथः** *P.* cross
शकटं *n* cart	**क्षिपति** *P.* pushes
शाकटिकः *m* cart-man	**वृषभः** *m.* bull
कशा *f* whip	**ताडयति** *P.* beats
चक्रं *n* wheel	**आह्वयति** *P.* calls
पाद् *m* foot	**जिघ्र** *P.* to Smell
नारी *f* woman	**आकर्ण** *P.* to hear

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सप्तमः पाठः ॥ ७ ॥



धेनुः



व्याघ्रः

क्षीरम् ।	ज्ञानम् ।	आहारः ।
वत्सः ।	धनम् ।	उद्यानम् ।
अध्ययनम् ।	विद्या ।	पाठालयः ।
वयम् ।		यूयम् ।

धेनवः वत्सेभ्यः क्षीरं वितरन्ति । व्याघ्रः आहाराय भ्राम्यति । बालिकाः अध्ययनाम् पाठालयं गच्छन्ति । बालिकाः पुष्पाय उद्यानं व्रजन्ति । वयं जलाय नदीं गच्छामः । यूयम् अश्वेभ्यः तृणं यच्छथ । वयं ज्ञानाय पठामः । जनाः धनाय देशान्तरं गच्छन्ति । बालाः विद्यायै धनं यच्छन्ति ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१. धेनवः केभ्यः क्षीरं वितरन्ति ? २. व्याघ्रः किमर्थं परिभ्रमति ? ३. बालकाः किमर्थं पाठालयं गच्छन्ति ? ४. बालिकाः किमर्थम् उद्यानं व्रजन्ति ? ५. यूयं किमर्थं नदीं गच्छथ ? ६. वयं केभ्यः तृणं यच्छामः ? ७. यूयं किमर्थं पठथ ? ८. जनाः किमर्थं कुत्र गच्छन्ति ? ९. विद्यायै के किं यच्छन्ति ?

ख) चतुर्थ्यन्तैः पदैः वाक्यानि पूरयत—

१ अहं — (धेनु) तृणं यच्छामि ।

२ नृपाः — (कवि) धनं यच्छन्ति ।

३ यूयं — (ज्ञान) ग्रन्थान् पठथ ॥

ग) 'लट्' रूपैः वाक्यानि पूरयत—

१ छात्राः सायम् आरोग्याय — क्रीड् ।

२ बालौ हस्ताभ्यां पुस्तकानि — आनय् ।

३ वयं नेत्राभ्यां वस्तूनि — पश्य् ॥

धेनुः *f* cow
वत्सः *m* calf
क्षीरं *n* milk
व्याघ्रः *m* tiger
आहारः *m* food
ज्ञानं *n* knowledge
उद्यानं *n* garden
अध्ययनं *n* study
पाठालयः *m* school

वयं *m. f. n.* we
यूयं *m. f. n.* you
वितरन्ति *P.* give
भ्राम्यति *P.* wanders
व्रजन्ति *P.* go
यच्छथ *P.* give
देशान्तरं *n* another country
नृपः *m* king
कविः *m* poet.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अष्टमः पाठः ॥ ८ ॥

शाखा



पर्णम्

तरुः ।	पर्वतः ।	बीजम् ।
मधु ।	नगरम् ।	अङ्कुरः ।
पीठम् ।	समुद्रः ।	मक्षिका ।
रत्नम् ।	ग्रामः ।	धनिकाः ।

शाखायाः पर्णानि पतन्ति। मक्षिकाः पुष्पेभ्यः मधु पिबन्ति। बीजात् अङ्कुरः प्ररोहति। पात्रात् जलं स्रवति। धेनुः व्याघ्रात् त्रस्यति। अहं पीठात् उत्तिष्ठामि। त्वं तरोः अवरोहसि। पर्वतात् नदी प्रवहति। धनिकाः ग्रामात् नगरं गच्छन्ति। समुद्रात् जनाः रत्नानि आनयन्ति।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

क) प्रश्नाः—

१. कस्याः पर्णानि पतन्ति ? २. मक्षिकाः केभ्यः मधु पिबन्ति ? ३. कस्मात् अङ्कुरः प्ररोहति ? ४. कस्मात् जलं स्रवति ? ५. धेनुः कस्मात् त्रस्यति ? ६. त्वं कस्मात् उत्तिष्ठसि ? ७. अहं कस्मात् अवरोहामि ? ८. नदी कस्मात् प्रवहति ? ९. धनिकाः कस्मात् कुत्र गच्छन्ति ? १०. जनाः कानि आनयन्ति ?

ख) पञ्चभ्यन्तैः पदैः वाक्यानि पूरयत—

१. मक्षिकाः — (कमल) मधु पिबन्ति ।
२. — (तटक) नार्यः आरोहन्ति ।
३. — (लता) पुष्पाणि पतन्ति ॥

ग) 'लट्' रूपैः वाक्यानि पूरयत—

१ शकटं ग्रामात्—(आगच्छ्) । ३ वयं मक्षिकाभ्यः—(त्रस्) ।
२ अहं दूरात् गजं—(पश्य्) । ४ यूयं वृक्षात्—(अवरोह्) ॥

घ) अर्थभेदं वदत (Give difference in meaning)—

१. तरति, वितरति । २ आरोहति, अवरोहति, प्ररोहति ॥

तरुः *m* tree	रत्नानि *n* precious stones
शाखा *f* branch	प्ररोहति *P.* grows
मधु *n* honey	पिबन्ति *P.* drink
पीठ *n* seat	स्रवति *P.* flows
बीजं *n* seed	त्रस्यति *P.* fears
अङ्कुरः *m* sprout	उत्तिष्ठामि *P,* (I) stand up
मक्षिका *f* fly	अवरोहसि *P.* (you)
जनाः *m* people	तटाकं *n* lake [descend

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नवमः पाठः ॥ ९ ॥

माता

दुहिता

पिता ।	भर्ता ।	जामाता ।
पतिः ।	पत्नी ।	पुत्रः ।
आज्ञा ।	शिशुः ।	गानम् ।

दुहिता भर्तुः गृहं गच्छति। माता दुहितुः शिशुं लालयति। शिशवः मातॄणां गानेन तुष्यन्ति। पत्नी पत्युः आज्ञाम् अनुसरति। पुत्रः पितुः आज्ञया जामातुः गृहात् स्वसारम् आनयति। वयं शकटस्य शब्दम् आकर्णयामः यूयं धेनोः क्षीरं पिबथ ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

क) प्रश्नाः—

१. दुहिता कस्य गृहं गच्छति ? २. माता कस्याः शिशुं लालयति ? ३. शिशवः कासां गानेन तुष्यन्ति ? ४. पत्नी कस्य आज्ञां अनुसरति ? ५. पुत्रः कस्य गृहात् काम् आनयति ? ६. यूयं कस्य शब्दमाकर्णयथ ? ७. वयं कस्याः क्षीरं पिबामः ?

ख) 'इदम्' शब्दस्य रूपैः वाक्यानि पूरयत—

१ — मम माता ३ — शिशवः पांसुषु क्रीडन्ति।
२ — कृष्णस्य दुहिता। ४ वयम् — फलानि खादामः।

ग) उचितान्युत्तराणि वदत—(Give proper answers)

१ त्वं कुत्र गच्छसि ?
२ त्वं कुत्र वससि ?
३ रामः कुत्र गच्छति ?
४ कौ तव पितरौ ?
५ तव भ्राता कः ?
६ किं ते नाम ?
७ कया त्वं लिखसि ?
८ कदा त्वं पाठं पठसि ?
९ त्वं कस्याज्ञामनुसरसि ?
१० तव स्वसा कुत्र पठति ?

माता *f* mother	**शिशुः** *m* child
दुहिता *f* daughter	**गानम्** *n* song
पिता *m* father	**लालयति** *P.* is fondling
भर्ता, पतिः *m* husband	**तुष्यन्ति** *P.* are pleased
पत्नी *f* wife	**अनुसरति** *P.* follows
जामाता *m* son-in-law	**आकर्णयामः** *P.* (we) hear
स्वसा *f* sister	**पांसुः** *m* dust
आज्ञा *f* order	**भ्राता** *m* brother

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

दशमः पाठः ॥ १० ॥



काकः

भेकः

आकाशम् ।	वर्षाः ।	वापी ।
नीडम् ।	नराः ।	भूमिः ।
दिवा ।	देवाः ।	नक्तम् ।

काकः शाखायाम् उपविशति। स दिवा आकाशे डयते, नक्तं नीडे वसति। भेकः वापीषु वसन्ति। ते वर्षासु रटन्ति। अयं भेकः भूमौ प्लवते। लतासु कुसुमानि विकसन्ति। वयं तरुषु फलानि पश्यामः। समुद्रे रत्नानि जायन्ते। नराः भूमौ वसन्ति। देवाः स्वर्गे तिष्ठन्ति॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

क) प्रश्नाः—

१. काकः कस्यां उपविशति ? २. स दिवा कुत्र डयते ? ३. स नक्तं कुत्र वसति ? ४. भेकाः कुत्र वसन्ति ? ५. ते कदा रटन्ति ? ६. अयं भेकः कुत्र प्लवते ? ७. कासु कुसुमानि विकसन्ति ? ८. यूयं केषु फलानि पश्यथ ? ९. रत्नानि कुत्र जायन्ते ? १०. भूमौ के वसन्ति ? ११. देवाः कुत्र तिष्ठन्ति ?

ख) 'लभ्' धातोः (to get) आत्मनेपदी 'लट्' रूपाणि—

प्र. पु.	ते	इते	अन्ते	e.g. लभते	लभेते	लभन्ते
म. पु.	से	इथे	ध्वे	लभसे	लभेथे	लभध्वे
उ. पु.	इ	वहे	महे	लभे	लभावहे	लभामहे

ग) 'लट्' रूपैः वाक्यानि पूरयत— १ पुत्राः पितुः धनं—(लभ्)

२. भेकाः भूमौ—(प्लव्) ३ खगाः आकाशे — (डय्)

घ) Give difference in meaning—

१ तिष्ठति, उत्तिष्ठति । २ सरति, अनुसरति ॥

भेकः *m* frog	नक्तं *in* by night
नीडं *n* nest	उपविशति *P* sits
दिवा *in* during day time	डयते *A.* flies
वर्षाः (Always Plural) rainy season	वसति *P.* dwells
वापी *f* well	रटन्ति *P.* call out
	प्लवते *A.* jumps up

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

एकादशः पाठः ॥ ११ ॥





वीणा घण्टा

अत्र ।	तत्र ।	कुत्र ?
गायकः ।	परुषः ।	मधुरः ।

अत्र एका वीणा अस्ति। गायकः वीणां वादयति। घण्टा कुत्र वर्तते ? घण्टा तत्र वर्तते। रामः घण्टां वादयति। घण्टायाः स्वरः परुषः। वीणायाः स्वरः मधुरः।

मालती सम्यग् वीणां वादयति। मालविका मधुरं गायति। कोकिला वसन्ते मधुरं कूजति। गानेन सर्वे जनाः तुष्यन्ति।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

क) प्रश्नाः—

१. कुत्र एका वीणा अस्ति? २. कः वीणां वादयति? ३. कः घण्टां वादयति? ४. कस्याः स्वरः परुषः? ६. कस्याः स्वरः मधुरः? ६. का सम्यग् वीणां वादयति? ७. का कदा मधुरं कूजति? ८. केन सर्वे जनाः तुष्यन्ति?

ख) 'तद्' शब्दस्य रूपैः वाक्यानि पूरयत—

१ — गायकः — वीणां वादयति।
२ — नार्यौ मे गान् पश्यतः।
३ — बालाः — फलानि भक्षयन्ति।

ग) 'किं' शब्दस्य प्रथमा विभक्ति रूपाणि—

पुंलिङ्गे	(who)	कः	कौ	के
स्त्रीलिङ्गे	(who)	का	के	काः
नपुंसकलिङ्गे	(what)	किं	के	कानि

घ) अर्थभेदं वदत—गच्छति, आगच्छति। नयति, आनयति॥

ङ) विपरीत पदम्—(opposite word) परुषः × मधुरः

घण्टा *f* bell	**वादयति** *P.* plays on
अत्र *in* here	**सम्यग्** *in* well
तत्र *in* there	**वसन्तः** *m.* the spring-[season
कुत्र *in.* where?	**कोकिला** *f* cuckoo
गानं *n* song	**सर्वः** *m.* All
गायकः *m.* songster	**मधुरः** *a. m.* sweet
परुषः *a. m.* harsh	**अस्ति** *P.* there is

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

द्वादशः पाठः ॥ १२ ॥



पुस्तकम्



पेटिका

इह । च । वा ।

इह एकं पुस्तकम् एका पेटिका च स्तः । तत् कृष्णस्य 'शब्दमञ्जरी' पुस्तकम् । तस्य पुस्तकस्य मूल्यम् त्रयो रूप्यकाः । तस्मिन् पुस्तके द्विशतं पुटानि सन्ति । मम 'श्रीरामोदन्त' पुस्तके षष्टि पुटानि सन्ति ॥

अस्यां पेटिकायां कानि वस्तूनि विद्यन्ते ? तस्यां पेटिकायां वस्त्राणि भूषणानि धनानि च विद्यन्ते । इयं हरेः पेटिका । स इमां कुञ्चिकया उद्घाटयति । कुञ्चिका हरेः गोपालस्य वा करे वर्तते ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

क) प्रश्नाः—

१. इह के स्तः ? २. इदं कस्य पुस्तकम् ? ३. कृष्णस्य पुस्तकस्य किं मूल्यम् ? ४. कस्मिन् द्विशतं पुटानि सन्ति ? ५. तव पुस्तके कति पुटानि सन्ति ? ६. इयं कस्य पेटिका ? ७. कस्तां कया उद्घाटयति ? ८. कुञ्चिका कस्य करे वर्तते ?

ख) 'मम-वयस्' पदाभ्यां यथोचितं वाक्यानि पूरयत—

१ — धनम् आभरणानि च पेटिकायां रक्षामः।
२ मालती — गृहमागत्य वीणां शिक्षयति।
३ — गृहं नद्यास्तीरे वर्तते।
४ — पाठान् यथाकालं पठामः ॥

ग) 'अस्' धातोः (to be) 'लट्' रूपाणि—

3rd Person—प्र. पु.	अस्ति	स्तः	सन्ति
2nd Person—म. पु.	असि	स्थः	स्थ
1st Person—उ. पु.	अस्मि	स्वः	स्मः

घ) अस् धातोः 'लट्' रूपैः वाक्यानि पूरयत—

१. इह द्वौ अश्वौ —। २. वयं चत्वारः भ्रातरः — ॥

पेटिका *f* box	वस्तु *n* a thing
इह *in.* here. च *in.* and	विद्यन्ते *A.* there are
वा *in.* or स्तः *P.* are	भूषणं *n.* ornament
मूल्यं *n* price	उद्घाटयति *P.* opens
रूप्यकः *m.* a rupee	वर्तते *A.* there is
शतं *n* hundred	कुञ्चिका *f* key
धनं *n* wealth	कथाकालं *in.* in time
पुटं *n* page	शिक्षयति *P.* teaches

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

त्रयोदशः पाठः ॥ १३ ॥



नक्षत्राणि

यदा।	तदा।	कदा?
तु।	किन्तु। न।	वत्।

नक्षत्राणि कदा प्रकाशन्ते? नक्षत्राणि रात्रौ प्रकाशन्ते। तानि दिवा न प्रकाशन्ते। मेघैः आवृते नभसि रात्रौ च न प्रकाशन्ते॥

यदा सूर्यः अस्तम् अयते तदा तारणि प्रकाशन्ते। तानि व्योम्नि हीरवत् द्योतन्ते। नक्षत्राणां राजा चन्द्रः। चन्द्रस्य प्रकाशः चन्द्रिका॥

अहं नक्षत्राणि गणयामि। किन्तु तानि गणयितुं न पारयामि। तानि असङ्ख्यानि वर्तन्ते। तत्र अश्विन्यादीनि सप्तविंशतिः नक्षत्राणि प्रधानानि॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

क) प्रश्नः—

१. नक्षत्राणि कुत्र प्रकाशन्ते ? २. तानि कदा न प्रकाशन्ते ? ३. तानि कुत्र हीरवत् द्योतन्ते ? ४. केषां राजा चन्द्रः ? ५. तस्य प्रकाशस्य नाम किम् ? ६. त्वं किं करोषि ? ७. कानि गणयितुं न पारयसि ? ८. कुतः गणयितुं न पारयसि ? ९. प्रधाननक्षत्राणि कानि ? कति ?

ख) 'त्वम्—तव' पदाभ्यां यथायोगं वाक्यानि पूरयत—

१ — नक्षत्राणि गणयसि। १ पितरौ पुत्रीं लालयतः ॥

ग) 'लट्' रूपैः वाक्यानि पूरयत—

१. वयं पीठेषु—(उपविश्)। २. अहम् अङ्गुलीः-(गण्)।
३. तृणानि नक्षत्राणि च असङ्ख्यानि—(अस्)

नक्षत्रं *n* star
यदा *in.* when
तदा *in.* then
कदा *in* when ?
तु, किन्तु *in* but
न *in* not
वत् *in* like
प्रकाशन्ते *A* shine
आवृते *a. n.* covered with
नभस् *n* sky
अस्तम् अयते *A* sets
तारं *n* star
व्योमन् *n* sky
हीरवत् *in* like diamond
द्योतन्ते *A* shine
चन्द्रिका *f* moon-light
गणयामि *P.* (I) count
पारयामि *P.* am able
असङ्ख्यानि *a. n.* countless
अश्विन्यादीनि *a. n.* begining with अश्विनी*
सप्तविंशतिः *f* twentyseven
करोषि U (you) do.

---

*अश्विन्यादि सप्तविंशति नक्षत्राणां नामानि ज्ञातव्यानि।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

चतुर्दशः पाठः ॥ १४ ॥

भ्राता स्वसा च

ह्यः। श्वः। परश्वः। अद्य। वार्ता। तर्जनी

अत्र एकः बालकः एका बालिका च तिष्ठतः। तौ पाठालयात् आगच्छताम्। सा बालिका तस्य बालकस्य स्वसा। तौ किं कुरुतः? तौ सँल्लपतः॥

स बालकः ह्यः पाठं न अपठत्। उपाध्यायः तम् अताडयत्। तां वार्तां तस्य स्वसा पित्रे अकथयत्। पिता पुत्रं अभर्त्सयत। तेन कुपितः स बालकः स्वसारम् अनिन्दत्। सा भ्रातरं तर्जन्या तर्जयते॥

राम! अपि त्वम् अद्य प्रातः स्वसुः गृहम् अगच्छः? आर्य! अहं न अगच्छम्। श्वः परश्वो वा गमिष्यामि। ह्यः सायं त्वं किम् अकरोः? ह्यः सायम् अहं पित्रा सह विपणिम् अगच्छम्॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

क) प्रश्नाः—

१. अत्र कौ तिष्ठतः? २. तौ कुतः आगच्छताम्? ३. सा बालिका का? ४. कः ह्यः पाठं न अपठत्? ५. कः तम् अताडयत्? ६. तां वार्तां का पित्रे अकथयत्? ७. कः पुत्रमभर्त्सयत? ८. तेन कुपितः स बालकः किम् अकरोत्? ९. सा भ्रातरं किं करोति? १०. त्वं कदा स्वसुः गृहं गमिष्यसि? ११. त्वं कदा विपणिमगच्छः?

ख) 'एतद्' शब्दस्य लिङ्गत्रयेऽपि प्रथमाविभक्ति रूपाणि—

पुंलिङ्गे—	एषः	एतौ	एते
स्त्रीलिङ्गे—	एषा	एते	एताः
नपुंसकलिङ्गे—	एतत्	एते	एतानि

ग) 'एतद्', शब्दस्य रूपैः वाक्यानि पूरयत—

१—मम भ्राता।	४—कपी।	७—धेनवः।
२—तव स्वसा।	५—कशे।	८—तरवः।
३—पुस्तकम्।	६—फले।	९—नीडानि॥

ह्यः *in* yesterday	गमिष्यामि *P.* (I) shall go
श्वः *in* to-morrow	बालिका *f* girl
परश्वः *in.* the day-after to-morrow	सँल्लपतः *P.* converse
	अकथयत् *P.* told
अद्य *in.* to day	अभर्त्सयत *A* threatened
वार्ता *f* news	अनिन्दत् *P.* abused
तर्जनी *f* the fore finger	तर्जयते *A.* threatens
बालकः *m.* boy	विपणिः *f* a market

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पञ्चदशः पाठः ॥ १५ ॥



हस्तौ

वामहस्तः। दक्षिणहस्तः। अङ्गुली।

राम! उत्तिष्ठ। तव हस्तौ दर्शय। त्वं केन हस्तेन लिखसि? आर्य! अहम् अनेन हस्तेन लिखामि। स दक्षिणहस्तः। अन्यः वामहस्तः। एकस्मिन् हस्ते पञ्च अङ्गुल्यः सन्ति। द्वयोः हस्तयोः दश अङ्गुल्यः सन्ति। पाणौ विविधाः रेखाः विद्यन्ते॥

रामः उपविशतु। कृष्णः उत्तिष्ठतु। कृष्ण! त्वं हस्ताभ्यां नेत्रे स्पृश। वयं नेत्राभ्यां किं कुर्मः? वयं नेत्राभ्यां पश्यामः। हस्ताभ्यां कर्माणि कुर्मः। अन्येषां प्राणिनां द्वे नेत्रे विद्येते; हस्तौ न स्तः॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

क) प्रश्नाः—

१. एकस्मिन् हस्ते कति अङ्गुल्यः सन्ति? २. द्वयोः हस्तयोः कति अङ्गुल्यः सन्ति; ३. कुत्र विविधा रेखाः विद्यन्ते? ४. हस्ताभ्यां किं कुर्मः? ५. द्वे नेत्रे विद्येते, हस्तौ न स्तः, केषाम्?

ख) उचितैः पदैः वाक्यानि पूरयत—

१. ह्यः सायं पुत्र पत्रा सह विपणिम्—।
२. अहं श्वः प्रभाते स्वसुः गृहं—।
३. येन वयं लिखामः सः—।
४. येन वयं पुस्तकं धरामः सः—।
५. पक्षिणः पक्षाभ्यां नभसि—॥

ग) 'पठ्' धातोः (to study) (परस्मैपदी) 'लङ्' रूपाणि—

प्र. पु.	त्	ताम्	अन्	अपठत्	अपठतां	अपठन्
म. पु.	स्	तम्	त	अपठः	अपठतं	अपठत
उ. पु.	अम्	व	म	अपठ	अपठाव	अपठाम

घ) 'लङ्' (Imperfect Past Tense) रूपैः वाक्यानि पूरयत—

१ अहं ह्यः पाठम्—(पठ्)। ३ गुरुः इमां कथाम्—(कथ्)।
२ मालविका वीणाम्—(वाद्)। ४ जनाः—(आगम्)॥

वामहस्तः *m* left hand	**पाणिः** *m* palm
दक्षिणहस्तः *m* right hand	**विविधाः** *a. f.* various
अङ्गुली *f* finger	**रेखाः** *f* lines
दर्शय *P.* (you) show	**स्पृश** *P.* (you) touch
लिखामि *P.* (I) write	**प्रभातं** *n* dawn
उत्तिष्ठ *P.* you stand up	**धरामः** *P.* (we) hold

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

षोडशः पाठः ॥ १६ ॥

लेखनम्

तथा। इति। एवम्।
सह। विना। मा।

अयं कः? सः बालकः। अस्य नाम किम्? तस्य नाम कृष्णः इति। स किं करोति? स लिखति। स भ्रात्रे पत्रिकां लिखति॥

त्वं किं लिखसि? अहं लेखावलिपुस्तके संस्कृत-प्रतिलेखनं लिखामि। प्रतिलेखनेन अक्षराणि सुन्दराणि भवन्ति॥

तव नाम किम्? मम नाम राघवः इति। राघव! त्वं कस्मात् न लिखसि? आर्य मम लेखनी नास्ति। लेखन्या विना कथं लिखामि? भद्र! त्वं प्रतिदिनं लेखन्या पुस्तकेन च विना पाठालयम् आगच्छसि। एवं मा कुरु। आर्य! अहं कृष्णेन सह गृहं गत्वा लेखनीम् आनयामि। तथा कुरु॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

क) प्रश्नाः—१. अयं बालकः किं लिखति? २. केन अक्षराणि सुन्दराणि भवन्ति? ३. राघवः कुतः न लिखति? ४. सः प्रतिदिनं पाठालयं कथम् आगच्छति? ५. त्वं केन सह कुत्र गत्वा लेखनीमानयसि?

Note the correct writing of the letter म कार—

1. 'म' कार—at the end of a sentence should be written as 'म्' e.g. लेखनम्।
2. 'म' कार followed by a vowel should be written as 'म्' e.g. कथम् आगच्छति।
3. 'म' कार followed by a consonant should be written as (अनुस्वार) e.g. त्वं केन सह भाषसे।

ख) उचितैः पदैः वाक्यानि पूरयत—

१. —विना कथं लिखसि? ३. उपाध्यायः—सह सँलपति।

२. —विना कथं पठसि? ४. त्वं पित्रे—कदा लिखसि?

ग) 'पठ्' धातोः (परस्मैपदी)' 'लोट्' Imperative Mood (expresses Command, Wish, Blessing etc.)

रूपाणि—

प्र. पु. तु	ताम् अन्तु e.g.	पठतु-पठतात्,	पठतां	पठन्तु
म. पु. —	तम् त	पठ-पठतात्,	पठतं	पठत
उ. पु. आनि	आव आम	पठानि	पठाव	पठाम

लेखनं *n* writing
तथा *in* so इति *in* thus
एवं *in* in this manner
सह *in* with
विना *in* without
मा *in* don't
कुरु *P.* you do

नाम *n* name
पत्रिका *f* letter
प्रतिलेखनेन *n* by copy writing
सुन्दरं *a.n.* beautiful
लेखनी *f* a pen
भद्र! Oh boy!

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सप्तदशः पाठः ॥ १७ ॥



विद्यालयः

आहत्य । कति । प्रश्नः । कक्ष्या ।

अस्मिन् विद्यालये चतस्रः कक्ष्याः सन्ति । एते सप्त छात्राः चतुर्थकक्ष्यायां पठन्ति । चित्रं पश्य । एको बालकः तिष्ठति । अन्ये उपविष्टाः । तिष्ठन् बालकः उपाध्यायस्य प्रश्नानाम् उत्तराणि कथयति ॥

त्वं कस्यां कक्ष्यायां पठसि ? अहं तृतीयकक्ष्यायां पठामि । कति छात्राः त्वया सह पठन्ति ? मया सह चत्वारो बालकाः तिस्रो बालिकाश्च पठन्ति । आहत्य वयम् अष्टौ सहपाठिनः स्मः । द्वितीयकक्ष्यायां द्वे बालिके त्रयो बालकाश्च पठन्ति । प्रथमकक्ष्यायां पञ्च बालकाः पञ्च बालिकाश्च सन्ति ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

क) प्रश्नाः—१. अस्मिन् विद्यालये कति कक्ष्याः सन्ति ? २. एते सप्त छात्राः कस्यां कक्ष्यायां पठन्ति ? ३. तिष्ठन् बालकः किं करोति ? ४. तृतीयकक्ष्यायां के पठन्ति ? ५. आहत्य यूयं कति सहपाठिनः स्थ ? ६. प्रथमकक्ष्यायां कति बालकाः कति बालिकाश्च सन्ति ?

ख) Note the combination of the words—

1. एकः	+ बालकः	=	एको	बालकः
2. चत्वारः	+ बालकाः	=	चत्वारो	बालकाः
3. तिस्रः	+ बालिकाः	=	तिस्रो	बालिकाः

ग) 'किम्' शब्दस्य रूपैः यथायोगं वाक्यानि पूरयत—

१ — एतत् ?	४ त्वं — श्लोकं पठसि ?
२ — अयम् ?	५ इदं — बालकस्य पुस्तकम् ?
३ — इदम् ?	६ त्वं — ग्रामे वससि ?

घ) संख्याशब्दरूपाणि [Numerals]

	पुंसि	स्त्रियां	नपुंसके
१.	एकः	एका	एकम्
२.	द्वौ	द्वे	द्वे
३.	त्रयः	तिस्रः	त्रीणि
४.	चत्वारः	चतस्रः	चत्वारि

विद्यालयः *m* School
आहत्य *in* on the whole.
कति (all genders) how-many
कक्ष्याः *f* classes

उपविष्टः *m* sitting
उत्तराणि *n* answers
चित्रं *n* picture
सहपाठिनः *m* class-mates.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अष्टादशः पाठः ॥ १८ ॥



क्रीडा

इदानीम् । तदानीम् । कन्दुकः । चर्म ।

इदानीं सायाह्नः । पश्य ! अस्मिन् क्रीडाङ्गणे षट् बालकाः कन्दुकेन क्रीडन्ति । कन्दुकः चर्मणा निर्मितः वातेन पूरितश्च । अतः स ताडयमानः उत्पतति ॥

ते बालकाः इतस्ततो धावन्तः हस्तेन पादेन च कन्दुकं ताडयन्ति । एको बालकः भूमौ उपविष्टः । स चिरं क्रीडनेन श्रान्तोऽभवत् । तस्य गात्रं स्विद्यति । स मुहूर्तं विश्रम्य भूयोऽपि* क्रीडिष्यति ॥

यदा सूर्यः अस्तं गमिष्यति तदा प्रकाशः न वर्तिष्यते । तदानीम् एते गृहं व्रजिष्यन्ति ॥

---

* This sign (ऽ) is called अवग्रह. This is used to denote that the beginning of the Vowel अ of the next word has merged.

e.g. श्रान्तः + अभवत् = श्रान्तोऽभवत् ।
भूयः + अपि = भूयोऽपि ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

क) प्रश्नाः—१. इदानीं कः समयः ? २. बालकाः कुत्र केन क्रीडन्ति ? ३. कन्दुकः केन निर्मितः केन पूरितश्च ? ४. स ताड्यमानः किं करोति ? ५. ते बालकाः किं कुर्वन्तः कन्दुकं ताडयन्तिः ६. उपविष्टः बालकः कथं श्रान्तः अभवत् ? ७. सः किं करिष्यति ? ८. प्रकाशः कदा न वर्तिष्यते ? ९. तदानीमेते किं करिष्यन्ति ?

ख) 'एक, द्वि' अनयोः रूपैः वाक्यानि पूरयत—

१. अत्र — गजः तिष्ठति । ३. मनुष्याणां — हस्तौ स्तः
२. इह — धेनुः तृणं चरति । ४. — नार्यौ जलाय गच्छतः ॥

ग) 'गम्-गच्छ्' धातोः 'लृट्' (Future Tense) रूपाणि—

प्र. पु.	गमिष्यति	गमिष्यतः	गमिष्यन्ति
म. पु.	गमिष्यसि	गमिष्यथः	गमिष्यथ
उ. पु.	गमिष्यामि	गमिष्यावः	गमिष्यामः

घ) धावन्, तिष्ठन्; गच्छन्—इमे 'शतृ' प्रत्ययान्ताः (Present Participles)

ङ) क्रीड्, पिब्, वद्—धातूनां 'शतृ' प्रत्ययान्तान् वदत !

क्रीडा sport
इदानीं *in.* now
तदानीं *in.* then
सायाह्नः *m* evening time
क्रीडाङ्गणं *n.* play ground
कन्दुकः *m* ball
क्रीडन्ति *P.* (they) play
चर्म *n* leather
वातः *m* wind
भूयोऽपि *in.* again [beaten
ताड्यमानः *pr. p* being
उत्पतति *P.* goes up
इतस्ततः *in.* here & there
श्रान्तः *p. p.* tired
गात्रं *n* body
मुहूर्तं *m. n.* a while

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

एकोनविंशः पाठः ॥ १९ ॥

पुष्पगुच्छः

भृङ्गः । मकरन्दः । अलम् ।

अत्र एकः पुष्पगुच्छो वर्तते । अयं रमणीयः पुष्पगुच्छः । अयं रूपेण नेत्रं गन्धेन घ्राणं च आनन्दयति । पश्य ! तस्मिन् एको भृङ्गः तिष्ठति । स पुष्पेभ्यः मकरन्दं पिबति । तस्मात् भृङ्गस्य मधुपः इत्यपि नाम ॥

भृङ्गाः मकरन्दं पिबन्तः मधुरं गुञ्जन्ति । ते पुष्पात् पुष्पं चलन्तः विहरन्ति । भृङ्गाणां वर्णः नीलः । तेषां भासुरौ द्वौ पक्षौ विद्येते । तेषां मुखे श्मश्रुणः स्थाने रेफतुल्ये द्वे रोमणी स्तः । अतः ते पश्यतां जनानां विनोदम् आवहन्ति ॥

भृङ्गाणां समीपं मा गच्छ । ते त्वां दशेयुः । अलं तव कुतूहलेन । आगच्छ, गृहं गच्छावः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

क) प्रश्नाः—

१. अयं कीदृशः पुष्पगुच्छः ? २. अयं केन किम् आनन्दयति ? ३. भृङ्गः किं करोति ? ४. के किं कुर्वन्तः मधुरं गुञ्जन्ति ? ५. ते कथं विहरन्ति ? ६. भृङ्गाणां वर्णः कीदृशः ? ७. तेषां कीदृशौ पक्षौ विद्येते ? ८. तेषां मुखे कस्य स्थाने के स्तः ? ९. के केषां विनोदमावहन्ति ? १०. भृङ्गाणां समीपं गतान् अस्मान् ते किं कुर्युः ?

ख) Fill up the blanks using the forms of 'त्रि' and 'चतुर्' शब्दs.

१ सत्वं रजः तमः इति — गुणाः सन्ति ।
२ दशरथस्य — भार्याः आसन् ।
३ शिवस्य — नेत्राणि वर्तन्ते ।
४ मृगाणां — चरणाः विद्यन्ते ।

ग) अस्मिन् पाठे 'शतृ' प्रत्ययान्ताः (Present Participles) के ?

घ) पर्यायपदम् :-भृंगः-षट्पदः-मधुकरः-भ्रमरः—द्विरेफः-मधुपः

पुष्पगुच्छः *m* bunch of [flowers
भृङ्गः *m* bee
मकरन्द *m* honey of flowers
अलं *in* enough of
रमणीयः *a. m.* beautiful
रूपं *n* appearance
गन्धः *m* smell
घ्राणः *m* nose
गुञ्जन्ति *P.* (they) hum
विहरन्ति *P.* (they) play
भास्वरः *a. m.* shining
पक्षः *m* wing
श्मश्रु *n* moustaches
रेफः *m* the letter 'र'
विनोदः *m* pleasure
आवहन्ति *P* create, give
दशेयुः *P.* may bite
कुतूहलं *a* curiosity

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विंशः पाठः ॥ २० ॥

वर्षाकालः

परम् । कथम् । प्रति । आतपः । छत्रम् ।

इदानीं वर्षाकालः । पश्य ! आकशं मेघैः सञ्छन्नम् । सर्वत्र वृष्टेः धाराः पतन्ति । जनाः स्वीयानि कर्माणि त्यक्त्वा गृहं गताः । पक्षिणः शैत्येन पीडिताः वृक्षाणां शाखासु तिष्ठन्ति । कृषीवलाः परं क्षेत्राणि कर्षन्ति । ते कृष्टेषु क्षेत्रेषु धान्यानि वपन्ति ॥

वर्षाकाले कूपाः सरांसि च जलेन पूर्णानि भवन्ति । नद्योऽपि कूलानि भञ्जयन्त्यः प्रवहन्ति । भूमौ सर्वत्र तृणानि उत्पद्यन्ते । वृक्षाः लताश्च पल्लविताः भवन्ति ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

त्वं कुत्र प्रस्थितः? अहम् आपणं प्रति प्रस्थितः। वृष्टिः खलु पतति, कथं गमिष्यसि? मम हस्ते छत्रं वर्तते। छत्रं जनान् आतपात् वृष्टेश्च रक्षति। अतः छत्रस्य 'आतपत्रम्' 'वर्षत्रम्' इति नाम॥

क) प्रश्नाः—१. जनाः किं कृत्वा कुत्र गताः? २. पक्षिणः शैत्येन पीडिताः कुत्र तिष्ठन्ति? ३. के क्षेत्राणि कर्षन्ति? ४. कुत्र धान्यानि वपन्ति? ५. कस्मिन् काले कानि जलेन पूर्णानि भवन्ति? ६. नद्यः कथं प्रवहन्ति? ७. कुत्र तृणान्युत्पद्यन्ते? ८. के पल्लविता भवन्ति? ९. छत्रं जनान् काभ्यां रक्षति? १०. छत्रस्य नामान्तरे के?

ख) 'भू' (भव्) (to be) धातोः विधिलिङ् (Potential Mood)

प्र. पु.	ईत्	ईताम्	ईयुः	e.g. भवेत्	भवेताम्	भवेयुः
म. पु.	ईः	ईतम्	ईत	भवेः	भवेतम्	भवेत
उ. पु.	ईयम्	ईव	ईम	भवेयम्	भवेव	भवेम

ग) 'पत्, वप्, वह्'—धातूनां विधिलिङ् रूपाणि वदत।

वर्षाकालः *m* rainy season
परं *in* alone
प्रति *in* towards
आतपः *m* heat, sun-shine
छत्रम् *n* umbrella
सञ्छन्न *a. n*, covered with
धाराः *f* showers
स्वीय *a.* one's own
कृषीवलः *m* farmer
क्षेत्रम् *n* field
कर्षन्ति *P* plough
वपन्ति *P.* sow
कूपः *m* well
सरः *n* a tank
भञ्जयन्त्यः a *f* breaking
प्रवहन्ति *P.* (they) flow
पल्लविताः *a. m.* having young sprouts
आपणं *n* a Shop
रक्षति *P.* protects
कथं *in.* how

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

एकविंशः पाठः ॥ २१ ॥

द्वौ सखायौ

अतीव । प्रभूतम् । श्रेष्ठी । वित्तम् ।

पूर्वं चोलदेशे द्वौ सखायावास्ताम् । तयोरेको विद्याप्रियः अन्यो धनप्रियः । तयोः पितरौ अतीव दरिद्रौ । अतस्तौ पित्रोराज्ञया विदेशं गतौ ॥

विद्याप्रियस्तत्र विद्यालयं प्रविश्य विद्यामधीतवान् । अन्यः कस्यापि श्रेष्ठिनः आपणे व्यापृतः प्रभूतं वित्तमर्जति स्म ॥

दशभ्यो वर्षेभ्यः परं तौ स्वदेशं प्रति प्रस्थितौ । वनमार्गेण गच्छतोस्तयोः धनप्रियस्य धनभाण्डं चोराः अपाहरन् । तेन स निर्धनो जातः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

यदा तौ स्वदेशमागतौ तदा विद्याप्रियं कृतविद्यं वीक्ष्य तद्देशीयो राजा तं मन्त्रिपदे न्ययोजयत्। धनप्रियस्तु जीविकार्थं गत्यन्तरम् अपश्यन् तस्यैव मन्त्रिणः सेवकोऽभवत्। विद्याया माहात्म्यं पश्यत! अत एव 'विद्याधनं सर्वधनात् प्रधानम्' इति लोका आहुः॥

क) प्रश्नाः १. कदा कुत्र द्वौ सखायावास्ताम्? २. तौ कीदृशौ?
३. कुतः तौ विदेशं गतौ? ४. विद्याप्रियस्तत्र किं कृतवान्?
५. अन्यः किमकरोत्? ६. कदा तौ स्वदेशं प्रति प्रस्थितौ?
७. तयोः कस्य किं चोराः अपाहरन्? ८. तेन स कीदृशो जातः?
९. कः तं मन्त्रिपदे न्ययोजयत्? १०. धनप्रियः किमकरोत्?
११. कस्मात् त्वं विद्याभ्यासं करोषि?

ख) 'रभ्' धातोः (to begin) (आत्मनेपदी) 'लङ्' रूपाणि—

प्र पु.	त	इताम्	अन्त	e.g. अरभत	अरभेतां अरभन्त
म पु.	थाः	इथाम्	ध्वम्	अरभथाः	अरभेथाम् अरभध्वम्
उ पु.	इ	वहि	महि	अरभे	अरभावहि अरभामहि

ग) 'प्रविश्य, वीक्ष्य' इमे ल्यबन्ते अव्यये॥

घ) अर्जति स्म — अत्र व्याकरणविशेषः कः?

ङ) 'लङ्' रूपैः वाक्यानि पूरयत—
१ अद्य मम स्वसा पतिगृहात् —(आगच्छ्।)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२ अहं ह्यः गृहात् पुस्तकम् — (आनय् ।)

३ ह्यः सूर्यः न—(प्रकाश्) ४ अस्माकं परीक्षा ह्यः—(आरभ् ।)

च) 'एक, द्वि, त्रि, चतुर्' एतेषां रूपैः वाक्यानि पूरयत—

१ — वने व्याघ्रः प्रतिवसति ।

२ — गुच्छे — पुष्पाणि वर्तते ।

३ — बालकौ पथि — चोरम् अपश्यताम् ।

४ — दशरथस्य — भार्यासु — पुत्राः अजायन्त ।

छ) संख्याशब्दस्य रूपाणि 5 to 19—

५ पञ्च ।	१० दश ।	१५ पञ्चदश ।
६ षट् ।	११ एकादश ।	१६ षोडश ।
७ सप्त ।	१२ द्वादश ।	१७ सप्तदश ।
८ अष्ट-अष्टौ	१३ त्रयोदश ।	१८ अष्टादश ।
९ नव ।	१४ चतुर्दश ।	१९ नवदश or एकोनविंशतिः

सखायौ *m* two friends
अतीव *in* very much
प्रभूतं *in* much
श्रेष्ठी *m* merchant
वित्तम् *n* wealth
विदेशः *m* Foreign land
अर्जति स्म *P* earned
परं *in* after
अपाहरन् *P.* took away
निर्धनः *a m* poor
तद्देशीयः *a. m.* native of the place
न्ययोजयत् *P* appointed
जीविकार्थम् *in* for livelihood
आहुः *P.* (they) say
गत्यन्तरं *n* other means
सेवकः *m* servant
अभवत् *P.* (he) became

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

द्वाविंशः पाठः ॥ २२ ॥

शुकः



किमिति । प्रायेण ।

अतीव । तस्मात् ।

अयं शुकः पञ्जरे बद्धस्तिष्ठति । पञ्जरं लोहस्य शलाकाभिः निर्मितम् । किमिति शुकाः पञ्जरे बध्यन्ते ? शुकाः खलु शिक्ष्यमाणाः स्फुटं भाषन्ते । अतः शुकान् गृहीत्वा जनाः पञ्जरे स्थापयन्ति शिक्षयन्ति च ॥

शुकानां रूपमपि रुचिरम् । तेषां पक्षौ हरितौ । चञ्चुश्च लोहिता । केचन शुकाः चित्रवर्णाः सन्ति । तेऽतीव मनोहराः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शुकाः प्रायेण उष्णदेशेषु जायन्ते। वृक्षाणां कोटरेषु पाषाणानां छिद्रेषु वा ते निवसन्ति। पक्वानि फलानि शालिं मरिचं च ते भक्षयन्ति। लवणं शुकानां विषम्। तस्मात् लवणेन मिश्रितं भक्ष्यं मा यच्छ शुकेभ्यः॥

क) प्रश्नाः—१. कः कुत्र बद्धः तिष्ठति? २. पञ्जरं कथं निर्मितम्? ३. शुकानां रूपं कीदृशम्? ४. तेषां पक्षौ कीदृशौ? ५. चञ्चुः कीदृशी? ६. अतीव मनोहराः शुकाः के? ७. शुकाः प्रायेण कुत्र जायन्ते? ८. कुत्र ते निवसन्ति? ९. किं ते भक्षयन्ति? १०. किं शुकानां विषम्?

ख) पञ्चन्, षट्, सप्तन्, अष्टन्, नवन्, दशन्,—एतेषां संख्याशब्दानां रूपैः वाक्यानि पूरयत—

१ इह — बालकाः — बालिकाश्च आगच्छन्ति।

२ — श्लोकानाम् अर्थं वर्णयत।

३ — भृत्याः — दिनैः तत् कर्म कुर्वन्ति।

४ अस्यां वीथ्यां — गृहाणि सन्ति।

५ प्रभुः — भृत्येभ्यः वेतनम् अयच्छत्।

६ पाण्डोः — पुत्राः अजायन्त॥

ग) पठत —

ते + अतीव = तेऽतीव। भूयः + अपि = भूयोऽपि।

नद्यः + अपि = नद्योऽपि। सखायौ + आस्ताम् = सखायावास्ताम्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

घ) 'रमणीय' शब्दस्य रूपैः वाक्यानि पूरयत—

१ अयं—अश्वः । ३ एतत्—पुष्पम् । ५ एतानि—फलानि ।

२ एषा—लता । ४ इमे —पात्रे । ६ शुकाः —खगाः ॥

ङ) Note that Adjectives must agree with their Nouns in Gender, number, and case e.g.

पाठालयः निर्मितः ; पाठशाला निर्मिता ; पञ्जरं निर्मितम् ।

च) 'रभू धातोः (to begin) (आत्मनेपदी) 'लोट्' रूपाणि—

प्र. पु.	रभतां	रभेतां	रभन्तां
म. पु.	रभस्व	रभेथां	रभध्वं
उ. पु.	रभै	रभावहै	रभामहै

शुकः *m* parrot
किमिति *in.* why
प्रायेण *in.* mostly
अतीव *in* very
तस्मात् *in* therefore
पञ्जरं *n* cage
लोह *m.* n. Iron or any metal
शिक्ष्यमाणाः *a. m.* being taught
स्फुटं *in.* distinctly
भाषन्ते *A* speak
रुचिरं *a. n.* charming
हरितः *a. m.* green
चञ्चुः *f* a beak
लोहिता *a. f.* red
मनोहराः *a. m.* lovely
जायन्ते *A.* are born
कोटरं *n* hollow of a tree
पाषाणः *m* stone
छिद्र *n* hole
पक्वः *a. n.* ripe
शालिः *f* paddy
मरिचं *n* pepper (here it means chilli)
मिश्रित *a.* mixed with
लवणं *n* salt
मा *in.* यच्छ *P.* don't give

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

त्रयोविंशः पाठः ॥ २३ ॥



वृद्धस्य कौशलम्

कश्चित् । केचित् । कानिचित् । कतिचित् ।

एकदा कश्चित् वृद्धो ग्रामान्तरं गच्छन् पथि श्रान्तः अभवत् । अतः स विश्रमाय पार्श्वस्थितस्य चूततरोः मूलमगच्छत् ॥

तस्मिन् वृक्षे पचेलिमानि फलान्यवर्तन्त । वृद्धस्य तेषु स्पृहा जाता । परं स वृक्षमारुह्य तानि ग्रहीतुं नाशक्नोत् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

दिष्ट्या तस्मिंस्तरौ केचित् वानराः फलानि खादन्तः स्थिताः। तानवलोक्य वृद्धः प्रहर्षं गतः। स किमकरोत्? स कतिचित् उपलानादाय वानरान् लक्ष्यीकृत्य प्राक्षिपत्। वानराः कुपिताः कानिचित् फलान्यवचित्य वृद्धं प्रति प्राक्षिपन्। वृद्धः सहर्षं तान्यादाय स्वाभीष्टदेशं गतः॥

अहो! वृद्धस्य कौशलम्॥

Describe in your mother-tongue the skill of the old man.

क) प्रश्नाः—१. कः पथि श्रान्तः अभवत्? २. स किमकरोत्? ३. कुत्र कीदृशानि फलान्यवर्तन्त? ४. वृद्धस्य का जाता? ५. स किं कर्तुं नाशक्नोत्? ६. कुत्र के फलानि खादन्तः स्थिताः? ७. कथं वृद्धः प्रहर्षं गतः? ८. स किमकरोत्? ९. वानराः किमकुर्वन्? १०. वृद्धः तान्यादाय कुत्र गतः?

ख) 'किञ्चित्' इत्यस्य रूपैः वाक्यानि पूरयत—

१ एकस्मिन् नगरे — वणिक् प्रत्यवसत्।

२ अत्र — बालकाः — बालिकाश्च पठन्ति।

३ इह — कुमार्यः — उद्यानं गच्छन्ति।

४ अहं — सहपाठिना सह तस्य गृहमगच्छम्।

५ अहं — बालकान् — बालिकाश्च विद्यालये अपश्यम्॥

ग) पठत—१ फलानि + अवचित्य = फलान्यवचित्य।

२ तानि + आदाय = तान्यादाय।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ष) अस्मिन् पाठे ल्यबन्तानि अव्ययानि कानि ?

ङ) उचितैः क्रियापदैः वाक्यानि पूरयत—

१ वयं नौकया नदीं —— । ४ ह्यः अस्माकम् अनध्यायः —— ।

२ त्वम् असत्यं मा —— । ५ सः पेटिकां कुञ्चिकया —— ।

३ अहं सायं वीणाम् —— । ६ श्वः परश्वो वा पिता मद्रपुरात्—— ।

च) 'लोट्' (आज्ञा) रूपैः वाक्यानि पूरयत—

१ वयं श्लोकान् — (पठ्) । २ युवां पाठालयं—(गम् = गच्छ्) ।

२ राम, त्वम् — (उप+विश्) ४ यूयम् असत्यं मा — (वद्) ।

५ छात्राः यूयम् — (उत् + तिष्ठ्) ।

६ ते यथाकालं कर्माणि — (कृ — कर्) ॥

कौशलं *n* skill
एकदा *in* once
ग्रामान्तरं *n* another village
पथि *m* on the way
पार्श्वस्थितः *a. m* standing by side of
चूततरुः *m* mango tree
पक्वेलिमं *a. m.* ripe
अवर्तन्त *A* there were
स्पृहा *f* desire
परं *in* but
अशक्नोत् *P.* was able
दिष्ट्या *in* luckily
वानरः *m* monkey
प्रहर्षं गतः *a. m.* became-delighted
उपलः *m* stone
लक्ष्यीकृत्य *in* having aimed at
प्राक्षिपत् *P.* threw
अवचित्य *in* having plucked
सहर्षं *in* delightfully

अहो—*in* how great or wonderful
वृद्धः *m* old man.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

चतुर्विंशः पाठः ॥ २४ ॥

श्रीविनायकः

प्रतिदिनम् । प्रत्यहम् । अविघ्नम् । निर्विघ्नम् ।

यद्यपि .... तथापि

अयं कः ? अयं श्रीविनायकः । अस्य पिता कः ? अस्य पिता श्रीपरमेश्वरः । अस्य माता का ? अस्य माता श्रीपार्वती । अस्य भ्राता श्रीसुब्रह्मण्यः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पश्य! विनायकस्य शरीरं नरस्येव आननं गजस्येव च वर्तते अतोऽयं 'गजाननः' इति नाम भजते। यद्यप्यस्य आननं गजस्येव वर्तते तथाप्यस्य दन्त एक एव। गजस्य तु द्वौ दन्तौ स्तः। गजस्येवास्य मुखे शुण्डा विद्यते॥

विनायको विघ्नानां राजा। अतो विद्यारम्भकाले बालास्तं नमन्ति। तथा नम्यमानः स विघ्नान् अपोहति। गोविन्दः प्रतिदिनं विनायकं पूजयति। तेन स निर्विघ्नं सर्वाणि कार्याणि साधयति। त्वमपि प्रत्यहं विनायकं पूजय। तवापि सर्वस्मिन् कर्मण्यविघ्नं भविष्यति। अत एव सर्वेऽपि—

वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा॥

—इति प्रार्थयन्ते॥

क) प्रश्नाः—

१. विनायकस्य शरीरम् आननं च कथं वर्तते? २. अतोऽयं कीदृशं नाम भजते? ३. कस्य दन्त एक एव, कस्य द्वौ दन्तौ स्तः? ४. कस्येवास्य मुखे शुण्डा वर्तते? ५. अयं केषां राजा? ६. विद्यारम्भकाले बालाः किं कुर्वन्ति? ७. तथा नम्यमानः स किं करोति? १०. विनायकस्य पूजने किं भविष्यति? ११. प्रत्यहं जनाः कथं प्रार्थयन्ते?

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ख) उचितैः पदैः वाक्यानि पूरयत—

१ शुकाः पक्वानि फलानि शालिं — च भक्षयन्ति।
२ गोपालः सहपाठिभिः — उद्यानमगच्छत्।
३ नरः नारी वा विद्यया — न शोभते।
४ आतपः कठोरः चन्द्रिका — शीतला मनोहरा च।
५ राघवः अतीव बुद्धिमान् बालकः — अलसः।

ग) एषां पदानाम् एकवचनं वदत।

केचित् वानराः फलानि खादन्तः स्थिताः।

घ) संख्याशब्दाः 20 to 30—

२० विंशतिः।	२३ त्रयोविंशतिः।	२६ षड्विंशतिः।
२१ एकविंशतिः।	२४ चतुर्विंशतिः।	२७ सप्तविंशतिः।
२२ द्वाविंशतिः।	२५ पञ्चविंशतिः।	२८ अष्टाविंशतिः।
२९ नवविंशतिः or एकोनत्रिंशत्।	३० त्रिंशत्॥	

छ) पदच्छेदं कुरुत (split)

१ कर्मण्यविघ्नम् २ अतोऽयम् ३ तान्यादाय ४ सर्वेऽपि

प्रतिदिनं-प्रत्यहं *in* daily
अविघ्नं, निर्विघ्नं *in* without [obstacle
तथापि *in* still
विघ्नः *m* obstacle
यद्यपि *in* though
परमेश्वरः *m* The Supreme Lord.
शुण्डा *f* the trunk of an elephant
नमन्ति *P.* salute
अपोहति *P.* removes
पूजयति *P.* worships
साधयति *P.* accomplishes

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पञ्चविंशः पाठः ॥ २५ ॥



सुबुद्धिः दुर्बुद्धिश्च

मित्रम् । कतिपयानि । अत्रान्तरे । अनादृत्य ।

आस्तां कस्मिंश्चिदग्रहारे द्वौ सखायौ । तयोरेकः सुबुद्धिः, अन्यो दुर्बुद्धिश्चासीत् । तौ कदाचित् सायं किञ्चिदुद्यानमगच्छताम् । तत्र बालवृक्षेषु रुचिराणि फलान्यासन् । तानि दृष्ट्वा दुर्बुद्धिरवदत्—'मित्र ! कतिपयानि फलानि गृहीत्वा, गृहं नयावः'—इति ॥

तदा सुबुद्धिरकथयत्—'सखे ! मैवं कुरु । उद्यानपालः आवां दण्डयेत्'—इति । तस्य वचनमनादृत्य दुर्बुद्धिः पञ्चषाणि फलान्यवचित्य सुबुद्धेः हस्तेऽर्पितवान् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अत्रान्तरे तस्योद्यानस्य पालकः समेत्य तावभर्त्सयत। भीतो दुर्बुद्धिरवदत्—'आर्य न मया पातितान्येतानि फलानि। किन्तु अनेन मम सख्या पातितानि। नाहमपराधी' इति। तच्छ्रुत्वा उद्यानपालः सुबुद्धिमताडयत्॥ तस्मात्—

'दुर्जनैः सह मैत्री न कर्तव्या'॥

क) प्रश्नाः—

What is the Moral of the Lesson?

१. द्वौ सखायौ कुत्र आस्ताम्? २. तौ कीदृशः? ३. तौ कदाचित् कदा कुत्र अगच्छताम्? ४. कुत्र केषु रुचिराणि फलान्यासन्? ५. तानि दृष्ट्वा दुर्बुद्धिः किमवदत्? ६. तदा सुबुद्धिः किमकथयत्? ७. तस्य वचनमानदृत्य दुर्बुद्धिः किमकरोत्? ८. अत्रान्तरे कः तावभर्त्सयत? ९. भीतो दुर्बुद्धिः किमवदत्? १०. तच्छ्रुत्वा उद्यानपालः किमकरोत्? ११. कैः सह मैत्री न कर्तव्या? कुतः?

ख) 'आहत्य, इति, अतीव, एवम्' एतैः यथायोगं वाक्यानि पूरयत—१ अद्य उपाध्यायः नागच्छति—रामः अवदत्।

२ अस्यां शाखायाम्—अष्ट फलानि विद्यन्ते।

३ मे माता—मामकथयत्।

४ इदं कुसुमम्—मनोहरं वर्तते॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ग) उचितैः क्रियारूपैः वाक्यानि पूरयत—

१ केचित् बालाः ह्यः पाठं न — (पठ्)।

२ अहं श्वः पाठालयं न — (गम्)।

३ सन्तो बालाः यथाकालं स्वीयानि कर्माणि — (कृ)।

४ ह्यः सूर्यः मेघैः आवृतः न — (प्रकाश्)।

घ) 'रभ्' धातोः (आत्मनेपदी) 'विधिलिङ्' रूपाणि—

प्र. पु. ईत	ईयाताम्	ईरन्	e.g. रभेत	रभेयातां	रभेरन्
म. पु. ईथाः	ईयाथाम्	ईध्वम्	रभेथाः	रभेयाथां	रभेध्वम्
उ. पु. ईय	ईवहि	ईमहि	रभेय	रभेवहि	रभेमहि

ङ) पठत (1) च + आसीत् = चासीत् (2) न + अहम् = नाहम्॥

च) संख्याशब्दाः—

४० चत्वारिंशत्	६० षष्टिः।	८० अशीतिः।
५० पञ्चाशत्।	७० सप्ततिः।	९० नवतिः।
१०० शतम्।		१००,००० लक्षम्।
१,००० सहस्रम्।		१,०००,००० प्रयुतम्।
१०,००० अयुतम्।		१०,०००,००० कोटिः।

मित्रं *n.* a friend
कतिपय *a. n.* a few
अत्रान्तरे *in.* meanwhile
अनादृत्य *in.* having disregarded
कदाचित् *in.* once

बालवृक्षः *m* young tree
उद्यानपालः gardener
पञ्चषाणि *a. n.* five or six
आर्य ! *m* Sir
मैत्री *f* friendship

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

षड्विंशः पाठः ॥ २६ ॥



चैत्रो मैत्रश्च

तथापि। ततः प्रभृति। स्वयमेव। सद्य एव।

आचार्यरामतीर्थस्य चैत्रो मैत्रश्चेति द्वौ शिष्यौ आस्ताम्। तौ गुरोः गृहस्य समीपे द्वयोः कोष्ठयोः न्यवसताम्।

एकदा गुरुः तयोः बुद्धिचातुर्यपरीक्षार्थं ताभ्यामेकैकं रूप्यकं दत्त्वा अकथयत्—'इदमत्यल्पं धनम्। तथापि येन युवयोः कोष्ठौ पूर्येयातां तादृशं किमपि वस्तु क्रीत्वा आनयतम्'—इति॥

चैत्रः सद्य एव कस्यापि कृषीवलस्य गृहं गत्वा तेन धनेन पलालं क्रीतवान्। ततः स स्वयमेव तदानीय तेन

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कोष्ठं पूरयित्वा गुरवे न्यवेदयत्—'आर्य! पूरितोऽयं कोष्ठः'—इति। गुरुः सविषादम्, त्वया न साधु कृतम् इत्यवदत्॥

मैत्रः विपणिं गत्वा दीपमेकम् आनयत्। स तं प्रज्वाल्य कोष्ठे निधाय गुरवे न्यवेदयत्—'आर्य! पूरितोऽयं कोष्ठः'—इति। गुरुः सहर्षं शिरः कम्पयन्, साधु कृतम्, इत्यभ्यनन्दत्। ततः प्रभृति उपाध्यायस्य मैत्रे प्रीतिरवर्धत। पश्यत! मैत्रस्य बुद्धिचातुर्यम्॥

क) प्रश्नाः—

१. चैत्रो मैत्रश्च कस्य शिष्यौ? २. तौ कुत्र न्यवसताम्? ३. गुरुः तयोः परीक्षार्थं किमकरोत्? ४. चैत्रः कुत्र गत्वा किं क्रीतवान्? ५. स किं कृत्वा गुरवे किं न्यवेदयत्? ६. चैत्रस्य प्रवृत्तिं दृष्ट्वा गुरोः किम् अभवत्? ७. मैत्रः कुत्र गत्वा दीपमानयत्? ८. स किं कृत्वा गुरवे किं न्यवेदयत्? ९. गुरुः सहर्षं शिरः कम्पयन् किमवदत्? १०. ततः प्रभृति गुरोः कस्मिन् प्रीतिरवर्धत?

ख) Words of similar meaning.

आचार्यः, गुरुः, उपाध्यायः *m* teacher.

समानशब्दाः—कीदृशः, तादृशः, ईदृशः, एतादृशः, मादृशः, त्वादृशः, अस्मादृशः, युष्मादृशः, भवादृशः॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ग) 'कतिपय' शब्दस्य रूपैः वाक्यानि पूरयत—

Note :—'कतिपय' शब्दस्य, 'सर्व' शब्दवत् रूपाणि।

१ अस्मिन् उद्याने — वृक्षाः फलैः पूर्णा शोभन्ते।

२ अहं गृहं गच्छन् तटाके — मण्डूकान् अपश्यम्।

३ अस्मिन् वृक्षे — फलानि पक्वानि वर्तते।

४ — सहपाठिनः अस्मिन् भवने निवसन्ति।

५ अत्र — तरुषु पक्षिणः वासं कुर्वन्ति॥

घ) गत्वा, क्रीत्वा, पूरयित्वा—इमानि 'क्त्वा' प्रत्ययान्तानि अव्ययानि॥

ङ) अस्मिभन् पाठे ल्यबन्तानि अव्ययानि वदत॥

च) Split : 1. कस्यापि 2. पूरितोऽयं 3. हस्तेऽर्पितवान्।

तथापि *in* even then
ततः प्रभृति *in* since then
स्वयमेव *in* oneself
सद्य एव *in.* immediately
न्यवसतां *P.* (they two) [dwelt
कोष्ठः *m.* room
पूर्येयातां (they two) will be filled
तादृशं *a. n.* such like
क्रीत्वा *in* having bought
पलाल *m. n.* straw
निवेद्य *in* having [informed
सविषादं *in* sadly
कम्पयन् *a. m.* shaking
अवर्धत *P.* increased.
अभ्यनन्दत् *P.* praised, [approved
पश्यत *P.* look at

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सप्तविंशः पाठः ॥ २७ ॥



कुक्कुटः

उच्चैः। तारम्। प्रातस्तराम्। पूर्वम्।

चित्रेऽस्मिन् एकः कुक्कुटः द्वे कुक्कुट्यौ केचन शावकाश्च सन्ति। कुक्कुटस्य शिरसि ताम्रा चूडा वर्तते। तस्य वर्णश्चित्रो रम्यश्च। कुक्कुट्या वर्णस्तु धूसरः। तस्याः शिरसि ताम्रा चूडा न विद्यते। ते शावकाः सर्वदैव मात्रा सह पर्यटन्ति॥

कुक्कुटाः प्राधान्येन धान्यकणान् भक्षयन्ति। ते पादाभ्याम् अवकरान् विकिरन्तो भक्ष्यम् अन्विष्यन्ति, चञ्चवा चोद्धरन्ति॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कुक्कुटाः प्रत्यहं प्रातस्तरां प्रबुध्यन्ते। उच्चैः क्रोशन्तः ते प्रत्यूषे सर्वान् प्राणिनः प्रबोधयन्ति। 'उत्तिष्ठत जनाः, अलं निद्रया, प्रभाता रजनिः, चक्षुरुन्मीलयत, कवाटमुद्घाटयत सूर्योदयात् पूर्वं शय्यां त्यजत' इति वदन्त इव तारं रटन्ति॥

कुक्कुटानां शब्दं श्रुत्वा केचिज्जनाः शयनादुत्थाय स्वीयेषु कर्मसु प्रवर्तन्ते। कुक्कुटाः रात्रौ य मे यामे विरुवन्तो वेलां बोधयन्ति॥

क) प्रश्नाः—

१) चित्रेऽस्मिन् के सन्ति? २. कुक्कुटस्य शिरसि किं वर्तते? ३. तस्य वर्णः कीदृशः? ४. कुक्कुट्या वर्णः कीदृशः? ५. तस्याः शिरसि का न विद्यते? ६. ते शावकाः कदा कया सह पर्यटन्ति? ७. कुक्कुटाः प्राधान्येन कान् भक्षयन्ति? ८. ते कथं भक्ष्यमन्विष्यन्ति कया चोद्धरन्ति? ९. कुक्कुटाः प्रत्यहं कदा प्रबुध्यन्ते? १०. किं कुर्वन्तः कान् प्रबोधयन्ति? ११. किं वदन्त इव तारं रटन्ति? १२. तेषां शब्दं श्रुत्वा के किं कुर्वन्ति? १३. कुक्कुटाः किं कुर्वन्तः वेलां बोधयन्ति?

ख) तथापि, प्रभृति, प्रायेण, अत्रान्तरे, स्वयमेव—एतैः यथायोगं वाक्यानि पूरयत—

१ — सर्वे वृक्षाः वसन्तमासे पुष्प्यन्ति।

२ द्वौ बालौ कलहं कर्तुमारभेताम्, — उपाध्यायः आगच्छत्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३ धेनवः केवलं तृणानि भक्षयन्ति, — मधुरं क्षीरं यच्छन्ति च।

४ बाल्यात् — अहं तव मित्रमस्मि।

५ अजाः — प्रचाराय गच्छन्ति प्रत्यागच्छन्ति च ॥

ग) 'उद्धर्, उन्मील्. उत्तिष्ठ'—एतेषां लङि रूपाणि वदत ॥

घ) अस्मिन् पाठे शतृप्रत्ययान्तान् वदत।

ङ) संख्येयशब्दाः—(Ordinals) (प्रथमैकवचने रूपाणि)—

पुंसि	— प्रथमः	द्वितीयः	तृतीयः	चतुर्थः
स्त्रियाम्	— प्रथमा	द्वितीया	तृतीया	चतुर्थी
क्लीबे	— प्रथमं	द्वितीयं	तृतीयं	चतुर्थं

कुक्कुटः *m* cock
उच्चैः तारं *in* loudly
प्रातस्तरां *in* early in the morning
पूर्वं *in* before
कुक्कुटी *f* hen
शावकाः *m* young ones
ताम्रा *a. f.* red
चूडा *f* crest
रम्यः *a. m.* charming
धूसरः *a. m.* grey
पर्यटन्ति *P.* go about
अवकरः *m* sweeping
अन्विष्यन्ति *P.* search for
उद्धरन्ति *P.* pick up
प्रबुध्यन्ते *a.* get up
प्रभाता *f* became clear
रजनिः *f* night
प्रत्यूष *m. n.* dawn
चक्षुः *n* an eye
उन्मीलयत *P.* (you) open
कवाटः *m* a door
यामः *m* one eighth part of a day
वेला *f* time
बोधयन्ति *P.* inform.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अष्टाविंशः पाठः ॥ २८ ॥

मेषपालः

यूथम्। ऊर्णा। प्रातिवेशिकः। कितवः। मृषा।
सम्प्रति। अन्येद्युः। पूर्वेद्युः। न केवलं—किन्तु।

इह पश्य! मेषाणामजानां च यूथं गच्छति। यूथस्य पृष्ठतो गच्छन् पुरुषो मेषपालः। स मेषान् अजांश्च प्रचाराय वनं नयति। ते तत्र स्वेच्छया चरन्तः उदरं पूरयन्ति। न केवलं तृणान्येव किन्तु पर्णान्यपि ते भक्षयन्ति।

अयं मेषपालोऽजानां क्षीरेण मेषाणामूर्णया च स्वकुटुम्बं भरति। अजानां क्षीरं महदौषधम्। मेषाणामूर्णाभिः शैत्यरक्षणाय कम्बलाः सम्मानार्हाणि रम्याणि वस्त्राणि च क्रियन्ते। अतोऽजाः मेषाश्चात्यन्तमुपयुक्ताः प्राणिनः॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मेषपालोऽयं स्वस्य पुत्रं मेषैः सह वनं प्रेषयन्नासीत्। वनं गतः स चपलो बालक एकस्मिन् दिने विनोदाय 'व्याघ्रो-व्याघ्रः' इत्युच्चैराक्रोशत्। तदा प्रातिवेशिका जनाः शस्त्राण्यादाय तस्य समीपमधावन्। तत्र व्याघ्रो नासीत्। तान् समागतान् वीक्ष्य स बालोऽहसत्। 'कितवोऽयं असत्यवादी बालकः' इति वदन्तस्ते रोषेण प्रत्यगच्छन्॥

अथान्येद्युः सत्यमेव व्याघ्रः समायातः। तं दृष्ट्वा भीतो बालकः 'व्याघ्रो-व्याघ्रः' इत्याक्रोशत्। अयं पूर्वेद्युरिव मृषाऽऽक्रोशतीति मत्वा न कश्चित् तत्र गतः। व्याघ्रौ बालकस्य कर्णौ नासिकां च अभक्षयत्। तया वेदनया पीड्यमानः स गृह एवास्ते। तस्मादयं मेषपालः स्वयमेव सम्प्रति तान् वनं नयति।

अनृतवादिनः सत्यमपि वचनं जनाः असत्यं मन्यन्ते। तस्मात् विनोदार्थमपि असत्यं न वक्तव्यम्। किन्तु सर्वदा सत्यमेव वक्तव्यम्। तथा च उक्तम्—

'सत्यं वद। धर्मं चर' इति॥

क) प्रश्नाः—

१. इह केषां यूथं गच्छति? २. कः मेषपालः? ३. स किं करोति? ४. ते तत्र किं कुर्वन्ति? ५. किं ते भक्षयन्ति?

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

६. मेषपालः स्वकुटुम्बं कथं भरति ? ७. कस्मात् कारणात् अजाः मेषाश्च अत्यन्तम् उपयुक्ताः प्राणिनः ? ८. मेषपालोऽयं कं कैः सह कुत्र प्रेषयन् आसीत् ? ९. वनं गतः स चपलः किमकरोत् ? १०. कदा के किमादाय तस्य समीपमधावन् ? ११. तत्र समागतान् वीक्ष्य स बालः किमकरोत् ? १२. किं वदन्तस्ते रोषेण प्रत्यगच्छन् ? १३. अन्येद्युः किं समभवत् ? १४. तदा बालकः किमकरोत् ? १५. कुतः स गृह एवास्ते ? १६. कुतः असत्यं कदाऽपि न वक्तव्यम् ? १७. अस्मिन् पाठे उपदेशाः के ?

ख) मृषा, मिथ्या, नक्तं, दिवा—एतान्युपयुज्य वाक्यानि रचयत

ग) संख्येयशब्दाः—पञ्चमः षष्ठः सप्तमः अष्टमः नवमः दशमः एकादशः द्वादशः

मेषपालः *m* shepherd
ऊर्णा *f* wool
यूथम् *n* herd
प्रातिवेशिकः *m* neighbour
कितवः *m* rogue
संप्रति *in* now
अन्येद्युः *in* next day
पूर्वेद्युः *in* previous day
मृषा *in* falsehood
मेषः *m* sheep
पृष्ठतः *in* behind
प्रचारः *m* pasturing
स्वेच्छा *f* self-will
चपलः *a. m.* fickle
आक्रोशत् *P.* cried out
अधावत् *P.* ran up
अहसत् *P.* laughed
वेदना *f* pain
आस्ते *A.* stays.

न केवलं किन्तु *in* not only but also.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ऐकोनत्रिंशः पाठः ॥ २९ ॥

सत्यं जयति नानृतम्

ज्यायसी। कनीयसी। तदीयः। मदीयः। यदि—तर्हि।

आसीत् पुरा सुवर्णपुरे धनवान् कश्चित् वैश्यः। तस्य द्वे भार्ये आस्ताम्। तयोर्ज्यायसी वन्ध्या। कनीयसी तु पुत्रमेकं प्रासूत। ते द्वे अपि तं बालं स्नेहेनापोषयताम्॥

अथ कियताऽपि कालेन स वैश्यः कालधर्मं गतः। तस्य सर्वमपि धनं पुत्रिणीं कनीयसीं गच्छति। ज्यायसी तु तन्नासहत। अतः सा व्यचिन्तयत्—'यदि शिशुमिमं मदीयं कथयिष्यामि तर्हि महदिदं भर्तुर्धनं मामेष्यति'—इति। एवं विचिन्त्य सा बालकमादाय प्रतस्थे। कनीयसी तां वारयति स्म॥

ततः कलहायमाने ते न्यायाधिपमगच्छताम्। उभे अपि तस्याग्रे 'ममायं शिशुः, ममायं शिशुः, इत्यवदताम्। न्यायाधिपो विवादस्य रहस्यं ज्ञातुम् इच्छन् स्वभृत्यमकथयत्—'यद्युभयोरयं शिशुस्तर्हि तं छित्त्वा समं विभज्य उभाभ्यां यच्छ'—इति॥

तच्छ्रुत्वा ज्यायसी—'साधु स्वामिन् साधु! एवं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

क्रियताम्'—इत्युच्चैरवोचत्। कनीयसी तु व्याकुला भूत्वा

जगाद—'स्वामिन्! तदीय एवायं बालो न मदीयः। तस्मात् सजीवोऽयं तस्यै दीयताम्'—इति॥

न्यायाधिपस्तदाकर्ण्य स्मयमानः कनीयसीमेव

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शिशोर्जननीं निश्चित्य तस्यै शिशुमदापयत्। ज्यायसी तु जनैरुपहस्यमाना प्रत्यगच्छत्॥ अतः—

'सत्यं जयति नानृतम्' *इति जना वदन्ति॥

*This is the second पाद of sloka 24 on Page 90.

क) प्रश्नाः—

१. कुत्र आसीत् धनवान् कश्चित् वैश्यः? २. तस्य के आस्ताम्? ३. तयोः का वन्ध्या? ४. का पुत्रमेकं प्रासूत? ५. ते तं बालं कथमपोषयताम्? ६. कः कदा कालधर्मं गतः? ७. तस्य सर्वमपि धनं कां गच्छति? कुतः? ८. का तन्नासहत? ९. अतः सा किमचिन्तयत्? १०. एवं विचिन्त्य सा किमकरोत्? ११. तदा कनीयसी किं चकार? १२. ततः कलहायमाने ते किमकुरुताम्? १३. उभे अपि कस्याग्रे किमवदताम्? १४. न्यायाधिपः कं किमकथयत्? १५. तच्छ्रुत्वा ज्यायसी किमुच्चैरवोचत्? १६. कनीयसी तु व्याकुला भूत्वा किं जगाद? १७. न्यायाधिपः किमकरोत्? १८. का कैरुपहस्यमाना प्रत्यगच्छत्? १९. अस्मिन् पाठे उपदेशः कः?

ख) पठत—शिशोः + जननी = शिशोर्जननी। २. पूर्वेद्युः + इव = पूर्वेद्युरिव। ३. प्रीतिः + अवर्धत = प्रीतिरवर्धत।

ग) न केवलं — किन्तु, यदि — तर्हि, यद्यपि — तथापि, एतैः यथायोगं वाक्यानि पूरयत—

१ — स बुद्धिमान् — उद्यमी च।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२ रामः — बुद्धिमान् — अलसः ।

३ — सम्यक् पठिष्यसि — श्रेयः प्राप्स्यसि ॥

घ) समानशब्दाः—(Similar words)

किमीयः, मदीयः, अस्मदीयः, त्वदीयः युष्मदीयः,
तदीयः, एतदीयः, इदमीयः, अदसीयः, भवदीयः ॥

सत्यं *a.* honesty
जयति *P.* becomes victorious
ज्यायसी *f* elder
कनीयसी *f* younger
तदीयः *a. m.* his, hers, or its
मदीयः *a. m.* mine
यदि तर्हि *in.* if so
वन्ध्या *f* barren woman
प्रासूत *A* gave birth to
अपोषयतां *P.* they two nourished
कालधर्मः *m.* death
पुत्रिणी *a. f.* having a son
असहत *A.* endured
जननी *f.* mother
विचिन्त्य *in.* having thought
एष्यति *P* will come
वारयति स्म *P.* obstructed
न्यायाधिपः *m.* Judge
विवादः *m.* dispute
ज्ञातुम् इच्छन् *a. m.* desiring to know
व्याकुला *a. f.* perplexed
सजीव *a. m.* alive
स्मयमान *a. m.* smiling
उपहस्यमाना *a f.* being laughed at
अनृतम् *n.* falsehood
जगाद *P.* said

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

त्रिंशः पाठः ॥ ३० ॥

उपदेशमाला

(Collection of Instructive Verses)

नभसो भूषणं चन्द्रो
नारीणां भूषणं पतिः ।
पृथिव्या भूषणं राजा
विद्या सर्वस्य भूषणम् ॥ १

माता शत्रुः पिता वैरी
येन बालो न पाठितः ।
न शोभते सभामध्ये
हंसमध्ये बको यथा ॥ २

क) प्रश्नाः—

१. सर्वस्य भूषणम् किम् ? २. कः सभामध्ये न शोभते ?

ख) निर्दिष्टैः पदैः वाक्यानि पूरयत—

१. सुशीला नारी गृहस्य — (भूषण) ।
२. सुपुत्रः कुलस्य — (आभरण) ।
३. सुशिष्यः गुरोः प्रीतेः — (पात्र) ॥

१. **नारी** *f* a lady
पृथिवी *f* earth
२. **पाठितः** *a.m.* was taught
सभा *f* assembly
हंसमध्ये *n.* midst of swans
बकः *m.* a crane

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पुस्तकस्था च या विद्या
परहस्ते च यद्धनम् ।
कार्यकाले समायाते
न सा विद्या न तद्धनम् ॥ ३

सुखार्थी चेत् त्यजेद्विद्यां
विद्यार्थी चेत् त्यजेत् सुखम् ।
सुखार्थिनः कुतो विद्या
कुतो विद्यार्थिनः सुखम् ॥ ४

क) प्रश्नाः—३. का न विद्या, किं न धनम् ?
४. विद्यार्थी सुखार्थी च किं किं त्यजेताम् ?

ख) प्रयोगः त्रिविधः (Three kinds of Voices)—

१ कर्तरिप्रयोगः
Active Voice
i (सकर्मकः) { नम् + अ + ति = नमति ।
Example पुत्रः पितरं नमति ॥

ii (अकर्मकः) { जि (जय्) + अ + ति = जयति
Example धर्मः जयति ॥

२ कर्मणि प्रयोगः*
Passive Voice { नम् + य + ते = नम्यते ॥
Example पुत्रेण पिता नम्यते ॥

३ भावे प्रयोगः
Impersonal Voice { जि + य + ते = जीयते ॥
Example धर्मेण जीयते ।

Note: *In कर्मणि प्रयोग the subject takes तृतीया and the object takes प्रथमा - Verb must agree to the object in number and person.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

क्षणशः कणशश्चैव
विद्यामर्थं च साधयेत् ।
क्षणत्यागे कुतो विद्या
कणत्यागे कुतो धनम् ॥ ५

आचार्यात् पादमादत्ते
पादं शिष्यः स्वमेधया ।
पादं सब्रह्मचारिभ्यः
पादं कालक्रमेण च ॥ ६

स्वगृहे पूज्यते मूर्खः स्वग्रामे पूज्यते प्रभुः ।
स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते ॥ ७

क) प्रश्नाः—

५. विद्यामर्थं च कथं साधयेत् ? ६. विद्यां शिष्यः कथमादत्ते ?
७. के के कुत्र पूज्यन्ते ?

ख) कर्मणि प्रयोगं दर्शयत—

१. नराः देवं पूजयन्ति । २. अहं श्लोकान् पठामि ॥

१. समायातः *m. a.* at hand
४. त्यजेत् should give up
क्षणशः *in* moment by moment
कणशः *in* bit by bit
अर्थः *m.* wealth
साधयेत् *P.* should acquire
६. पादः *m.* one fourth
आदत्ते *A.* receives
सब्रह्मचारी *m. a.* classmate
मेधा *f.* intellect
कालक्रमेण *m. in* course of [time

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

जनिता चोपनेता च यश्च विद्यां प्रयच्छति ।
अन्नदाता भयत्राता पञ्चैते पितरः स्मृताः ॥ ८

गुरुपत्नी राजपत्नी ज्येष्ठपत्नी तथैव च ।
पत्नीमाता स्वमाता च पञ्चैता मातरः स्मृताः ॥ ९

सत्यं माता पिता ज्ञानं धर्मो भ्राता दया सखा ।
शान्तिः पत्नीः क्षमा पुत्रः षडेते मम बान्धवाः ॥ १०

क) प्रश्नाः—८. पञ्च पितरः के ? ९. पञ्च मातरः काः ?
१०. षड् बान्धवाः के ?

ख) Split the words of the above slokas.

ग) कर्मणि प्रयोगं दर्शयत—

१. गावः क्षीरं यच्छन्ति । ५. बालाः वृक्षम् आरोहन्ति ।
२. पिता पुत्रं पश्यति । ६. शिष्याः गुरून् वन्दन्ते ।
३. कुम्भकारः कुम्भान् करोति । ७. वयं क्षीरं पिबामः ।
४. मेषपालः मेषान् नयति । ८. त्वं पितरौ नमसि ॥

७. **स्वगृहं** *n* one's own house
पूज्यते *A.* is worshipped
प्रभुः *m.* rich
८. **उपनेता** *m* a spiritual [father
स्मृताः *a. m.* are regarded
९. **ज्येष्ठपत्नी** *f* elder brother's wife
पत्नीमाता *f* wife's mother
१० **धर्मः** *m* virtue
शान्तिः *f* peace
क्षमा *f* patience

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

खलः करोति दुर्वृत्तं नूनं फलति साधुषु ।
दशाननोऽहरत् सीतां बन्धनं तु महोदधेः ॥ ११

सर्पदुर्जनयोर्मध्ये वरं सर्पो न दुर्जनः ।
सर्पो दशति कालेन दुर्जनस्तु पदे पदे ॥ १२

यथा परोपकारेषु नित्यं जागर्ति सज्जनः ।
तथा परापकारेषु नित्यं जागर्ति दुर्जनः ॥ १३

त्यज दुर्जनसंसर्गं भज साधुसमागमम् ।
कुरु पुण्यमहोरात्रं स्मर नित्यमनित्यताम् ॥ १४

क) प्रश्नाः—११. खलस्य दुर्वृत्तं कुत्र फलति? अत्र उदाहरणं किम्?

१२. सर्पदुर्जनयोर्मध्ये कः वरम्?

१३. सज्जनः केषु जागर्ति? दुर्जनः केषु जागर्ति?

१४. चतुर्दशः श्लोकः किमुपदिशति?

११. **खलः** *m* wicked
दुर्वृत्त *n* an evil deed
दशाननः *m* the ten-faced (रावण)
अहरत् *P.* took away
बन्धनं *n* bondage
महोदधिः *m* an ocean

१२. **वरं** *in* Preferable to
दशति *P.* bites

१३. **परोपकारः** *m.* doing service to others
परापकारः doing harm to others
जागर्ति *P.* is awake

१४. **संसर्गः** *m* / **समागमः** } association
अहोरात्रं *n* day and night
अनित्यता *f* instability

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

श्लोकार्धेन प्रवक्ष्यामि यदुक्तं ग्रन्थकोटिषु ।
परोपकारः पुण्याय पापाय परपीडनम् ॥ १५

रविश्चन्द्रो घना वृक्षाः नदी गावश्च सज्जनाः ।
एते परोपकाराय भुवि दैवेन निर्मिताः ॥ १६

उद्यमः साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः ।
षडेते यत्र वर्तन्ते तत्र दैवं प्रसीदति ॥ १७

क) प्रश्नाः—१५. यत् ग्रन्थकोटिषु उक्तं तत् श्लोकार्धेन कथय ।

१६. के परोपकाराय भुवि दैवेन निर्मिताः ?

१७. कुत्र दैवं प्रसीदति ?

ख) कर्मणि प्रयोगं दर्शयत—

१. यः विद्यामर्थयते स सुखं त्यजेत् ।
२. यो विदुषः सेवते स विद्यां लभते ।
३. या पतिमनुसरति तां मानयन्ति जनाः ।
४. निन्दितं कर्म न सज्जनः करोति ।

ग) Split the words in the slokas.

१५. श्लोकार्धं *m* half a verse
प्रवक्ष्यामि *P.* (I) shall tell
ग्रन्थकोटिषु *f* in crores of
१६. घनाः *m* clouds [works
गावः *f* cows
१७. उद्यमः *m* effort
साहसं *n* bravery
धैर्यं *n* courage
प्रसीदति *P.* is pleased

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

गच्छन् पिपीलिको याति योजनानां शतान्यपि ।
अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति ॥ १८
उद्योगः खलु कर्तव्यः फलं मार्जारवद्भवेत् ।
जन्मप्रभृति गौर्नास्ति पयः पिबति नित्यशः ॥ १९
एकस्य कर्म संवीक्ष्य करोत्यन्योऽपि गर्हितम् ।
गतानुगतिको लोको न लोकः पारमार्थिकः ॥ २०

क) प्रश्नाः—१८. कः योजनानां शतान्यपि याति ? कः पदमेकं न गच्छति ?

१९. कः पयः पिबति नित्यशः ?

२०. लोकः कीदृशः ?

ख) वरम्, नूनम्, यथा—एतैः यथायोगं वाक्यानि पूरयत—

१. मूर्खापेक्षया मृतः पुत्रः— ।
२. —सुखार्थिनो विद्यां न लभन्ते ।
३. —पिता तथा गुरुरपि पूज्यः ॥

१८. **पिपीलिकः** *m* an ant
योजनं *n* eight miles
वैनतेयः *m* गरुडः
पद *n* step

१९. **उद्योग** *m* effort [स्येव
मार्जारवत् *in* मार्जार-
जन्मप्रभृति *in* from the time of birth
पयः *n* milk
नित्यशः *in* daily

२०. **गर्हित** *a. n.* a blamable act
गतानुगतिकः *a. m.* doing as others do ; a blind follower
पारमार्थिकः *a. m.* caring for truth

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

गवादीनां पयोऽद्येद्युः सद्यो वा जायते दधि ।
क्षीरोदधेस्तु नाद्यापि महतां विकृतिः कुतः ॥ २१
सम्पदो महतामेव महतामेव चापदः ।
वर्धते क्षीयते चन्द्रो न तु तारागणः क्वचित् ॥ २२
कृषतो नास्ति दुर्भिक्षं जपतो नास्ति पातकम् ।
मौनिनः कलहो नास्ति न भयं चास्ति जाग्रतः ॥ २३

क) प्रश्नाः—

२१. 'महतां विकृतिः कुतः' किम् अत्र उदाहरणम् ?

२२. 'सम्पदो महतामेव महतामेव चापदः' कोऽत्र दृष्टान्तः ?

२३. कस्य दुर्भिक्षं नास्ति ? कस्य पातकं नास्ति ?
कस्य कलहो नास्ति ? कस्य भयं नास्ति ?

ख) भावे प्रयोगं दर्शयत—

१. सत्यं जयति। ३. भयं नास्ति।
२. ईश्वरः अस्ति। ४. चन्द्रः रात्रौ शोभते ॥

२१. **गवादि** *n* cows and **दधि** *n* curd [others
अद्यापि *in.* even now
विकृतिः *f* deviation from natural state
२२. **सम्पत्** *f* prosperity
आपत् *f.* adversity
२३. **दुर्भिक्षं** *n* scarcity of provisions
पातकं *n.* sin
मौनी *a. m.* the silent
जाग्रत् *a. m.* wakeful

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

धर्मो जयति नाधर्मः सत्यं जयति नानृतम् * ।
क्षमा जयति न क्रोधो देवो जयति नासुरः ॥ २४

आकाशात् पतितं तोयं यथा गच्छति सागरम् ।
सर्वदेवनमस्कारः केशवं प्रति गच्छति ॥ २५

* story on lesson 29.

क) प्रश्नाः—२४. के जयन्ति ? के न जयन्ति ?

२५. सर्वदेवनमस्कारः कं प्रति गच्छति ? कोऽत्र दृष्टान्तः ?

ख) विरुद्धपदानि (opposite words)

सुभिक्षम् × दुर्भिक्षम् ।	निद्राति × जागर्ति ।
सत्यम् × असत्यम् ।	वर्धते × क्षीयते ।
स्मरति × विस्मरति ।	त्यजति × भजति ।
देवः × असुरः ।	संपत् × विपत् ।
धर्मः × अधर्मः ।	उपकारः × अपकारः ।

ग) यथा-तथा, यत्र-तत्र, आभ्यां यथायोगं वाक्यानि पूरयत—

१. — धूमः — अग्निः । २. —राजा — प्रजाः ॥

२४. **जयति** *P.* is victorious | **तोयं** *n.* water
२५. **सागरः** *m.* ocean | **केशवः** *m.* Lord Vishnu.

—o—

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

C. Selected पर्याय Slokas from अमरकोश ॥

१. श्री गणेशः–नामानि—८

विनायको विघ्नराज द्वैमातुर गणाधिपाः ।
अप्येकदन्त हेरम्ब लम्बोदर गजाननाः ॥ १

२. श्री सुब्रह्मण्यः–नामानि—१३

कार्तिकेयो महासेनः शरजन्मा षडाननः ।
पार्वतीनन्दनः स्कन्दः सेनानीरग्निभूर्गुहः ॥ १
बाहुलेयस्तारकजित् विशाखः शिखिवाहनः ।
षाण्मातुरः शक्तिधरः कुमारः क्रौञ्चदारणः ॥ २

३. देवाः–नामानि—२६

अमरा निर्जरा देवाः त्रिदशा विबुधाः सुराः ।
सुपर्वाणः सुमनसः त्रिदिवेशा दिवौकसः ॥ १
आदितेया दिविषदः लेखा अदितिनन्दनाः ।
आदित्या ऋभवोऽस्वप्नाः अमर्त्या अमृतान्धसः ॥ २
बर्हिर्मुखाः ऋतुभुजः गीर्वाणा दानवारयः ।
बृन्दारका दैवतानि पुंसि वा देवताः स्त्रियाम् ॥ ३

४. ब्रह्मा–नामानि—१०

ब्रह्माऽत्मभूः सुरज्येष्ठः परमेष्ठी पितामहः ।
हिरण्यगर्भो लोकेशः स्वयंभूश्चतुराननः ॥ १

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

धाताऽब्जयोनिर्द्रुहिणः विरिञ्चिः कमलासनः ।
स्रष्टा प्रजापतिर्वेधाः विधाता विश्वसृड् विधिः ॥ २

५. श्रीमहाविष्णुः-नामानि—३९

विष्णुर्नारायणः कृष्णः वैकुण्ठो विष्टरश्रवाः ।
दामोदरो हृषीकेशः केशवो माधवः स्वभूः ॥ १

दैत्यारिः पुण्डरीकाक्षः गोविन्दो गरुडध्वजः ।
पीताम्बरोऽच्युतः शार्ङ्गी विष्वक्सेनो जनार्दनः ॥ २

उपेन्द्र इन्द्रावरजः चक्रपाणिश्चतुर्भुजः ।
पद्मनाभो मधुरिपुः वासुदेवस्त्रिविक्रमः ॥ ३

देवकीनन्दनः शौरिः श्रीपतिः पुरुषोत्तमः ।
वनमाली बलिध्वंसी कंसारातिरधोक्षजः ।
विश्वंभरः कैटभजित् विधेः श्रीवत्सलाञ्छनः ॥ ४

६. श्री शिवः-नामानि—४८

शंभुरीशः पशुपतिः शिवः शूली महेश्वरः ।
ईश्वरः शर्व ईशानः शङ्करश्चन्द्रशेखरः ॥ १

भूतेशः खण्डपरशुः गिरीशो गिरिशो मृडः ।
मृत्युञ्जयः कृत्तिवासाः पिनाकी प्रमथाधिपः ॥ २

उग्रः कपर्दी श्रीकण्ठः शितिकण्ठः कपालभृत् ।
वामदेवो महादेवः विरूपाक्षस्त्रिलोचनः ॥ ३

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कृशानुरेताः सर्वज्ञः धूर्जटिर्नीललोहितः ।
हरः स्मरहरो भर्गः त्र्यम्बकस्त्रिपुरान्तकः ॥ ४
गङ्गाधरोऽन्धकरिपुः क्रतुध्वंसी वृषध्वजः ।
व्योमकेशो भवो भीमः स्थाणू रुद्र उमापतिः ॥ ५

७. श्री बुद्धदेवः—नामानि — १८

सर्वज्ञः सुगतो बुद्धः धर्मराजस्तथागतः ।
समन्तभद्रो भगवान् मारजिल्लोकजिज्जिनः ॥ १
षडभिज्ञो दशबलोऽद्वयवादी विनायकः ।
मुनीन्द्रः श्रीघनः शास्ता मुनिः शाक्यमुनिस्तु यः ॥ २

८. इन्द्रः—नामानि — ३५

इन्द्रो मरुत्वान् मघवा बिडौजाः पाकशासनः ।
वृद्धश्रवाः शुनासीरः पुरुहूतः पुरन्दरः ॥ १
जिष्णुर्लेखर्षभः शक्रः शतमन्युर्दिवस्पतिः ।
सुत्रामा गोत्रभिद्वज्री वासवो वृत्रहा वृषा ॥ २
वास्तोष्पतिः सुरपतिः बलारातिः शचीपतिः ।
जम्भभेदी हरिहयः * स्वाराण्नमुचिसूदनः ॥ ३
संक्रन्दनो दुश्च्यवनः तुराषाण्मेघवाहनः ।
आखण्डलः सहस्राक्षः ऋभुक्षाः सुरनायकः ॥ ४

* स्वाराद्, नमुचिसूदनः— इति पदच्छेदः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

९. श्री महालक्ष्मीः–नामानि — १४

लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिया ।
इन्दिरा लोकमाता मा क्षीरोदतनया रमा ॥ १

भार्गवी लोकजननी क्षीरसागरकन्यका ॥ २

१०. श्रीपार्वती–नामानि — १७

उमा कात्यायनी गौरी काली हैमवतीश्वरी ।
शिवा भवानी रुद्राणी शर्वाणी सर्वमङ्गला ॥ १

अपर्णा पार्वती दुर्गा मृडानी चण्डिकाऽम्बिका ॥ २

११. कुबेरः १७ नामानि (Lord of Wealth)

कुबेरः त्र्यम्बकसखः यक्षराट् गुह्यकेश्वरः ।
मनुष्यधर्मा धनदः राजराजो धनाधिपः ॥ १

किंनरेशो वैश्रवणः पौलस्त्यो नरवाहनः ।
यक्षैकपिङ्गैलविलश्रीदपुण्यजनेश्वराः ॥ २

---

1 यक्ष, एकपिङ्ग, ऐलबिल, श्रीद, पुण्यजनेश्वर इति पदच्छेदः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१२. दिशां नामानि—५ (Directions)

दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः ।
१३-१४ पूर्वादिदिशां दिक्पालकानां च नामानि ॥

पूर्वाऽऽग्नेयी दक्षिणा च नैर्ऋती पश्चिमा तथा ।
वायवी चोत्तरैशानी दिशा अष्टाविमाः स्मृताः ॥ १

इन्द्रो वह्निः पितृपतिः नैर्ऋतो वरुणो मरुत् ।
कुबेर ईशः पतयः पूर्वादीनां दिशां क्रमात् ॥ २

Sans.	Eng.	God	Sans.	Eng.	God
1. पूर्वा	East	इन्द्र	5. पश्चिमा	West	वरुणः
2. आग्नेयी	South East	वह्निः	6. वायवी	North West	मरुत्
3. दक्षिणा	South	पितृपतिः	7. उत्तरा	North	कुबेरः
4. नैर्ऋतः	South-West	नैर्ऋतः	8. ईशानी	North-East	ईशः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

I. Tables to be studied By-Heart

1. 'इदम्' शब्दस्य नामपदैः सह प्रयोगः

पुंलिङ्ग	अयं गजः।	इमौ गजौ।	इमे गजाः।
स्त्रीलिङ्ग	इयं बाला।	इमे बाले।	इमाः बालाः।
नपुंसक	इदं फलम्।	इमे फले।	इमानि फलानि।

2. 'तद्' शब्दस्य नामपदैः सह प्रयोगः

पुं.	सः अजः।	तौ अजौ।	ते	अजाः।
स्त्री.	सा लता।	ते लते।	ताः	लताः।
नपुं.	तत् पुष्पम्।	ते पुष्पे।	तानि	पुष्पाणि।

3. 'एतद्' शब्दस्य नामपदैः सह प्रयोगः

पुं.	एषः हंसः।	एतौ हंसौ।	एते	हंसाः।
स्त्री.	एषा माला।	एते माले।	एताः	मालाः।
न.	एतत् पात्रम्।	एते पात्रे।	एतानि	पात्राणि।

4. 'तद्-युष्मद्' शब्दानां क्रियापदैः सह प्रयोगः

प्र. पु.	सः पाठं पठति।	तौ पाठं पठतः।	ते पाठं पठन्ति।
म. पु.	त्वं पाठं पठसि।	युवां पाठं पठथः।	यूयं पाठं पठथ।
उ. पु.	अहं पाठं पठामि।	आवां पाठं पठावः।	वयं पाठं पठामः।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

5. तदीय, मदीय, स्मयमान, वन्ध्य, गत, रम्य, निर्मित रुचिर, भीत, तादृश, श्रान्त, कृतविद्य इत्यादयः विशेष्यनिघ्नाः विशेषण शब्दाः i.e. following the Gender, Case, and Number of the Nouns. Example—

पु.	तदीयः	बालः।	तदीयौ बालौ।	तदीयाः बालाः।
स्त्री.	तदीया	बाला।	तदीये बाले।	तदीयाः बालाः।
न. पुं.	तदीयं	मित्रं।	तदीये मित्रे।	तदीयानि मित्राणि।

6. लटि; लङि; लृटि; च धातूनां प्र. पु. एकवचने रूपाणि—

धातुः	लट्	लङ्	लृट्
1. भू (भव्)	भवति	अभवत्	भविष्यति
2. पठ्	पठति	अपठत्	पठिष्यति
3. गम् (गच्छ्)	गच्छति	अगच्छत्	गमिष्यति
4. दृश् (पश्य्)	पश्यति	अपश्यत्	द्रक्ष्यति
5. पा (पिब्)	पिबति	अपिबत्	पास्यति
6. स्था (तिष्ठ्)	तिष्ठति	अतिष्ठत्	स्थास्यति
7. कृ	करोति	अकरोत्	करिष्यति
8. लभ्	लभते	अलभत	लप्स्यते
9. वर्त्	वर्तते	अवर्तत	वर्तिष्यते
10. वन्द्	वन्दते	अवन्दत	वन्दिष्यते

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

II Present Participles. 'शतृ-शानच्, प्रत्ययौ'

i. 'शतृ' प्रत्ययाः (from आत्मनेपद roots)

Pr. Tense.	Pr. Parti.	Pr. Tense.	Pr. Parti.
1. भवति	— भवन्	5. पिबति	— पिबन्
2. तिष्ठति	— तिष्ठन्	6. धावति	— धावन्
3. गच्छति	— गच्छन्	7. क्रीडति	— क्रीडन्
4. पश्यति	— पश्यन्	8. करोति	— कुर्वन्

ii. शानच् प्रत्ययाः (from आत्मनेपद roots)

1. लभते	— लभमानः	4. वर्तते	— वर्तमानः
2. वन्दते	— वन्दमानः	5. जायते	— जायमानः
3. रभते	— रभमाणः	6. विद्यते	— विद्यमानः

1. Correct the following (शोधयत) giving reasons:—

(क) 1. अयं बाला। 4. ते पात्रम्। 7. इमे लताः।
2. तौ गजः। 5. इदम् अजः। 8. इमे पात्राणि।
3. एतत् लता। 6. ताः गजाः। 9. एतानि हंसाः।

(ख) 1. अहं पाठं पठसि। 5. यूयं बालां पश्यन्ति।
2. त्वं पाठं पठति। 6. तं हंसं पश्यति।
3. युवां पाठं पठति। 7. यूयं पुष्पं नयावः।
4. आवां पाठं पठतः। 8. अहम् अर्थं वदति।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

2. Give the opposite words (विपरीतपदानि वदत)—

1. गच्छति । 3. आरोहति 5. पूर्वम् ।
2. नयति । 4. उच्चैः । 6. सह ।

3. Give the grammatical peculiarity—

i. अहं कृष्णेन सह गृहं गत्वा लेखनीं आनयामि ।
ii. भद्र ! त्वं प्रतिदिनं लेखन्या पुस्तकेन च विना पाठालयं
iii. अलं तव कुतूहलेन । [आगच्छसि ।

4. What are the connected words of:—

1. यदा—— । 3. यत्र—— । 5. न केवलं—— ।
2. यद्यपि—— । 4. यदि—— । 6. यथा—— ।

(ग) Translate into English or mother tongue:—

i. 1. बालिकाः पुष्पाय उद्यानम् अगच्छन् ।
2. धनिकानां गृहं याचकाः गच्छन्ति ।
3. गानेन सर्वेषां जनानां सन्तोषः भवति ।
4. वीणायाः मधुरं स्वरं वयम् आकर्णयामः ।
5. कस्मात् नगरात् ते जनाः आगच्छन्ति ?
6. वृक्षस्य छायायां मुहूर्तं विश्रम्य अत्र आगच्छ ॥

ii. 1. श्रीरामः विश्वामित्रस्य यागम् अरक्षत् ।
2. मुनिः रामेण लक्ष्मणेन च सह मिथिलाम् अगच्छत् ।
3. मिथिलाधिपतेः सीता नाम एका कन्या आसीत् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

4. बहवः राजकुमाराः ताम् इच्छन्तः मिथिलापुरीम्
5. तेषाम् एकोऽपि शिवचापं न अनमयत्। [आगताः
6. श्रीरामः शिवधनुः नमयित्वा सीतां पर्यणयत् ॥

(ख) Translate into Sanskrit:—

i. 1. by (the) whip, 2. by order, 3. we follow- 4. with two shining wings, 5. from house, 6. from the bunch of flowers, 7. in this School, 8. without hen, 9. of (the) cow, 10. to calves. 11. They (two) converse, 12. yesterday, 13. the day after to-morrow, 14. to-morrow, 15. during day time.

ii. a. Stars shine well at night.
b. Father told his son a story.
c. Why did you abuse him?
d. This is my book! That is yours.

iii. a. O boys! Look here. There is a bee on this bunch of flowers.
b. We (two) started to bazaar.
c. Sri Rama, by command of his father, went to the forest with Lakshmana.
d. Farmers plough fields in the rainy season.

शुभं भूयात्। समस्तसन्मङ्गळानि सन्तु ॥
'जय विजयी भव'

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof: Marrozi, HONOLULU, U.S.A. writes :—

.....The Students here are making good use of the Copy Books and are very appreciative of them

No 1 Bold	Hand	स्थूललिपिः	60 P.
No 2 Medium	Hand	मध्यमलिपिः	60 P.
No 3 Small	Hand	सूक्ष्मलिपिः	60 P.

Useful Text Books for College Students

Text in Sanskrit with English Translation, Exhaustive Notes, Model Questions etc.-

By T. K. RAMACHANDRA IYAR, M.A.,B.O.L.,

BOOKS ON SANSKRIT PROSE

बालरामायणम् बाल-अयोध्या-आरण्य काण्डाः— Part I A Simple Prose Version of Valmiki Ramayana retaining the idioms of the original.	3 50
Do किष्किन्धा-सुन्दर-युद्धकाण्डाः—Part II	5 00
चन्द्रापीडचरितम्–The Story of Bana Bhatta's Kadambari Concisely written in his own words	5 00
English Translation & Notes on Harsha Charitha Sangraha-Uchvasas 4 & 5 (Without Text)	4 00

A Short History of Sanskrit Literature (covering the whole range of vedic, Sutra and classical Periods). 8 00

Exercises in Sanskrit Translation—with guidelines for Translation from Sans. to Eng. & vice versa In Press

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

USEFUL TEXT BOOKS FOR COLLEGE STUDENTS

Text in Sanskrit with English Translation, Exhaustive Notes, Model Questions etc.,

By T. K. RAMACHANDRA IYER M. A., B. O. L.,

BOOKS ON SANSKRIT POETRY

रघुवंशमहाकाव्यम्—		
(दिलीपस्य वसिष्ठाश्रमगमनं नाम प्रथमः सर्गः)	4	00
Do दिलीपस्य नन्दिनी वरप्रदानं नाम द्वितीयः सर्गः	2	00
Do रघुदिग्विजयो नाम चतुर्थः सर्गः	4	00
Do दण्डकाप्रत्यागमनं नाम त्रयोदशः सर्गः	5	00
नलोपाख्यानम् (श्रीमन्महाभारते वनपर्वणि अध्यायाः ५०—५४ Damayanti Svayamvaram) 2nd Edition		00
शिशुपालवधे मन्त्रवर्णनं नाम द्वितीयः सर्गः	5	00
किरातार्जुनीयम्—व्यवसायदीपनो नाम प्रथमः सर्गः	5	00
कुमारसंभवे उमापरिणयो नाम सप्तमः सर्गः	5	00
श्रीमन्महाभारते वनपर्वणि यक्षप्रश्नः	In Press	
Selections from रामायणे—"रामभरत संवादः", श्रीमद्भागवते—"ध्रुवचरितम्", मनुस्मृतौ—"अध्याय ८—श्लोकाः १ to ९३", & नारायणीये—"रुक्मिणीहरणम्"—Dasakas 78 & 79.	6	00

BOOKS ON SANSKRIT DRAMA

दूतवाक्यम्	of Bhasa	5 00
कर्णभारम्	Do	4 00
स्वप्नवासवदत्तम्	Do	12 00

ALANKARA

कुवलयानन्दः—श्रीमदप्पय्यदीक्षित विरचितः (वृत्तिरहितः) 50 selected Alankaras with the commentary "Samanvaya" in Sanskrit & English	6 00

R. S. VADHYAR & SONS, PALGHAT-678003.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

SANSKRIT STUDY MADE EASY SERIES No. 2.
Approved by The Text Book Committee

॥ संस्कृतप्रथमादर्शः ॥

(SAMSKRITA PRATHAMADARSA)

READER I

PUBLISHED BY

R. S. VADHYAR & SONS,

BOOK-SELLERS & PUBLISHERS

KALPATHI : : PALGHAT-678003.

S. INDIA

1976

Rs. 2/25.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

USEFUL TEXT BOOKS FOR COLLEGE STUDENTS

Text in Sans. with Eng. Trans., Model Questions etc.
By T. K. Ramachandra Aiyar, M.A. B.O.L.

BOOKS ON SANSKRIT POETRY

रघुवंश महाकाव्यम्
(दिलीपस्य वसिष्ठाश्रमगमनं नाम प्रथमः सर्गः) 2-00

Do दिलीपस्य नन्दिनीवरप्रदानं नाम द्वीतीयः सर्गः 2-00

Do रघुदिग्विजयो नाम चतुर्थः सर्गः 3-50

नलोपाख्यानम् (श्रीमन्महाभारते बनपर्वणि
अध्यायाः ५०-५४ (Damayanti Svayamvaram) 2-50

शिशुपालवधे मन्त्रवर्णनं नाम द्वितीयः सर्गः 3-50

कुवलयानन्दः (अलङ्कारः)—श्रीमदप्पय्य-
दीक्षितविरचितः (वृत्तिरहितः) 50 Selected
Alankaras with the commentary
"Samanvaya" in Sanskrit & English 5-00

A short History of Sanskrit Literature
(From Vedic Period to classical period) Shortly

वैदिक साहित्य चरितम्–History of Vedic Literature
in 9 chapters in chaste Sanskrit Prose 5-00

Excercises in Sanskrit Translation (with Guide lines
for Translation from Sanskrit to English &
Vice Versa) Shortly

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Easy Texts on Sanskrit Poetry—लघुकाव्य ग्रन्थाः

श्रीरामोदन्तम्—with Notes in Sanskrit & English. 0 75

श्रीकृष्णविलासकाव्यम्—Canto 2 do. 0 50

महात्मविजयः—with English Translation. 1 50

BOOKS ON SANSKRIT PROSE

बालरामायणम्—A Simple Prose Version of Valmiki Ramayana Text with Notes. ... 2-00

Do बाल-अयोध्या-आरण्यकाण्डाः (with Eng. Trans.) 3-50

चन्द्रापीडचरितम्–Bana Bhatta's Kadambari concisely written in his own words Text. ... 2-00

Do Text with Eng. Notes & Trans, ... 5-00

Eng. Trans. & Notes on Harshacharita Sangraha-Ucchvasas 4 & 5 (without Text). ... 4-00

दूतवाक्यम्—(Ambassador's Message) श्रीभासप्रणीतम् with English Trans. Model Questions etc. ... 3-00

कर्णभारम् Do Do 4-00

BOOKS ON SANSKRIT GRAMMAR

शब्दमञ्जरी Declension of Nouns तिङन्त-समास-अव्यय-प्रकरण-शब्दार्थकोश सहिता 14th Edn. ... 3-00

धातुरूपमञ्जरी—(Conjugation of Verbs with Illustrations for 10 Conjugations and a list of most common and important Roots under each Conjugation with English meaning. An Easy Text on Sanskrit Verbs 7th Edition 3-50

संस्कृतव्याकरण प्रवेशिका—A Beginer for the Easy Study of Sanskrit Grammar in 47 Chapters 2-00.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

(2)

A Reformed Series of Four Illustrated Sanskrit Readers

Infant Reader	संस्कृत बालादर्शः	33rd Edn.	2 00
Reader I	संस्कृत प्रथमादर्शः	19th Edn.	2 25
Reader II	संस्कृत द्वितीयादर्शः	11th Edn.	2 50
Reader III	संस्कृत तृतीयादर्शः	8th Edn.	2 75

Appreciations of the Readers by Eminent Professors

The Readers are very good in all details.
Prof: E. R. Marozzi, HONOLULU, U. S. A.

After careful examination I feel that the Readers are excellent.
Prof: Dr. E. G. Peruzzi, Urbino University, ITALY

.....As regards your Sanskrit Readers I cannot imagine a more competent source from which the beginner can obtain just the advice and guidance which he most needs.
G. Lionel de Silva, CEYLON.

Sanskrit Copy Books संस्कृतप्रतिलेखावलिः

These are suitably graded with selected **Maxims** and **Quotations.** In No. 1 Copy Book Diagram to correctly write the entire Sanskrit Alphabet is given.

Prof: Marrozi, HONOLULU, U.S.A. writes:—
.....The Students here are making **good use** of the Copy Books and are **very appreciative of them.**

No. 1 Bold	Hand	स्थूललिपिः	50 P.
No. 2 Medium	Hand	मध्यमलिपिः	50 P.
No. Small	Hand	सूक्ष्मलिपिः	50 P.

R. S. VADHYAR & SONS, KALPATHI, PALGHAT-3.
Bharati Vijayam Press, Madras-600005.

Prof. Mádhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

॥ संस्कृतप्रथमादर्शः ॥

(SAMSKRITAPRATHAMADARSA)

READER I

By

Vidyasagar K. L. V. SASTRI,
Mahopadhyaya, Siromani, Sahityanipuna, Vidyalankara etc.
Retired Sanskrit Pandit,
THE PRESIDENCY COLLEGE, MADRAS.

Revised Ninteenth Edition

ALL RIGHTS RESERVED

Paper used : Double Crown 11.6 Kg. White Printing

Published by

R. S. VADHYAR & SONS,
Book-Sellers & Publishers,
KALPATHI :: PALGHAT-678003.
S. INDIA.
1976

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

॥ भारतदेशीयगीतम् ॥

—:o:—

जन गण मन अधिनायक जय हे !
भारत-भाग्यविधाता ।
पंजाब सिन्धु गुजरात मराठा
द्राविड उत्कल वंगा ॥
विन्ध्य हिमाचल यमुना गंगा
उच्छल जलधि तरंगा ।
तव शुभ नामे जागे
तव शुभ आशिष मागे
गाहे तव जय गाथा ॥
जन गण मंगल दायक जय हे !
भारत-भाग्य-विधाता ।
जय हे ! जय हे ! जय हे !
जय ! जय ! जय ! जय हे ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

INDIAN NATIONAL ANTHEM

Thou art the ruler of the minds
of all People,
Thou Dispenser of India's Destiny.
Thy name rouses the hearts of the Punjab,
Sind, Gujarat and Maratha,
of Dravid, Orissa and Bengal.
It echoes in the hills of the Vindhyas and Himalayas,
mingles in the music of Jamuna and Ganges,
and is chanted by the waves of the Indian Sea.
They pray for Thy Blessings,
and sing Thy Praise,
The Saving of all People waits in Thy hands.
Thou Dispenser of India's Destiny,
Victory! Victory! Victory to Thee!

This Stanza composed by Sree Rabindranath Tagore has been adopted by the Indian Constitution as the National Anthem of India, on 24th January, 1950.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अनुक्रमणिका — CONTENTS

		पृष्ठम्
	भारतदेशीयगीतम् ...	ii
	DO English Translation	iii
१.	सूर्यः प्रत्यक्षदेवता	१
२.	उद्यमः कार्यसाधकः	५
३.	गोदोहः	८
४.	स्वयङ्कृतोऽनर्थः	११
५.	श्रीरामपट्टाभिषेकः (पद्यपाठः)	१४
६.	अश्वः	१८
७.	शृगालस्य कौशलम्	२१
८.	व्याघ्रचित्रकौ	२४
९.	अश्वसारङ्ग्योः कथा ...	२७
१०.	कोकिलः (पद्यपाठः)	३०
११.	कूपः	३३
१२.	वानरक्रीडा ...	३६
१३.	मयूरः	४०
१४.	मृगाणां पक्षिणां च समयः	४३
१५.	प्रश्नोत्तरमाला (पद्यपाठः)	४६
१६.	शुकः	४८
१७.	उलूखलं मर्दलश्च	५१
१८.	गजः	५४
१९.	दश मूढाः	५७

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

		पृष्ठम्
२०.	कुक्कुटो रत्नं व (पद्यपाठः)	६०
२१.	मातापुत्रयोः संभाषणम्	६२
२२.	चोरो बालकः	६६
२३.	मूर्खस्योपकारो न कर्तव्यः	७०
२४.	जरासन्धः	७३
२५.	चन्द्रोदयः (पद्यपाठः)	७७
२६.	पितापुत्रयोः संभाषणम्	७९
२७.	महाकविः श्रीकालिदासः	८३
२८.	सीताविवाहः	८७
२९.	विरक्तः महर्षिः	९०
३०.	चित्रश्लोकाः (पद्यपाठः)	९३
३१.	काकोलूकीयम्	९६
३२.	फलानि	१००
३३.	लक्ष्मणस्य प्रस्थानम्	१०३
३४.	भूमिः	१०६
३५.	नीतिमाला—प्रथमो भागः (पद्यपाठः) ...	१११
	,, द्वितीयो भागः ,, ...	११३
	,, तृतीयो भागः ,, ...	११५
३६.	पर्यायपदानाम् अनुक्रमणिका	११७
३७.	Appendix	११९

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विन्दते

॥ विद्यया ॥ ॥ अमृतम् ॥

Sanskrit Study Made Easy Series

A Reformed Series of Four Illustrated Sanskrit Readers.
With Grammatical Conversational Exercises,
Glossary etc.,
For a Pleasant & Quick Study of Sanskrit.

Most widely used throughout India and Foreign Countries
Viz : Ceylon, Siam, Bangkok, Germany, Italy, Australia,
California, San Francisco etc.

And Selected By The Embassy of India
and The Ministry of Education and Scientific
Research of Govt. of India for Presentation to
Foreign Students of Sanskrit.

Printed At
BHARATI VIJAYAM PRESS,
MADRAS-600 005.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीरामजयम् ॥

॥ विद्यया विन्दते अमृतम् ॥

॥ संस्कृतप्रथमादर्शः ॥



१. सूर्यः प्रत्यक्षदेवता

पश्य, पूर्वस्यां दिशि सूर्य उदयते। तस्य प्रकाशः संप्रति रक्तः कोमलश्च वर्तते। सूर्यः उदयमानोऽन्धकारं नाशयति, प्राणिनः प्रबोधयति, कुसुमानि च विकासयति। सन्तो बालाः सूर्योदयात् पूर्वम् उषसि प्रबुध्य स्वीयान् पाठान् पठन्ति ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

यदा सूर्यः क्रमेणोद्गच्छन् नभसो मध्यमारोहति तदा 'मध्याह्नः'। मध्याह्नात् पूर्वो भागः 'पूर्वाह्णः,' अपरो भागः 'अपराह्णः'। मध्याह्ने सूर्यस्य प्रकाशः कठोरो भवति। अपराह्णे सूर्यः क्रमेण पश्चिमां दिशमवतरति, तस्याम् अस्तं च गच्छति। अस्तमये भूयोऽपि तस्य प्रकाशो रक्तः कोमलश्च भवति॥

सूर्यस्य भासा सर्वा सृष्टिः प्रकाशते। सूर्येण तुल्यो नान्यस्तेजस्वी वर्तते। सूर्यः प्रत्यक्षदेवता॥

सूर्योपासनया जनाः अरोगाः भवन्ति। 'आरोग्यं भास्करात् इच्छेत्' इति हि महतां वचनम्। सः देवैः असुरश्चै नमस्कृतः॥

तथा च श्रीमद्वाल्मीकिरामायणे आदित्यहृदयस्तोत्रम्—

रश्मिमन्तं समुद्यन्तं देवासुरनमस्कृतम्।
पूजयस्व विवस्वन्तं भास्करं भुवनेश्वरम्॥

तस्मात् त्वमपि तं नमस्कुरु॥

---

१) प्रश्नाः—१. सूर्यः कस्यां दिशि उदयते? २. स उदयमानः किं करोति? ३. सन्तो बालाः कदा प्रबुध्य किं कुर्वन्ति? ४. अपराह्णे सूर्यः किं करोति? ५. प्रभाते, मध्याह्ने, सायाह्ने च सूर्यस्य प्रकाशः कीदृशो भवति? ६. कया सर्वा सृष्टिः प्रकाशते?

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

७. कदा अस्तमयः जायते ? ८. जनः कथम् अरोगः भवति ?
९. महान्तः किं वदन्ति ? १०. कीदृशं भास्करं जनाः पूजयन्ति ?

२) In grammar **सन्धि** means the change in combination of 2 letters coming in immediate contact.

विसर्ग लोप सन्धिः (In this **सन्धि** the Visarga is dropped.)

सूर्यः + उदयते = सूर्य उदयते
रामः + आयाति = राम आयाति
चन्द्रः + इव = चन्द्र इव
भृत्यः + एति = भृत्य एति
बालाः + धावन्ति = बाला धावन्ति
गजाः + गच्छन्ति = गजा गच्छन्ति

३) नाशयति, प्रबोधयति, विकासयति-इमे 'णिजन्ताः' (causals) एषां प्राथमिकरूपाणि — नश्यति, प्रबुध्यते, विकसति ॥

४) पर्यायाः = समानार्थ शब्दाः (Synonyms)

सूर्यः (Sun) ३७—सूरसूर्यार्यमादित्य द्वादशात्मदिवाकराः ।
भास्कराहस्करव्रघ्न प्रभाकरविभाकराः ॥ १
भास्वद्विवस्वत्सप्ताश्व हरिदश्वोष्णरश्मयः ।
विकर्तनार्कमार्ताण्ड मिहिरारुणपूषणः ॥ २
द्युमणिस्तरणिर्मित्रः चित्रभानुर्विरोचनः
विभावसुर्ग्रहपतिः त्विषां पतिरहर्पतिः ।
भानुर्हंसः सहस्रांशुः तपनः सविता रविः ॥ ३

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शब्दार्थकोशः—GLOSSARY

प्रत्यक्षदेवता *a. f.* visible
दिश् *f.* direction
पूर्वा *a. f.* the East
पश्चिमा *a. f.* the West
उदयते *A.* rises
कोमल *m.* pretty
अन्धकार *m.* darkness
उषस् *n.* dawn
पूर्वाह्ण *m.* fore-noon
मध्याह्न *m.* mid-day
अपराह्ण *m.* after-noon
अवतरति *P.* descends
भास् *f.* light
सृष्टि *f.* creation
तेजस्विन् *a. m.* bright
उपासनया *f.* by worship
रश्मिमत् *a. m.* having rays
क्रमेण *m.* gradually
समुद्यत् *n. m.* rising

श्रीमद्वाल्मीकि रामायण the mighty Epic composed by the Sage वाल्मीकि in Seven काण्डाs containing 24 thousand slokas.

ABBREVIATIONS USED

N. Noun विशेष्यम्
a. adjective विशेषणम् (can be used in all the 3 genders)
m. Masculine पुंलिङ्गम्
f. Feminine स्त्रीलिङ्गम्
n. Neuter नपुंसकलिङ्गम्
P. परस्मैपदी
A. आत्मनेपदी
U. उभयपदी
in. Indeclinable अव्ययम्

Note that the पर्याय श्लोकाs in all Lessons are taken from अमरकोश

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri



२. उद्यमः कार्यसाधकः

वर्षासु शाकटिकः कश्चित् स्वशकटे भाण्डान्यारोप्य तं नगरान्तरमनयत्। द्वौ वृषौ तं शकटम् अवहताम्। रथ्यायां पङ्के शकटस्य चक्रं रुद्धमभूत्। वृषभौ बलवत् प्रहरन्नपि स शकटं चलयितुं नाक्षमत॥

ततः स भगवन्तं नारायणं प्रति चुक्रोश। तस्याक्रोशं श्रुत्वा दयालुर्भगवांस्तस्य पुरस्तादाविरभूत्। अभाषत च शाकटिकम्—'भो मूढ! किमिति जोषमास्से? मम साहाय्यं वाञ्छसि चेत् उत्तिष्ठ! धुर्यौ चोदय, चक्रं स्कन्धेन प्रचालय। एवं कृतेऽहं ते साहाय्यं करिष्यामि'—इति। एवमुक्त्वा भगवान् अन्तर्धानमकरोत्॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ततः शाकटिकेन तथा कृते भगवतः साहाय्येन शकटं पङ्कान्निरगच्छत्। यात्रा च शाकटिकस्य निर्विघ्नाऽभूत्॥

---

१) प्रश्नाः—

१. शाकटिकः कदा कुत्र शकटमनयत्? २. कुतः शाकटिकः शकटं चलयितुं नाक्षमत? ३. ततः स किमकरोत्? ४. भगवान् किमभाषत शाकटिकम्? ५. कदा केन कारणेन शकटं पङ्कात् निरगात्?

२) 'अकार लोप' सन्धिः—

In this सन्धि 'अ' of the next word is dropped. To indicate this in the place of 'अ' the sign 'ऽ' 'अवग्रह' is added.

कृते + अहम् = कृतेऽहम्। ते + अत्र = तेऽत्र।

विष्णो + अव = विष्णोऽव। एते + अवदन् = एतेऽवदन्।

२. ह्रस्वाकारस्य विसर्गस्य च प्रथमम् 'ओकारो' भवति, तदनन्तरं अकार लोप सन्धिः—

ईश्वरः + अवति = ईश्वरोऽवति।

सः + अहसत् = सोऽहसत्।

एषः + अवदत् = एषोऽवदत्॥

३) णिजन्तरूपैः वाक्यानि पूरयत—

१) प्रभाते पिता पुत्रं (प्रबुध्) २) माता शिशुं क्षीरं (पा)

३) गुरुः बालान् पाठं (पठ्) ४) शकटं जनान् नगरं (प्राप्)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

४) दृश्, क्रीड्, कृ एषां णिजन्तैः रूपैः वाक्यानि रचयत ॥

५) पर्यायाः—

भाण्डम् ५—सर्वमावपनं भाण्डं पात्रामत्रं च भाजनम्

जोषम् २ किं २—तूष्णीमर्थे सुखे जोषं किं पृच्छायां जुगुप्सने।

माता ४ (mother) जनयित्री प्रसूर्माता जननी ॥

उद्यमः कार्यसाधकः efforts lead to the goal

भाण्डानि *n* wares, goods
नगरन्तर *n* another town
रथ्या *f* a road
पङ्क *n* mud, mire
रुद्ध *a.n.* obstructed
बलवत् *in.* severely
अक्षमत *A* was able
चुक्रोश *P* cried
दयालु *a.m.* kind
भगवत् *m.* glorious
पुरस्तात् *in.* in front
आविरभूत् *P.* became manifest

अभाषत *A.* spoke
जोषं *in.* / आस्ते *A.* } are keeping idle
साहाय्यम् *n* assistance
वाञ्छसि *P.* crave, wish
धुर्य *m* bullock, also horse.
चोदय *P.* drive
स्कन्ध *m* shoulder
प्रचालय *P.* push
अन्तर्धानम् / अकरोत् *P.* } disappeared
निरगच्छत् *P.* came out

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri



३. गोदोहः

इह गोपालः गां पयो दोग्धि। इयं पीवरा गौः। अस्य गोपालस्य तनयः प्रत्यहं प्रभाते दोहनात् परमिमां गां प्रचारभूमिं नयति, सायं च प्रत्यानयति। यद्यपि, गावः पलालं धान्यमन्नं पिण्याकं च भक्षयन्ति तथापि बालतृणे तासां महती प्रीतिः॥

गोः समीपे तिष्ठति वत्सः। स प्रथमं गोः पयः किञ्चित् पिबति। अनन्तरं गोपो दोहनं करोति। स गोः पार्श्वे भूमावुपविश्य वामहस्तेन पात्रं गृहीत्वा दक्षिणहस्तेन दुग्धं दोग्धि। धेनोः क्षीरं, मधुरं पथ्यं पुष्टिकरं च॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तत्रैका नारी बालकेन सह तिष्ठति। सा क्षीराय समागता। तं बालं सा पयसा पोषयति। तेन स बुद्धिमान् अरोगश्च वर्तते॥

क्षीरं तक्रेण मिश्रितं दधि भवति। दधि मथित्वा नवनीतं गृह्यते। तप्तं नवनीतं घृतं सम्पद्यते। क्षीरं दधि तक्रं नवनीतं घृतं च मनुष्याणामत्यन्तमुपयुक्तानि वस्तूनि। तानि भोजनाय उपयुज्यन्ते। तानि विना भोजनं न रसकरं भवति। अत एवाहुः—'विना गोरसं को रसो भोजनानाम्'।—इति॥

गां मातरमिव पूजयन्ति भारतीया जनाः। उक्तं च श्रीमन्महाभारते—

'मातरः सर्वभूतानां गावः सर्वसुखप्रदाः—इति॥

---

१. प्रश्नाः—१. गोपालः किं करोति? २. गावः किं किं भक्षयन्ति? ३. कस्मिन् तासां महती प्रीतिः? ४. गोपालः कथं दुग्धं दोग्धि? ५. गोः क्षीरं कीदृशम्? ६. केन स बालः बुद्धिमान् अरोगश्च वर्तते? ७. दधि नवनीतं घृतं च कथं सम्पद्यन्ते? ८. मनुष्याणाम् अत्यन्तमुपयुक्तानि वस्तूनि कानि? ९. गां कामिव पूजयन्ति भारतीया जनाः? तत्र कारणं किम्?

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२) आकारात् पर विसर्ग लोप सन्धिः—

अजाः+अटन्ति=अजा अटन्ति। नराः+इमे=नरा इमे।
जनाः+यान्ति=जना यान्ति। वृक्षाः+एते=वृक्षा एते॥

३) धातुभिः सह 'य' प्रत्यय योगेन कर्मणि रूपं निष्पद्यते-

Ex : दुह् + य + ते = दुह्यते

दुह्, नी, कृ-एतेषां कर्मणि लटो रूपैः वाक्यानि रचयत॥

४) Note the following—

परम् + इमम् = परमिमम्। धान्यम् + अन्नं = धान्यमन्नम्।

Combine the following :—

दुग्धम् + एव। रसकरम् + आहुः।

५) पर्यायाः—

गौः ६—सौरभेयी धेनुरुक्षा गौरघ्न्या श्रृङ्गिणी च सा।
गोपः ६—गोपे गोपालगोसङ्घ्यौ गोधुगाभीरवल्लवाः।
घृतम् ४—(Ghee) घृतमाज्यं हविः सर्पिः॥

दोह *m* milking	**पुष्टिकर** *a. n* nourishing
गोपाल *m* a milkman	**तक्र** *n* buttermilk
दोग्धि *P.* milks	**दधि** *n* curd
पलाल *n* hay	**मथित्वा** *in.* having churned
बालतृण *n* tender grass	**नबनीत** *n* fresh butter
पार्श्व *n* side	**भारतीय** *m* Indian
दुग्ध *n* milk	**सर्वभूत** *in.* all living beings
पथ्य *a. n.* agreeing with (diet)	**वत्स** *m* calf

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri



४. स्वयङ्कृतोऽनर्थः

जातु काष्ठविक्रेता कश्चित् काष्ठार्थं वनमगच्छत्। तत्र स क्वचिदासीनः परितो विलोक्य विलपितुमारभत। तं विलपन्तं वीक्ष्य तस्मिन् वने स्थितास्तरवः करुणया

—2

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तमपृच्छन्—'किं निमित्तं विलपसि?'—इति। सोऽवदत्—'मम कुठारस्य नालं नास्ति। तेनाहं कर्म कर्तुमशक्तोऽस्मि। अतो भोज्यालाभात् विलपामि'—इति॥

ततः सर्वे तरवः समेत्य तस्मै कृपयैकं चिञ्चालगुडं ददुः। काष्ठच्छित् तं कुठारे संयोज्य तस्मिन् वने स्थितान् कतिचित् वृक्षान् अच्छिनत्॥

तदा अन्ये वृक्षा रोदितुमारभन्त। तदवलोक्य सहकार-वृक्षस्तान् प्राह—'भो! बालिशाः! किमिति विलपथ? नायं तस्य दोषः। स्वयंकृत एवायमनर्थोऽस्माभिः नालस्य दानेन'—इति॥

---

१) प्रश्नाः—

१. काष्ठविक्रेता किमर्थं कुत्र अगच्छत्? २. तत्र किं कर्तुमारभत? ३. के तं करुणया किमपृच्छन्? ४. काष्ठच्छित् किं प्रत्यवदत्? ५. तस्मै ते किं ददुः? ६. काष्ठच्छित् किमकरोत्? ७. तदा अन्ये वृक्षाः किमकुर्वन्? ८. सहकारवृक्षस्तान् किं प्राह? ९. अनर्थः कथं स्वयंकृतः अभवत्?

२) विसर्ग सन्धिः—('अः' इत्यस्य ओकारः भवति)

इतः + गच्छति = इतो गच्छति।
स्वतः + जायते = स्वतो जायते।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

बुधः + रमते = बुधो रमते ।
शिष्यः + नमति = शिष्यो नमति ॥

३) जातु, अतः, ततः, स्वयम्—एतान्युपयुज्य वाक्यानि रचयत ॥

४) णिजन्तरूपैः वाक्यानि पूरयत—

१) उपाध्यायः शिष्यान् (पठ्) ३) गुरुः सन्मार्गं (दृश्)
२) सूर्यः स्वभासा जगत् (प्रकाश्) ४) वायुः पादपान् (चल्)

५) पर्यायाः—

वृक्षाः १३—वृक्षो महीरुहः शाखी विटपी पादपस्तरुः ।
अनोकहः कुटः सालः पलाशी द्रुद्रुमागमाः ।

सहकारः ५—आम्रश्चूतो रसालोऽसौ सहकारोऽतिसौरभः ॥

जातु *in.* once
काष्ठविक्रेतृ *m.* a wood-seller
काष्ठार्थम् *in.* for wood
आसीन *a. m.* sitting
परितः *in.* all round
विलपितुम् *in.* to weep
कुठार *m* an axe
नाल *n* handle
भोज्य *n* food
चिञ्चालगुड *m* a stick of the tamarind tree
काष्ठच्छित् *m* wood-cutter
अच्छिनत् *P.* cut
सहकारवृक्षः *m* a mangotree
पादप *m* tree.
बालिश *m* foolish

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

श्री सीता-लक्ष्मण-भरत-शत्रुघ्न-हनूमत्समेत-
श्रीरामचन्द्रस्वामिने नमः ।

श्रीरामजयम् श्रीरामजयम् ।

५. श्रीरामपट्टाभिषेकः

अथायोध्यानिवासास्ते जनास्सर्वेऽपि तोषिताः ।
अभिगम्याब्रुवन् रामं धन्या वयमिति द्रुतम् ॥ १

चातकास्तु घनान् दृष्ट्वा मयूराश्च यथा शिशून् ।
आसाद्य मातरस्तोषं तथा प्रापुर्जना भुवि ॥ २

अथाभिषेकं रामस्य वसिष्ठाद्याः मुदाऽन्वितः ।
सहिता मन्त्रिभिश्चक्रुः वसवो वासवं यथा ॥ ३

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अभिषेकोत्सवे सर्वे सुग्रीवाद्याः कपीश्वराः ।
यथार्हं पूजिताश्चासन् स्रग्गन्धाम्बरभूषणैः ॥ ४

विशिष्य मुक्ताहारेण सीतया हनुमान् मुदम् ।
पूजितश्च तथा लेभे यथा सीतावलोकने ॥ ५

पितुः सिंहासनं प्राप्य भ्रातृभिः सहितोऽनघः ।
विरराज तथा रामो यथा विष्णुस्त्रिविष्टपे ॥ ६

लक्ष्मणानुमते रामो यौवराज्यं तु दत्तवान् ।
भरतायाप्रमेयाय प्राणात् प्रियतराय सः ॥ ७

चत्वारस्ते महात्मानः सभार्या रघुसत्तमाः ।
खे सतारो यथा चन्द्रः तथा रेजुः स्वपत्तने ॥ ८

यस्तु दाशरथिर्भूत्वा रणे हत्वा च रावणम् ।
ररक्ष लोकान् वैकुण्ठः स मां रक्षतु चिन्मयः ॥ ९

(श्रीरामोदन्तात् उद्धृतम्)

मङ्गळश्लोकः—

मङ्गलं कोसलेन्द्राय महनीयगुणाब्धये ।
चक्रवर्तितनूजाय सार्वभौमाय मङ्गलम् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

CHARACTERS IN LESSON 5

1. श्रीराम - The Lord of अयोध्या and the Hero of the mighty Epic Ramayana.

2. सीता - The Ideal Wife of श्रीराम and the Heroine of Ramayana.

3. लक्ष्मण, भरत & शत्रुघ्न - The three Ideal younger brothers of श्रीराम

4. हनूमान् - The Ideal श्रीरामभक्त and the Minister of सुग्रीव.

5. सुग्रीव - The Monkey King of किष्किंधा and the friend of श्रीराम

6. वसिष्ठ - The Celebrated Sage and the family Priest of श्रीराम

7. रावण - The राक्षस King of लंका and the foe of श्रीराम

---

१) प्रश्नाः—

१. श्रीरामं के किम् अब्रुवन्? २. जनाः तोषं प्रापुः—अत्र दृष्टान्ताः के? ३. रामस्य अभिषेकमहोत्सवे के कथं पूजिताः? ४. हनूमान् कथं मुदं प्राप? ५. रामः कथं विरराज? ६. यौवराज्यं रामः कस्मै दत्तवान्? ७. चत्वारः महात्मानः के? कथं रेजुः?॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२) विसर्गरेफ सन्धिः—(Visarga is changed to 'र्')

हरिः + अर्च्यते = हरिरर्च्यते। गुरुः + एति = गुरुरेति।
धेनुः + गच्छति = धेनुर्गच्छति। गौः + दुह्यते = गौर्दुह्यते॥

३) श्रीरामपट्टाभिषेकचरितं गद्यरूपेण लिखत॥

४) कर्तरि प्रयोगः (Active Voice)

In Sanskrit, in Active Voice, the subject will be in **प्रथमा विभक्ति** and the object in **द्वितीया विभक्ति**। The number and person of the verb will follow the Subject.

Ex : गोपालः गां रक्षति।

५) पर्यायाः—

अयोध्या ४—साकेतः स्यादयोध्यायां कोसला नन्दिनी च सा।

अभिषेक *m* coronation
चातक *m* a kind of bird which is supposed to live only on rain drops
घन *m* cloud
मुद् *f* Joy
स्रज् *f* garland
यथार्हम् *in* according to their status

गन्ध *m* scent
अम्बर *n* cloth
भूषण *n* Ornament
अनघ *m* faultless
विरराज *U.* shone
अप्रमेय *a* very great
सतार *a* with stars
पत्तन *n* town
ख *n* sky
रण *m* battle.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri



६. अश्वः

इह कश्चिदश्वस्तिष्ठति। गोरश्वस्य च को भेदः? अश्वो गवापेक्षया प्रांशुः। अश्वस्य पादाः दीर्घतराः। तस्य ग्रीवायां रोमराजिर्वर्तते। अश्वस्य शृङ्गे न स्तः। गो शफो द्वेधा दलितः, अश्वस्य तु न। अतोऽश्वः शीघ्रतरं धावति॥

अयमश्वो रथे बध्यते। कैश्चित् द्वावश्वौ रथे बध्येते। राजानो धनिकाश्चोत्सवदिवसेषु चतुरः ततोऽधिकान् वा तुरगान् रथे योजयन्ति। समवर्णैः बहुभिरश्वैः युक्तो रथः सुरम्यो भवति॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अश्वाः सुशिक्षिताः सञ्चारायोपयुज्यन्ते। वनमार्गेषु जनाः प्रायेणाश्वैरेव सञ्चारं कुर्वन्ति। अश्वस्य पृष्ठे पर्याणमास्तीर्यं तस्मिन्नुपविशत्यश्वारोहः। मुखबद्धं खलीनमाकर्षन् सोऽश्वं नयति॥

अश्वाः सङ्ग्रामेषु राज्ञां साह्यमाचरन्ति। ते रणाङ्गणे महत् कौशलं प्रदर्शयन्ति। कदाचित् ते योधानां प्राणानपि रक्षन्ति। अतः प्राधान्येन राजानोऽश्वसैन्यं सर्वदैव संरक्षन्ति॥

---

१) प्रश्नाः—

१. गोः अश्वस्य च भेदं निरूपयत। २. कुतोऽश्वः शीघ्रतरं धावति? ३. कति अश्वा रथे बध्यन्ते? ४. अश्वैः कः उपयोगः? ५. कुतो राजानः सर्वदैव अश्वसैन्यं संरक्षन्ति?

२) विसर्ग सन्धिः—(विसर्गस्य 'सकारः' भवति)

अश्वः + तिष्ठति = अश्वस्तिष्ठति।

पयः + समुद्रः = पयस्समुद्रः॥

३) सदृश शब्दाः—(Similar words)

१) तुरगः = तुरङ्गः = तुरङ्गमः। (Horse)

२) विहगः = विहङ्गः = विहङ्गमः। (Bird)

३) पतगः = पतङ्गः = पतङ्गमः। (Bird)

४) भुजगः = भुजङ्गः = भुजङ्गमः। (Snake)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

४) साह्यम्, साहाय्यम्, साहायकम्—एते समानार्थाः ॥

५) क) एकपदीकुरुत—(Give one word for)

e. g. नालस्य दानेन = नालदानेन ।

१. अश्वस्य पादाः । २. महत् कौशलम् । ३. राज्ञः पुरुषः॥

ख) द्विपदीकुरुत—(Split into two words)

e. g. रणाङ्गणे = रणस्य अङ्गणे ।

१. अश्वसैन्यम् । २. मुखबद्धम् ॥ ३. वनमार्गाः ॥

६) पर्यायाः—

अश्वः १३—घोटके वीतितुरगतुरङ्गाश्वतुरङ्गमाः ।
(Horse) वाजिवाहार्वगन्धर्व हयसैन्धवसप्तयः ॥

ग्रीवा *f* neck
रोमराजि *f* a line of hair
शृङ्ग *n* a horn
शफ *m* a hoof
दलित *a. m.* split
समवर्णः *a.m.* of uniform colour

पर्याण *n* a saddle
अश्वारोह *m* a horse-man
खलीन *n* bit of a bridle
सङ्ग्राम *m. a.* battle
योधा *m* warrior
अश्वसैन्य *n* cavalry
साह्यम् *n* help.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri



७. शृगालस्य कौशलम्

चित्रेऽस्मिन् एकः शृगालोऽजस्य पृष्ठे पदं निधाय तिष्ठति। कथय, किं निमित्तं स तथा तिष्ठति?

अयं शृगालः पानीयं पातुं वापीं गतो जले ममज्ज। तेन बहिर्गन्तुं बहवो यत्नाः कृताः। किन्तु ते सर्वे मुधाऽभवन्॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अत्रान्तरे क्रोऽप्यजः पिपासाकुलः परिभ्रमन् तत्रागतः। अपृच्छच्च शृगालम्—'सखे अपि मधुरं जलम्'—इति। शृगालः परेषां वञ्चने नितरां पटुः। अतः स आह—'मधुरमिति किमुच्यते! केवलं पीयूषमेव! प्रभूतं पिबतोऽपि न मे वाञ्छा निवर्तते॥ न शक्नोम्येतां वापीं हातुम्'—इति॥

अजस्तावदृजुबुद्धिः। अतः स वञ्चकस्य वचनं सत्यं मत्वा शनैरन्तः प्रविशति। ऊर्ध्वमुखमवरोहतस्तस्य पृष्ठे पदं निधाय वापीतः समारोहति शृगालः। अजस्तु वाप्यामेव मज्जनोन्मज्जने कुर्वन् विपेदे। पश्यत! शृगालस्य कौशलम्॥

---

१) प्रश्नाः—

१. किमर्थं शृगालः अजस्य पृष्ठे पदं निधाय तिष्ठति? २. अयं शृगालः कथं वाप्यां पतितः? ३. अजः शृगालं किमपृच्छत्? ४. कथं शृगालो वापीतः समारोहत्? ५. अजः कथं विपेदे?

२) विसर्ग सन्धिः—(विसर्गस्य 'श' कारः, 'ष' कारः, 'स' कारो वा भवति)

पूर्णः + चन्द्रः = पूर्णश्चन्द्रः। धनुषः + टङ्कारः = धनुषष्टङ्कारः। अलसः + शेते = अलसश्शेते। अजः + तु = अजस्तु।

३) मुधा, अपि, नितराम्, एतान्युपयुज्य वाक्यानि रचयत॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

४) उपदेशः—१. वञ्चकस्य बचनं न विश्वसनीयम् ।
२. तस्योपकारोऽपि न कर्तव्यः ॥

५) पर्यायाः—

पिपासा ६—उदन्या तु पिपासा तृट् तृषा तर्षश्च तर्षणम् ।

पीयूषम् (Nectar) ३—सुधा पीयूषममृतम् ।

विषं(Poison) ३—क्ष्वेडस्तु गरलं विषम् ।

शृगालः १०—*स्त्रियां शिवा भूरिमाय गोमायुमृगधूर्तकाः ।
(Jackal) शृगाल वञ्चक क्रोष्टु फेरु फेरव जम्बुकाः ।
*स्त्रियां शिवा जम्बुकपर्यायः 'शिवा' शब्दः नित्यं स्त्रीलिङ्गः इत्यर्थः ॥

पानीय *n* water
वापी *f* a well
ममज्ज *P.* Sang
मुधा *in.* in vain
अत्रान्तरे *in.* in the meanwhile
पिपासाकुल *a. m.* afflicted by thirst
पटु *a. m.* clever
वाञ्छा *f* desire
हातुम् *in.* to leave
ऋजुबुद्धि *a. m.* straight—forward
वञ्चक *m* deceitful ; also jackal
शनैः *in* slowly
वापीतः *in.* from the well
मज्जनोन्मज्जने *n* singing and coming up
नितराम् *in.* very much
कौशलम् *n* cleverness.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri



८. व्याघ्रचित्रकौ

व्याघ्रो वन्यः पशुः। सः हिंस्राणां मृगाणां मध्येऽतीव क्रूरः। इतरेभ्यः पशुभ्यो व्याघ्रः शीघ्रतरं धावति। व्याघ्रस्य देहे सर्वत्र कृष्णा बिन्दवो रेखाश्च सन्ति। यदि तस्य स्वभावः शान्तो भविष्यत् तर्हि जनास्तं मृगान्तरापेक्षया अधिकतरम् आदरिष्यन्त॥

चित्रकस्तु व्याघ्रादपि सुन्दरः। चित्रकायः इत्यप्ययं व्यपदिश्यते। एकदा चित्रकः कश्चित् स्वस्य रूपेण गर्वितो भूत्वा मृगसभायामेवमब्रवीत्—'सिंहो न मम तुलां भजते। अतोऽहमेव मृगराज्येऽभिषेक्तव्यः—इति॥

तेषां मध्यतः क्रोष्टोवाच—'आर्य! त्वमेकं गजं निहत्य मृगपरिवारं तर्पय; येन त्वां मृगराज्येऽभिषेक्ष्यामः'—इति। तद्वचनं श्रुत्वा लज्जितश्चित्रकः—

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri



'इदानीमेव आगमिष्यामि'—इत्युक्त्वा ततः प्रस्थितः तद्वनमेव परित्यज्य गतः ॥

१) प्रश्नाः

१. व्याघ्रःकीदृशः पशुः ? तम् अधिकृत्य द्वित्राणि वाक्यानि वदत। २. चित्रकः कीदृशः ? ३. रूपेण गर्वितः चित्रकः मृगसभायां किमब्रवीत् ? क्रोष्टा किमुवाच ? ५. चित्रकः किमकरोत् ?

२) सन्धिः—(विसर्गस्य विकल्पेन जिह्वामूलीयः (ᳵ) भवति)

व्याघ्रः + कथयति = व्याघ्रᳵकथयति, व्याघ्रः कथयति।

सुरूपः + खगः = सुरूपᳵखगः, सुरूपः खगः।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वन्यः + पशुः = वन्य×पशुः, वन्यः पशुः ।
वृक्षः + फलति = वृक्ष×फलति, वृक्षः फलति ॥

३) विपरीतपदानि—(Opposite words)

वन्यः × ग्राम्यः । ह्रस्वम् × दीर्घम् । उपरिष्टात् × अधस्तात् ।
क्रूरः × शान्तः । उदयः × अस्तमयः । पुरस्तात् × परस्तात् ।
अल्पं × बहु । उपरि × अधः । सुलभं × दुर्लभम् ॥

४) पर्यायाः—

व्याघ्रः (Tiger) ३—शार्दूलद्वीपिनौ व्याघ्रे ।
देहः ११—गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः ।
कायो देहः*क्लीबपुंसोः स्त्रियां मूर्तिस्तनुस्तनूः ॥
क्लीबपुंसोः देहशब्दः नपुंसकलिङ्गः पुंलिङ्गश्च इत्यर्थः ।
मूर्त्यादयः त्रयः शब्दाः स्त्रीलिङ्गाः ॥

बन्य *a. m.* wild
पशु *m* a beast
हिंस्र *a. m.* cruel
बिन्दव *m.* dots, spots
चित्रक *m* a cheeta
तुला *f* Equality
मृगराज्य *n* kingdom of animals
क्रोष्टा *m* a jackal
मृगपरिवार *m* animal follower
खग m a bird

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

९. अश्वसारङ्गयोः कथा

कश्चिदश्वः सारङ्गश्चैकस्मिन् केदारे नित्यं चरतः, महता च स्नेहेन कालं नयतः। एवं स्थिते तौ जातु कलहपरौ जातौ। तयोः सारङ्गः शृङ्गबलेनाश्वं केदारान्निरवासयत्॥

ततः सारङ्गस्य प्रतीकारं कर्तुमिच्छन्नश्वः कञ्चिन्मनुजं प्राप्य तस्य साहाय्यं ययाचे। स मनुजः परं प्रहृष्टः तस्य पृष्ठे पर्याणमारोप्य मुखे खलीनं दत्त्वा तमारोहत्। तस्य गतिं परीक्षमाणः कशया तं तीव्रमताडयत्। स्वकार्यार्थी तत् सर्वमसहताश्वः। तस्य मनुजस्य साहाय्येन सोऽश्वः सारङ्गमजयत्॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कृतकृत्यः स तुरगो मनुजं निजगाद—'सिद्धं मे समीहितमधुना। पर्याणं खलीनं चापनीय मां गमनायानुमन्यस्व'—इति। तन्निशम्य मनुजस्तं बभाषे—'मया तवैतावत् प्रयोजनमिति जानाम्यहम्। किन्त्वतः परं त्वया मे प्रयोजनं भविष्यति। कथमहं त्वां विसृजेयम्?'—इति॥

ततो यावज्जीवं सोऽश्वः तस्य मनुजस्य वाजिशालायां बन्धने स्थितः परतन्त्रतया परां पीडामन्वभूत्। परतन्त्रस्य कुतः सुखम्?

उक्तं च सुभाषितरत्नाकरे—

'सर्वं परवशं दुःखं सर्वमात्मवशं सुखम्'—इति॥

---

१) प्रश्नाः—

१. कौ एकस्मिन् केदारे नित्यं चरतः, तौ कथं कालं नयतः? २. एवं स्थिते तौ कीदृशौ जातौ? ३. कः केन अश्वं केदरान्निरवासयत्? ४. कथमश्वः सारङ्गमजयत्? ५. कृतकृत्यः स तुरगो मनुजं किं जगाद? ६. मनुजस्तं किं बभाषे? ७. अश्वः कीदृशं फलमन्वभवत्? ८. अस्मिन् पाठे उपदेशः कः?

२) सन्धिः—(सः, एषः, इत्यनयोः विसर्गस्य लोपः भवति)

सः+याति = स याति। सः+कथयति = स कथयति।

एषः+धावति = एष धावति। एषः+पचति = एष पचति॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३) कर्मणि प्रयोगः (Passive voice)

In Passive Voice, the subject will be in **तृतीया विभक्ति** and the object in **प्रथमा विभक्ति**। The number and person of the verb will follow of the object.

Ex :—**गोपालेन गौः रक्ष्यते** ।

४) उपदेशः—(Moral)

एकस्य जयार्थमन्यमाश्रयन् जनः स्वयमनर्थे पतति ॥

५) पर्यायाः—

स्वतन्त्रः ५—स्वतन्त्रोऽपावृतः स्वैरी स्वच्छन्दो निरवग्रहः ।
(Independent)

परतन्त्रः ४—परतन्त्रः पराधीनः परवान् नाथवानपि ॥
(Dependent)

सारङ्ग *m* deer
केदार *m* a field
कलहपर *a. m.* quarraller
निरवासयत् *P.* banished
प्रतीकार *m* retaliation
ययाचे *U.* begged
कृतकृत्य *a. m.* he who has accomplished his object
समीहित *n* wish, desire
एतावत् *n* this much
वाजिशाला *f* a stable
बन्धन *n* bondage

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१०. कोकिलः

नायं सुरूपो विहगो नापि कायोऽस्य भासुरः ।
न चास्य पक्षयोः सन्ति चित्रवर्णा विशेषकाः ॥ १

केवलं काकसदृशो रूपे वर्णेऽप्ययं खगः ।
अथापि मधुरं गायन् अयं जगति पूज्यते ॥ २

रसालशिखरासीनो वसन्ते मधुरं स्वनन् ।
कस्य नो हृदयानन्दं जनयत्येष कोकिलः ॥ ३

काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः ।
वसन्तकाले संप्राप्ते काकः काकः पिकः पिकः ॥ ४

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

किं कुलेन विशालेन किं रूपेण सुशोभिना।
महत्त्वे कारणं तावत् वाग्रसो जनरञ्जकः ॥ ५

---

१) प्रश्नाः—

१. कोकिलः कीदृशो विहगः? २. काकः कोकिलश्च कथं सदृशौ? ३. कोकिलः कथं हृदयानन्दं जनयति? ४. कदा काकः काकः पिकः पिकश्च भवतः? ५. क उपदेशो युष्माभिः पाठादस्मात् गृह्यते? ६. महत्वस्य कारणं किम्? किं न?

२) गुणसन्धिः—According to पाणिनि सूत्र 'गुण' denotes the 2 letters ए and ओ. द्वयोः वर्णयोः 'ए' कारः, 'ओ' कारः वा भवति—

अत्र + इदम् = अत्रेदम्।
यथा + इच्छसि = यथेच्छसि।
जलस्य + उद्धरणम् = जलस्योद्धरणम्।
रमा + उवाच = रमोवाच ॥

३) कर्तरि प्रयोगं दर्शयत—

१) अयं जगति पूज्यते।
२) दधि मथित्वा नवनीतं गृह्यते।
३) मया आत्मा किंमित्यायास्यते।
४) अयमश्वो रथे बध्यते ॥

४) नो, न-इमौ निषेधार्थकौ। इमौ प्रयुज्य वाक्यानि रचयत ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

५) व्याकरणे प्रश्नाः—

द्वयोः पदयोः स्थाने एकं पदं भवति । यथा—

रामं लक्ष्मणम् = रामलक्ष्मणौ ।

क) एकपदी कुरुत—

१) रूपे वर्णे । २) पिकं काकम् । ३) कुलेन शीलेन

ख) अस्मिन् पाठे कति सन्धयः सन्ति ?

सन्धीकृतानि पदानि वदत ?

ग) वर्णेऽपि, कायोऽस्य—अत्र कः सन्धिः ?

६) पर्यायाः—

कोकिलः ४—वनप्रियः परभृतः कोकिलः पिकः इत्यपि

शुक्लः १३—शुक्लशुभ्रशुचिश्वेत विशदश्वेतपाण्डराः ।

(White) अवदातः सितो गौरो वलक्षो धवलोऽर्जुनः ॥

कृष्णः ७—कृष्णे नीलासित*श्याम कालश्यामलमेचकाः

(Black) *असितः, न सितः = कृष्णः इत्यर्थः ॥

कोकिल *m* } cuckoo
पिक *m* }

भासुर *a. m.* shining
विशेषक *m* line, dot
रसाल *m* mango tree
शिखर *n* top

विशाल *a. n.* great, noble
महत्व *n* greatness
वाग्रस *m* sweetness of speech
जनरञ्जक *a. m.* that which attracts people.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri



११. कूपः

अयं रमणीयः कूपः। पानाय योग्यं जलं कूपे लभ्यते। सरसो जलं स्नानेन मलिनं भवति। नद्याः सलिलं प्रकृत्यैव कलुषम्। समुद्रस्य वारि लवणम्। कूपस्य उदकम् अनाविलं पानयोग्यं च भवति॥

चित्रं पश्य। कूपस्य समन्तात् बहूनि सन्ति क्षेत्राणि। ततो नातिदूरे दृश्यन्ते कतिचन गृहाणि। तेषु गृहेषु वसन्त्यः स्त्रियः अस्मात् कूपाज्जलं नयन्ति॥

अस्य कूपस्य समीपे चतस्रः स्त्रियः सन्ति। द्वे स्त्रियौ जलघटं शिरसि निधाय गच्छतः। अपरा कूपाज्जलमुद्धरति। अन्या जलमुद्धर्तुं घटहस्ता तिष्ठति॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अयमगाधः कूपः। अतोऽस्मात् कूपाज्जलस्योद्धरणाय दारुचक्रमुपयुज्यते। पश्य, कूपस्य पार्श्वयोः द्वौ स्तम्भौ निखातौ। तयोरुपरि तिर्यक् दारुदण्डो योजितः। तस्य मध्ये दारुचक्रं पिनद्धम्। तस्य चक्रस्यान्तराले रज्जुः प्रवेशिता। तस्या रज्जोरग्रेण घटं कण्ठे बद्ध्वा तं कूपेऽवतारयन्ति, जलं चोद्धरन्ति। दारुचक्रस्य स्थानेऽयश्चक्रमपि कैश्चिदुपयुज्यते। अद्यत्वे भूयसा वैद्युतशक्तिमुपयुज्य यन्त्रेण जनाः कृष्याद्यर्थं कूपात् जलमुद्धरन्ति॥

---

१) प्रश्नाः—

१. पानाय योग्यं जलं कुत्र लभ्यते? २. सरसः समुद्रस्य नद्याः कूपस्य च जलं कीदृशम्? ३. अस्य कूपस्य समीपे स्थिताः स्त्रियः किं कुर्वन्ति? ४. अयं कीदृशः कूपः? ५. अस्मात् कूपात् कथं जलमुद्धरन्ति? ६. जलस्य उद्धरणाय किं किम् उपयुज्यते?

२) वृद्धिसन्धिः—According to पाणिनि सूत्र 'वृद्धि' denotes the 2 letters 'ऐ' and 'ओ', Here द्वयोः वर्णयोः 'ऐ' कारः, 'औ' कारः वा भवति।

मम + एव = ममैव।

न + ऐच्छत् = नैच्छत्। वन + ओषधिः = वनौषधिः।

दिव्य + औषधम् = दिव्यौषधम्॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३) **विशेषणं** (Adjective) It will follow the Noun in Gender, Number and case.

१) मध्याह्ने सूर्यस्य प्रकाशः कठोरः ।
२) गोः क्षीरं मधुरं पथ्यं पुष्टिकरं च ।
३) इति ब्रुवन् स गोमायुर्निराशो निर्गतः ।
४) शृगालः परेषां वञ्चने नितरां पटुः ॥

४) पर्यायाः—

जलम् २५—[1]आपः स्त्री भूम्नि वार्वारि सलिलं कमलं जलम् ।
(Water) पयः कीलालममृतं जीवनं भुवनं वनम् ॥
कबन्धमुदकं पाथः पुष्करं सर्वतोमुखम् ।
अम्भोऽर्णस्तोयपानीय नीरक्षीराम्बुशम्बरम् ॥
मेघपुष्पं घनरसः त्रिषु द्वे [2]आप्यमम्मयम् ॥

[1]आपः स्त्री भूम्नि = अप् शब्दः नित्यं स्त्रीलिङ्गः बहुवचनान्तश्च ॥
[2]आप्यम्, अम्मयम् इति द्वौ शब्दौ जलविकारस्य पर्यायौ ।

प्रकृति *f.* nature
कलुषः *a. n.* dirty
लवण *a. n.* saline ; saltish.
अनाविल *a. n.* free from dirt ; pure
अगाध *a. m.* deep
दारुचक्र *n. a.* woodenwheel
निखात *a. m.* fixed, planted
तिर्यक् *in* obliquely
पिनद्ध *a. n.* fastened
रज्जु *f* a rope
अयश्चक्र *n.* iron wheel

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१२. वानरक्रीडा

अस्मिन् वृक्षे केचिद्वानराः क्रीडन्ति। ते वृक्षाद्वृक्षं विटपाद्विटपं च प्लवन्ते। वानराः प्रायेण नरैस्तुल्यरूपाः। अथापि नरा इव गृहाणि खगा इव नीडानि वा कर्तुं न ते शक्नुवन्ति। सर्वदैव ते वृक्षेषु निवसन्ति। कन्दैः फलैश्चोदरं पूरयन्ति। वानराः स्वभावत एव चपलाः कोपनाश्च॥

काचित् कथा श्रूयते, यथा—एकदा वर्षासु कश्चिद्वानरः शैत्येन बाधितो दन्तवीणां वादयन् कस्यचन शमीतरोर्मूलमाससाद। तस्मिन् वृक्षे कुलायं कृत्वा चटकदम्पती निवसतः स्म। तयोः चटका शैत्येन कम्पमानं वानरमवलोक्य करुणया प्राह—

"नीडं कुर्मो वयं चापि चञ्चुमात्राहृतैस्तृणैः।
पाणिपादादिसंयुक्ता यूयं किमिति सीदथ?" इति।

तदाकर्ण्य वानरस्तामाह—'दुष्टे! अलं जल्पनेन; तूष्णीमास्स्व'—इति। सा तु करुणाविष्टा पुनः पुनस्तदेव वचनमभ्यधात्॥

तेन कुपितो मर्कटः—'सूचीमुखि! दुराचारे! किं प्रलपसि' इति वदन् शमीवृक्षमारुह्य तस्याः कुलायं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शतधा भङ्क्त्वा क्षितावपातयत् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१) प्रश्नाः—

१. अस्मिन् वृक्षे वानराः किं कुर्वन्ति? २. ते कुत्र निवसन्ति? ३. कैश्चोदरं पूरयन्ति? ४. मर्कटाः कीदृशाः? ५. वानरः कथं शमीतरोः मूलमाससाद? ६. तस्मिन् वृक्षे कौ निवसतः स्म? ७. वानरमवलोक्य का किं प्राह? ८. वानरस्तां किमाह? ९. सा किमकार्षीत्? १०. तेन कुपितो वानरः किमकरोत्?

२) यण् सन्धिः —('इ' कारस्य 'य' कारः, 'उ' कारस्य 'व' कारः 'ऋ' कारस्य 'रेफः' च भवन्ति)

लघु + आहारः = लघ्वाहारः।

इति + आह = इत्याह।

मातृ + आशीः = मात्राशीः॥

३) क्रियाविशेषणं (Adverb). It is indeclinable and modifies the verb.

१) कोकिलः वसन्ते मधुरं गायति।

२) अश्वाः शीघ्रतरं धावन्ति।

३) स मनुजः परं प्रहृष्टः अभवत्।

४) गुरुः कुपितश्छात्रं तीव्रमताडयत्।

४) विशेषशब्दाः—

वर्षाः, (Rainy Season) आपः (water), = नित्यं स्त्रीलिङ्ग बहुवचनान्तौ; दाराः (a wife) = नित्यं पुंलिङ्ग बहुवचनान्तः॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

५) व्याकरणे प्रश्नाः—

१) निवसतः स्म—अत्र व्याकरणविशेषः कः ?

२) अस्मिन् पाठे ल्यबन्तानि अव्ययानि कानि कानि ?

३) पदानि पृथक्कृत्य दर्शयत—

१. क्षितावपातयत् । २. फलैश्चोदरम् । ३. वानरस्तामाह ॥

६) पर्यायाः—

वानरः १०—कपिप्लवङ्ग प्लवग शाखामृगवलीमुखाः ।
(Monkey) मर्कटो वानरः कीशो वनौकाश्च प्लवङ्गमः ॥
दम्पती ४— दम्पती जम्पती जायापती भार्यापती च तौ ।

खग *m* bird
विटप *m* a branch, bough
कन्दानि *n* bulbous roots
चपल *a. m.* fickle
कोपना *a. m.* passionate
वर्षाः *f* rāiny season (Always plural)
शैत्यम् *n* cold
दन्तवीणा *f* chattering of the teeth
चटक *m* a sparrow
जल्पनम् *n* prattling
तूष्णीं *in* आस्व *A.* keep quite
सूचीमुखी *f* needlefaced
कुलाय *m* a nest of a bird
शतधा *in.* into a hundred-pieces
क्षिति *f* the earth, ground.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri



१३. मयूरः

इदं किमपि रमणीयमुद्यानम्। अत्र द्वौ मयूरौ एका मयूरी तरवो लताः प्राकारश्च दृश्यन्ते। एको मयूरः पिच्छानि विस्तृत्य नृत्यति। अपरः पिच्छानि संवृत्य प्राकारस्योपरि तिष्ठति। तेन सह मयूरी अपि तत्र तिष्ठति। मयूर्याः पिच्छभारो नास्ति। नापि सा रम्या॥

मयूराणां बर्हेषु चित्रवर्णा अर्धचन्द्राकृतयो विशेषकाः सन्ति। ते जनानां चक्षूंषि रमयन्ति। एतैः मयूराणां बर्हैः व्यजनानि क्रियन्ते। केचित् तानि भूषणत्वेन धरन्ति॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मयूरा वर्षासु मेघस्य शब्दं श्रुत्वा प्रहृष्टाः नृत्यन्ति। बर्हाणि विस्तृत्य नृत्यन् मयूरः फुल्लकुसुमो बालवृक्ष इव विभाति। तस्य केकारवस्तु काकस्वरवत् परुषः। अथापि तस्य रूपमतीव मनोहरम्। अतो मयूरान् गृहीत्वा धनिनो जनाः पुष्पोद्यानेषु संरक्षन्ति॥

---

१) प्रश्नाः—

१. इदं कीदृशमुद्यानम्? २. तत्र के के वर्तन्ते? ३. मयूरौ किं कुरुतः? ४. प्राकारे कौ तिष्ठतः? ५. मयूराणां पिच्छैः कः उपयोगः? ६. मयूराः कदा नृत्यन्ति? ७. कः फुल्लकुसुमो बालवृक्ष इव विभाति? ८. केकारवः कीदृशः? ९. कुतः जनाः मयूरान् गृह्णन्ति? १०. मयूरान् गृहीत्वा के किं कुर्वन्ति?

२) सवर्णदीर्घ सन्धिः—(अत्र द्वयोः वर्णयोः तत्सदृशः दीर्घः भवति)

उदाहरणम्—जगाम + असौ = जगामासौ।

इति + ईरयति = इतीरयति।

गुरुः + उपदेशः = गुरूपदेशः॥

३) अधः निर्दिष्टेषु सन्धिं दर्शयत

२) अत्र + आसीत्; २) गच्छति + इव; ३) वधू + उद्वाहः।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

४) विग्रहवाक्यम्—(उदाहरणम्)

काकस्वरः इव = काकस्वरवत् ॥

अधः प्रदर्शितानां विग्रहवाक्यानि वदत—

खगवत्, तरवत्, हीरवत्, तद्वत् ॥

५) निर्दिष्टैः विशेषणशब्दैः वाक्यानि पूरयत—

१) —(पानयोग्य) इमा आपः ।

२) केकारवः काकस्वरवत्—(कठोर) ।

३) बर्हैः—(रमणीय) व्यजनानि क्रियन्ते ।

४) —(महत्) जनानां पन्थानमनुसर ।

६) पर्यायाः—

मयूरः ९—मयूरो बर्हिणो बर्हीं नीलकण्ठो भुजङ्गभुक् ।

(Peacock) शिखावलः शिखी केकी मेघनादानुलास्यपि ॥

शिखा २—शिखा चूडा शिखण्डस्तु ॥

पिच्छं ३—पिच्छबर्हे नपुंसके ॥

उद्यान *n* a garden, park

प्राकार *m* wall

पिच्छं, बर्हम् } *n* tail of a peacock

विस्तृत्य *in* having expanded

संवृत्य *in* having closed

व्यजन *n* fan

फुल्ल *a* blown, opened.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri



१४. मृगाणां पक्षिणां च समयः

कृषीवलः कश्चिदरण्यपरिसरभूमौ वसति स्म। जातु तस्य कुक्कुटः केदारे भक्ष्यमन्विष्यन्नास्त। जम्बुकः कश्चन बुभुक्षितः परिभ्रमंस्तमुद्देशमागतः। कुक्कुटस्तमवेक्ष्य समीपस्थस्य तरोः शिखरमारोहत्॥

वञ्चको भग्नाशस्तरोर्मूलमासाद्य कुक्कुटं प्रलोभयन्नाह—"भद्र! किमिति मां दृष्ट्वा वृक्षमारूढवानसि? अद्य खलु मृगैः पक्षिभिश्च सर्वैः सम्भूय समयः कृतः। तत्रैवं निर्णीतम् 'न कोऽपि कस्मा अपीतः परं द्रुह्येत्। न कमपि पीडयेत्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

किन्तु सर्वैः स्नेहेन वर्तितव्यम् । य एनं समयमुल्लङ्घते स तीव्रं दण्डचेत'—इति । तेनाहं त्वां स्नेहेनालिङ्गितुं समागतः । कथं त्वं मत्तो बिभेषि?''—इति । कुक्कुट आह—'सखे! सत्यमुक्तं भवता । परं त्वं बुभुक्षित इव दृश्यसे । अतः कथं वृक्षादवरोहेयम्!—इति ॥

एवं वदत्येव तस्मिन् नातिदूरे व्याघ्रः कश्चित् समाययौ । कुक्कुटः शिरोधरामुन्नमय्य तमीक्षाञ्चक्रे । गोमायुस्तमपृच्छत्—'भद्र! किं सादरं वीक्षसे? कुक्कुट आह—'सखे! नातिदूरे व्याघ्र आगच्छति' । क्रोष्टा भीतः—'भद्र! यद्येवं नमस्ते । समयान्तरे त्वां भूयो द्रक्ष्यामि' इत्युक्त्वा प्रस्थितः ॥

कुक्कुटस्तं सस्मितमाह—'हंहो मा गमः । अहं तरोरवरोहामि । त्वं मां स्नेहेनालिङ्गिष्यसि । 'सर्वैः स्नेहेन वर्तितव्यम्' इति समये स्थिते किमिति त्वं व्याघ्राद्भीतः!'—इति । शृगालः 'न खलु घातुकाः समयमनुवर्तिष्यन्ते! इति वदन् द्रुतं पलायितः ॥

---

१) प्रश्ना :—

१. कुक्कुटः किन्निमित्तं तरोः शिखरमारोहत्? २. मृगैः पक्षिभिश्च सम्भूय कः समयः कृतः? ३. व्याघ्रः कदा कुत्र समाययौ? ४. कुक्कुटः सस्मितं किम् आह? ५. किं वदन् जम्बुकः द्रुतं पलायितः? ६. जम्बुकस्य पर्यायान् वदत ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२) अयवायाव सन्धिः— ('ए, ओ, ऐ, औ' एषां क्रमात् 'अय्, अव्, आय्, आव्, आदेशाः विकल्पेन भवन्ति')

एते + आगताः = एतयागताः, एत आगताः।
शम्भो + एहि = शम्भवेहि, शम्भ एहि।
तस्मै + आह = तस्मायाह, तस्मा आह।
मधौ + इह = मधाविह, मधा इह॥

३) अग्रतः, पृष्ठतः, परितः, उभयतः—एतैः यथायोगं वाक्यानि पूरयत—१) व्याघ्रः—आगत्य गोपालं व्यापादयत्।
२) वृषभः शकटस्य—युगे बध्यते।
३) क्रीडाकाले बालै रज्जुः—आकृष्यते।
४) अस्माकं पाठशालायां—प्राकारो वर्तते॥

४) पर्यायाः—
कुक्कुटः ४—कृकवाकुस्ताम्रचूडः कुक्कुटश्चरणायुधः।
बुभुक्षितः ४—बुभुक्षितः स्यात् क्षुधितो जिघत्सुरशनायितः।

५) नानार्थाः—'समय' पदस्य ५ अर्थाः। यथा—
समयाः शपथाचारकालसिद्धान्तसंविदः॥

समय *m* an agreement
परिसर *m* vicinity, neighbourhood
उद्देश *m* a spot, place
अशाश *a. m.* disappointed
प्रलोभयत् *a. m.* seducing
द्रुह्येत् *P.* should bear hatred
शिरोधरा *f* neck
समयान्तर *n* another time
द्रुतम् *in.* swiftly.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१५. प्रश्नोत्तरमाला

(Slokas containing Questions & Answers.)

कुत्र विधेयो यत्नः ?
विद्याभ्यासे परोपकारे च ।
अवधीरणा क्व कार्या ?
परनिन्दायां परधने च ॥ १

कुत्र विधेयो वासः ?
सज्जनसविधे सदा सौम्ये ।
कः परिहार्यो देशः ?
पिशुनजनैः सङ्कुलीभूतः ॥ २

कोऽन्धः ? योऽकार्यरतः ;
को बधिरः ? य शृणोति नान्योक्तिम् ॥
को मूकः ? यः काले
प्रियाणि वक्तुं न जानाति ॥ ३

को धर्मः ? भूतदया ;
किं सौख्यम् ? नित्यमरोगिता जगति ।
कः स्नेहः ? सद्भावः ;
किं पाण्डित्यं ? परिच्छेदः ॥ ४

उपसर्गाः or Prepositions are indiclinable words prefixed to Verbs, These *modify, intensify* and totally *alter* the original sense of the *Roots.* This is explained by the following Sloka.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।
प्रहाराहार संहार विहार परिहारवत् ॥

e. g. the *Root* हृ = 'to take away' when added to the **उपसर्ग** has the following different meanings.

	उपसर्ग	धातु		Meaning
1.	प्र	+ हरति	= प्रहरति	beats
2.	आ	+ हरति	= आहरति	brings
3.	सं	+ हरति	= संहरति	kills
4.	वि	+ हरति	= विहरति	plays
5.	परि	+ हरति	= परिहरति	avoids.

Note : Sometimes **उपसर्ग** is prefixed without any change in the meaning.

e. g. विशति = enters. प्र + विशति = प्रविशति (enters).

२) पर्याया :—अन्यः ४—इतरोऽन्यः परो भिन्नः ।

एकाकी (Alone) ३—एकाकी त्वेक एककः ।

सततं १०—अजस्रं सततं नित्यं सर्वदाऽविरतं सदा ।
(Always) अनारतमविश्रान्तम् अनिशं च दिवानिशम् ॥

अवधीरणा *f* disrespect	**बधिर** *m* deaf
सौम्य *a. m.* pleasing	**मूक** *m* dumb
सङ्कुलीभूत *a. m.* crowded with	**सद्भाव** *m* good disposition
	परिच्छेद *m* discrimination-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri



१६. शुकः

अत्रैकः शुकः पञ्जरे बद्धस्तिष्ठति। पञ्जरात् बहिः शाखायां स्थिता शुकी तस्य माता। सा स्वशावकं बद्धमवलोक्याश्रु मुञ्चन्ती तेन सह भाषते। सा तं किं वदतीति किं जानासि? सा तं वदति—

'वत्स! उक्तं खलु मया न त्वया कोटरान्निर्गन्तव्यम्, कोऽपि त्वां गृह्णीयात्—इति। मम वाक्यमनादृत्य क्रीडितुं कुसुमलतां गतस्त्वम्। यथा मया कथितं तथैव संवृत्तम्'—इति॥

शुकस्तामाह—'अम्ब! मातुर्वाक्यम् अनुल्लङ्घनीयमिति जानाम्येव। अथापि क्रीडासक्तेन मया चापल्यात् तन्नालो-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

चितम्'। सा प्राह—'जात! एव गते त्वयि कथं त्वदेकपुत्रया मया आयुश्शेषो नेयः?' सोऽपृच्छत्—'किमेवं वदसि? किं मम मुक्तिरेव न स्यादस्मात् पञ्जरात्?। सा कथयति—"दृढतराः पञ्जरस्य शलाका निबिडतराश्च। यथा त्वं न पलायेथास्तथा गृहस्वामी जागरूको भविष्यति। कथं ते मुक्तिर्भविष्यति?॥

अत्रान्तरे गृहस्वामी फलहस्तः समागतः। शुकी पलायिता। गृहस्वामी शुकमिमं फलेन रुचिरेणान्नेन च पोषयिष्यति। भाषणं च तं शिक्षयिष्यति। शिक्ष्यमाणाः शुका मनुष्या इव व्यक्तां वाचमुदीरयन्ति। वेदमन्त्रानपि ते पठन्ति। अयमेव शुकानां बन्धने हेतुः॥

शुकानां रूपमपि रमणीयम्। तेषां पक्षौ हरितौ, चञ्चवश्चरणाश्च लोहिताः। केचन शुकाश्चित्रवर्णाः। तेऽतीव रमणीयाः॥

---

१) प्रश्नाः—

१. शुकस्य माता कुत्र स्थिता? २. सा पञ्चरस्थं शुकं किं वदति? ३. शुकः तां किमाह? ४. शुकस्य पञ्जरात् मुक्तिः कुतो न भवेत्? ५. कुत्रान्तरे गृहस्वामी समागतः? ३. गृहस्वामी किं करिष्यति? ७. कः शुकानां बन्धने हेतुः? ८. केऽतीव रमणीयाः शुकाः? ९. अनया कथया कः उपदेशः गृह्यते?

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२) सन्धत्त—(Combine)

वने + अवसत् = । हरे + अव = ।
गुरो + अध्यापय = । ते + अवदन् = ।

३) The following are the 20. **उपसर्ग**s commonly prefixed to the Roots:

अति, अधि, अनु	अप, अपि, अभि,	अव, आ, उत्-उद्,
उप, दुस्-दुर्, नि	निस्-निर्, परा, परि,	प्र, प्रति. वि
	सम् and सु.	

Note: Two or more of the **उपसर्ग**s may also be combined ānd prefixed

e. g. वि + अप + दिश् = व्यपदिशति. 2 उपसर्गौ
सम् + अभि + आ + वर्तते = समभ्यावर्तते. 3 उपसर्गाः

(४) पर्यायाः—

लता (Creeper) २-लता प्रतानिनी वीरुत् वल्ली तु व्रततिर्लता ॥

कोटर *n* hollow of a tree
मुक्ति *f* letting off
शलाका *f* bar of a cage
निबिड *a* dense, thick

जागरूक *a.m.* wakeful i.e., careful
पक्ष *m* wing.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri



१७. उलूखलं मर्दलश्च

कस्मिंश्चित् गृहे भजनोत्सवानन्तरं रात्रौ मर्दलः कश्चिदुलूखलस्य समीपे स्थापितः। मित्रमन्तिके दृष्ट्वा मर्दलः कुशलं पृच्छंस्तेन सह सम्भाषते—

मर्दलः—सखे! अपि कुशलं भवतः? अस्मिन् देशे का वार्ता?

उलूखलम्—मित्र! अस्मिन् देशे मां विहाय सर्वेऽपि कुशलिन एव। अहं परं मन्दभाग्यम्!

मर्दलः—कुतस्त्वं मन्दभाग्यम्? कस्ते दुःखहेतुः?

उलूखलम्—सखे! किं ब्रवीमि! तथापि श्रूयताम्—दुर्भगस्य मे शिरसि धान्यानि निधाय स्त्रियः पुरुषाश्च मां

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मुसलेन निर्दयं ताडयन्ति । केचिदयोदण्डेनापि मां प्रहरन्ति। इत्थं प्रत्यहं महतीं पीडामनुभवामि । किमतः परं कष्टं स्यात् !

मर्दलः—भद्र ! किमिदं मयि निवेद्यते । अहं त्वत्तोऽपि मन्दभाग्यः । त्वं शिरसि परं ताड्यसे । मां तु ताडने समर्थाः जनाः पार्श्वद्वयेऽपि हस्ताभ्यां ताडयन्ति । विशेषतश्च विवाहोत्सवादौ सभामध्ये तीव्रं ताडयन्तो मामवजानन्ति। नैकोऽपि मामनुशोचति । किन्तु सर्वेऽपि सहर्षं शिरः कम्पयन्तो मम ताडनमभिनन्दन्ति । हन्त ! कस्य वाऽन्यस्य स्यादीदृशी दुर्दशा !

लोके हि प्रायेण नान्यस्य दुःखमन्यो जानाति ॥

---

१) प्रश्नाः—

१. मर्दलः कदा कुत्र स्थापितः ? २. तस्मिन् देशे के कुशलिनः ? ३. उलूखलं कीदृशीं पीडामनुभवति ? ४. मर्दलस्य दुर्दशा कीदृशी ? ५. पाठादस्मात् क उपदेशो गृह्यते युष्माभिः ?

२) प्रगृह्य सन्धिः-(एषु सन्धिः न भवति, अयम् एव प्रगृह्य सन्धिः)

कपी + इमौ = कपी इमौ ।
गुरू + आगतौ = गुरू आगतौ ।
फले + अत्रि = फले अत्रि ।
अमी + अश्वाः = अमी अश्वाः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३) 'किम्' शब्दस्य रूपैः वाक्यानि पूरयत—

१) युष्माकं पाठशालायां—विशेषः ?

३) रणाय निर्गतस्य भटस्य—प्रवृत्तिः ?

४) उपसर्गयोगादर्थभेदः—Root 'भू' to be भवति with उपसर्ग prefixed has different meanings.

अनुभवति (enjoys); परिभवति (disregards);

पराभवति (overcomes); प्रभवति (Is able);

सम्भवति (happens); अभिभवति (defeats);

५) पर्यायाः—

उलूखलम् २—उदूखलमुलूखलम् ।

रात्रिः ११ निशा निशीथिनी रात्रिः त्रियामा क्षणदा क्षपा ।

(Night) विभावरीतमस्विन्यौ रजनी यामिनी तमी ॥

उलूखल *n* a wooden mortar used for cleansing rice	मुसल *m. n.* pestle
कुशल *n* welfare	अयोदण्ड *m.* an iron-bar
दुर्भग *a. m.* unfortunate	प्रवृत्ति *f.* news
	वृत्तान्त *m.* news.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri



१८. गजः

मृगजातौ गजो गरिष्ठः। तस्य पादाः स्तम्भा इव स्थूलाः। तस्य कर्णौ शूर्पाविव विशालौ। तस्य नेत्रे तावदत्यल्पे। अथापि सोल्पान्यपि वस्तूनि द्रष्टुं शक्नोति। भूमौ स्थितां सूचिकामपि स पश्यति गृह्णाति च॥

अत एव गजस्य शुण्डा 'हस्तः' इति 'करः' इति च व्यपदिश्यते। तेन गजस्य 'हस्ती' 'करी' इति संज्ञे भवतः। शुण्डैव गजस्य नासिका। तयैव श्वसिति गजः। शुण्डाया अग्रे रन्ध्रमस्ति॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

गजः प्रथमं शुण्डया जलमादाय पश्चात् तन्मुखे निषिञ्चति । एवं द्वाभ्यामवयवाभ्यां जलं पिबन् गजः 'द्विपः' इत्याख्यां भजते ॥

गजानां दृढौ तीक्ष्णौ च द्वौ दन्तौ स्तः । तस्मात् ते 'दन्तिनः', 'दन्तावलाः' 'द्विरदाः' इति कथ्यन्ते । शिल्पिनः करिणां दन्तैः रम्याणि महार्घाणि वस्तूनि निर्मान्ति । करेणूनां दन्तौ न स्तः ॥

यद्यपि गजा वन्या जन्तवः, तथापि ते जनैः कौशलेन गृह्यन्ते, शिक्ष्यन्ते च । साधु शिक्ष्यमाणास्ते जनैः कर्तुमशक्यानि कर्माणि कुर्वन्ति । गुरुतराणि दारूणि कर्षन्ति । शिक्षिता अपि गजास्तदा तदा मदेनोन्माद्यन्ति । तदा तान् आधोरणाः निशितेनाङ्कुशेन नियन्त्रयन्ति ॥

---

१) प्रश्नाः—

१. गजस्य पादाः कीदृशाः ? २. कर्णौ कीदृशौ ? ३. नेत्रे कीदृशे ? ४. नेत्रयोः शक्तिः कीदृशी ? ५. गजस्य शुण्डा हस्तः 'करः' इति व्यपदिश्यते, तत्र कारणं किम् ? ६. गजः 'करी' इति 'द्विपः' इति दन्ती' इति च कुतोऽभिधीयते ? ७. करिणां दन्तैः क उपयोगः ? ८. शिक्ष्यमाणा गजाः कानि कर्माणि कुर्वन्ति ? ९. आधोरणाः केन कदा गजान् नियन्त्रयन्ति ?

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२) लत्व सन्धि :—(तकारस्य दकारस्य वा 'ल' कार: भवति)

अजगरवत् + लम्बते = अजगरवल्लम्बते ।

भगवत् + लीला = भगवल्लीला ।

सुहृद् + लाभ: = सुहृल्लाभ: ॥

३) उपसर्गयोगादर्थभेद:— दिश् दिशति—(to give) । उपदिशति (instructs) व्यपदिशति, (calls) आदिशति, (Commands) निर्दिशति, (directs) उद्दिशति, (Points) सन्दिशति (sends message)

४) अतिशायनार्थका: शब्दा: (Degrees of Comparison) —

Positive	Comparative	Superlative
गुरु:	गरीयान्	गरिष्ठ:

५) पर्याया:—

गज: १२—दन्ती दन्तावलो हस्ती द्विरदोऽनेकपो द्विप: ।
मतङ्गजो गजो नाग: कुञ्जरो वारण: करी ।
आघोरण: ४—आघोरणा हस्तिपका हस्त्यारोहा निषादिन: ॥

गरिष्ठ *a. m.* hugest
शूर्प *m. a.* winnowing basket
सूचिका *f.* a needle
अजगर *m.* a huge serpent which swallows goats
नासिका *f* nose
रन्ध्र *n.* a hole
शिल्पिन् *m* Artisan
करेणु *f.* a female elephant
दारु *n.* timber
निशित *a. m.* sharpened.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१९. दश मूढाः

मूढानां चेष्टितानि प्रायेण विनोदावहानि। यथा हि—एकदा दश मूढाः देशाटनाय प्रस्थिताः। किञ्चिद्दूरं गतानां तेषामुपस्थिता काचिदगाधा नदी। बाहुभ्यां तरन्तस्ते कथमपि नदीं तीर्त्वा पारं गताः॥

आसीत् तेषां मध्ये कश्चन वृद्धः। 'स किं सर्वे तीरमनुप्राप्ताः?' इति जिज्ञासमानस्तान् एकैकशो गणयामास। परं नवैव परिगणितास्तेन। ततः स आक्रोशत्—'अहो! वयं दश प्रस्थिताः। इदानीं नवैव स्मः। नूनम-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

स्माकमेको नद्यां निमग्नः। गवेषयत तम्' इति। ततस्तेषामेकैकोऽपि गणनां चकार। परं नवैव दृश्यन्ते। ततस्तेषां व्याकुलीभूतानां महान् कोलाहलः समजनि।

तत्रैव नातिदूरे कस्यचिद्दृषेः आश्रमोऽवर्तत। तत्र वसन् ऋषिः तेषां विचेष्टितमवलोक्य उच्चैर्जहास। तस्य हासशब्दं श्रुत्वा मूढास्तरसा समुपसृत्य हासकारणमपृच्छन्। ऋषिराह—'अहो! अनात्मज्ञा यूयम्। युष्माकमेकैकोऽपि नात्मानमगणयत् तेनायं व्यामोहः सञ्जातः' इति।

तदाकर्ण्य ते मूढाः सलज्जमधोमुखाः प्रययुः॥

---

१) प्रश्नाः---

१. दश मूढाः कुत्र प्रस्थिताः? २. ते कथं नदीमतरन्?
३. तेषां व्याकुलीभावस्य को हेतुः? ४. ऋषिः कुत उच्चैर्जहास?
५. स तान् किमाह? ६. मूढाः कथं ययुः?

२) जश्त्व सन्धिः—(जश् = 'ज, ब, ग, ड, द' वर्णाः) (ककारस्य गकारः, टकारस्य डकारः, तकारस्य दकारः, पकारस्य बकारश्च भवति)

वाक् + रसः = वाग्रसः।
सम्राट् + भरति = सम्राड्भरति।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

किञ्चित् + दूरम् = किञ्चिद्दूरम् ।

अप् + धारा = अब्धारा ॥

३) उपसर्गयोगादर्थभेदः—स्था (to Stand) तिष्ठति

अनुतिष्ठति (Performs) अधितिष्ठति (Sets),

उत्तिष्ठति (Stands) प्रतिष्ठते (Starts),

उपतिष्ठति (उपतिष्ठते) (approaches) सन्तिष्ठते (ends)

४) पर्यायाः—

मूढः ६—अज्ञे मूढयथाजात मूर्खवैधेयबालिशाः ।

वेगः ६—जवो वेगस्तथा रंहस्तरसी तु रयः स्यदः ।

तीरम् ५—कूलं रोधश्च तीरं च प्रतीरं च तटं त्रिषु ॥

पारम् *n.* opposite bank of a river

एकैकशः *in.* one by one

एकैक *m* every one

व्याकुलीभूत *m. a.* perplexed

कोलाहल *m* a loud and confused noise

अनात्मज्ञ *a. m.* one who does not know himself

व्यामोह *m* perplexity

स्रज् *f.* a garland

सम्राज् *m* a paramount sovereign.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri



२०. कुक्कुटो रत्नं च

एकदा कुक्कुटः कश्चित् पादेनावकरं किरन् ।
ददर्श भासुरं किञ्चिद्रत्नं श्रेष्ठिगृहाङ्गणे ॥ १

कुक्कुटस्यानभिज्ञस्य रत्नलाभेन किं फलम् ?
रत्नमूल्यं कियद्वेति किं स जानाति मन्दधीः ॥ २

अतः स पक्षौ विस्तृत्य विधूय वदनं मुहुः ।
तारं रटन् वक्रवक्त्रस्तद्रत्नं समगर्हयत् ॥ ३

रे रत्न ! शिरसा धृत्वा लोकस्त्वामभिनन्दतु ।
किन्तु धान्यकणेन त्वं नैव सादृश्यमर्हसि ॥ ३

इत्युक्त्वा स च तद्रत्नं पादेनाक्षिप्य दूरतः ।
अन्यत्र गतवान् शीघ्रं धान्यान्वेषणतत्परः ॥ ५

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१) प्रश्नाः—

१. कुक्कुटः कुत्र किं कुर्वन् कीदृशं रत्नं ददर्श ? २. किं कृत्वा स तद्रत्नमगर्हयत् ? ३. कथमगर्हयत् ? ४. अनन्तरं स किं कृतवान् ?

२) सन्धिं विश्लेषयत—

किञ्चिद्रत्नम् । नैव । पादेनाक्षिप्य । तस्मा आम्रफलम् । कियद्वेति । सोऽवर्धत । बुद्धिरपि । इत्युक्त्वा ॥

३) रत्नकुक्कुटयोः कथां गद्यरूपेण लिखित ॥

४) पर्यायाः—

पक्षः ६—गरुत्पक्षच्छदाः पत्रं पतत्रं च तनूरुहम् ॥

किरत् *a. m.* scattering	धान्यकण *m* a grain of corn
अङ्गण *n* a courtyard	सादृश्य *n* equality
कियत् *a. n.* how much	आक्षिप्य *in* throwing off
विधूय *in.* having shaken	

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri



२१. मातापुत्रयोः संभाषणम्

कस्मिंश्चित् दिने सुगुणो नाम बालकः मात्रा सह गृहस्य बहिर्वेदिकायामास्त। तदा कश्चन याचकः समेत्य 'मातः! भिक्षां देहि' इत्ययाचत॥

तदा पुत्रो मातरं पृच्छति—

पुत्रः—अम्ब! कोऽयम्?

माता—वत्स! अयं याचकः।

पुत्रः—याचकः किं करोति?

माता—स भिक्षां याचते। याचनेन यल्लभ्यते तेनोदरं पूरयति।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पुत्रः—किमित्ययं याचनेनोदरं पूरयति? कस्मान्न कर्म करोति?

माता—वत्स! अयमलसः। आलस्येन बाल्ये पाठालयमगत्वाविद्याम् अनभ्यस्य कालमनयत्। न किञ्चिदपि कर्म परिशीलितं तेन।

पुत्रः—विद्यया कथं जीविका निर्वर्त्यते?

माता—विद्यया किं न सिध्यति! विद्यया बुद्धिर्विकसति। बुद्धिमन्तो जनाः स्वाभीष्टं कर्म कर्तुं प्रभवन्ति। तेन सुखेन जीविकां निर्वर्तयन्ति। विद्वान् सर्वत्र पूज्यते।

पुत्रः—अस्तु, अयं याचते खलु। किमनेन प्रतिदिनं भिक्षा लभ्येत?

माता—कथं लभ्येत? कदाचिल्लभ्यते, कदाचिन्न लभ्यते। यदा जनाः भिक्षां न वितरन्ति तदाऽयमञ्जलिं बद्ध्वा पादयोः पतित्वा तान् याचति। यदि तदाऽपि न किञ्चिल्लभते तर्हि बुभुक्षया पीडितः कुत्रापि गत्वा चोरयति।

पुत्रः—किं न चोरं राजपुरुषा बध्नन्ति?

माता—यदि राजपुरुषाः पश्यन्ति तर्हि तं बध्नन्ति, ताडयन्ति, कारां च प्रवेशयन्ति॥

पुत्रः—अम्ब! अहमपि यदि न बाल्ये विद्यामभ्यस्ये तर्हि मयाऽपि याचितव्यं स्यात्। किं न?

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

माता—जात! कः सन्देहः? याचितव्यमेव भवेत्।

पुत्रः—एवं चेत् अहं श्वः प्रभृति पाठालयं गमिष्यामि, विद्यां चाभ्यसिष्यामि॥

माता—वत्स! आलस्यं विहाय विद्याभ्यासे यतस्व। उद्योगी भव। विद्यावन्तमुद्योगिनं च नरं लक्ष्मीः स्वयमेवोपैष्यति। तथा च सुभाषितरत्नाकरः—

"उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः" इति॥

---

१) प्रश्नाः—१. कदा कः 'भिक्षां देहि' इत्ययाचत? २. कुतः स याचकः संवृत्तः? ३. कथं विद्यया जीविका निर्वर्त्यते? ४. कथं चोरो भवति कश्चित्? ५. कदा याचितव्यं भवेत्? ६. कं लक्ष्मीः स्वयमेवोपैष्यति? ७. अस्मिन् पाठे कः उपदेशः गृह्यते?

२) अनुनासिक सन्धिः—('ङ, ञ, ण, म' इमे अनुनासिकाः। वर्णक्रममनुसृत्य 'क' कारस्य 'ङ' कारः इत्येवम् आदेशः भवति)

वाक् + माधुर्यम् = वाङ्माधुर्यम्।
परिव्राट् + नम्यते = परिव्राण्नम्यते।
कस्मात् + नास्ति = कस्मान्नास्ति॥

३) विरुद्धपदानि—कृत्वा × अकृत्वा अभ्यस्य × अनभ्यस्य
गत्वा × अगत्वा विहाय × अविहाय

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

४) न द्रुह्येत्, मा गमः, अनादृत्य, एकैकशः, सहसैव, प्रभृति, एतान्युपयुज्य वाक्यानि रचयत ॥

५) उपसर्गयोगादर्थभेदः—

तॄ (to cross) तरति । अवतरति (descends), वितरति (gives), निस्तरति (over comes)

(अस्—to throw 4th conjugation तुरीयगणस्थः)

अस्—अस्यति । अभ्यस्यति—ते, निरस्यति—ते ॥

६) तव्यप्रत्ययान्तः—Potential Participles

याचितव्यम्, गन्तव्यम्, कर्तव्यम्, द्रष्टव्यम् इत्यादयः ॥

७) पर्यायाः—

माता ४ स्वसा २—जनयित्री प्रसूर्माता जननी भगिनी स्वसा ।

याचकः ५—वनीपको याचनको मार्गणोऽर्थी च याचकः ।

बुद्धिः १४—बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः ।

प्रेक्षोपलब्धिश्चित्संवित् प्रतिपत्तिस्संवेतनाः ॥

बहिर्वेदिका *f* an outer altar

याचक *m.* a beggar

उदर *n* belly

आलस्य *n.* idleness

जीविका *f* livelihood

स्वाभीष्ट *a. n.* liked by oneself

अञ्जलि *m.* hands opened and folded together

कारा *f.* a Jail

बुभुक्षा *f.* hunger

याचितव्य *a. n.* has to be begged

उद्योगिन् *a. m.* Industrious

लक्ष्मी *f.* fortune.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri



२२. चोरो बालकः

कश्चित् बालकः पाठशालायां कस्यापि सहाध्यायिनः पुस्तकमचोरयत्। तत् स गृहमानीय मातुर्हस्तेऽर्पितवान्। तया स तदा तीव्रं दण्डनीय आसीत्। तदकृत्वा सा तस्य कृत्यमभिनन्द्य तस्मा आम्रफलमेकं भक्षणार्थमयच्छत्॥

गच्छति काले यथा यथा सोऽवर्धत तथा तथा तस्य स्तेयबुद्धिरपि वृद्धिं गता। किं बहुना! कालेन स महांश्चोरः संवृत्तः॥

एकदा स रात्रौ सन्धिच्छेदेन कस्यचिद्धनिकस्य गृहं प्राविशत्। गाढं निद्रिता अपि तद्गृहस्था जनाः सन्धिच्छेद-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शब्देन प्रबोधं गताः। तान् सर्वान् स व्यापाद्य महार्घाणि रत्नान्यादाय प्रतस्थे। पथि गच्छन् स रक्षापुरुषैर्गृहीतस्ताडितो दण्डाधिपस्य समीपं नीतश्च ॥

दण्डाधिपः चोरस्य वृत्तान्तम् अवगत्य तस्य वधदण्डं व्यधात्। तदनु वध्यभूमिं नीयमानः स राजपुरुषानब्रवीत्—'भो भोः! सकृन्मे मात्रा सह भाषणमनुमन्यध्वम्'—इति। ततस्तैः साक्रन्दं पृष्ठत आगच्छन्त्या मात्रा सह तस्य भाषणमन्वमन्यत ॥

कुमारस्तस्या कर्णे रहस्यं कथयन्निव तामुपसृत्य तस्याः कर्णं ददंश। 'अहो! मृत्युना गृहीतोऽपि पापोऽयं मात्रे

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

द्रुह्यति' इत्युच्चैरूचुस्तत्र मिलिता जनाः। तदाकर्ण्य कुमारः—'भो जनाः! नाहं पापः। किन्त्वेषैव पुत्रघातिनी राक्षसी। आम्रफलदानेनैषा मम स्तेयासक्तिमवर्धयत्' इत्युक्त्वा स पूर्ववृत्तान्तं तेभ्योऽकथयत् ॥

---

१) प्रश्नाः—

१. कथं स बालश्चोरः संवृत्तः? २. स कुतो रक्षापुरुषैर्गृहीतः? ३. दण्डाधिपः किम् अकरोत्? ४. वध्यभूमिं नीयमानः स राजपुरुषान् किमब्रवीत्? ५. माता कथम् अगच्छत्? ६. तैः किमन्वमन्यत? ७. कुमारः किं चकार? ८. तत्र मिलिता जनाः किमूचुः? ९. तदाकर्ण्य स किमकथयत्? १०. पूर्ववृत्तान्तः कः?

५) रुत्वानुस्वार सन्धिः—रुत्वानुस्वार = 'ांश्' or 'ांस्'।

(नकारस्य शकारः सकारः वा भवति।
ततः पूर्वं अनुस्वारश्च भवति।)

i. महान् + चोरः = महांश्चोरः।
ii. कस्मिन् + चित् = कस्मिंश्चित्।
iii, संशयान् + छिनत्ति = संशयांश्छिनत्ति।
iv. छात्रान् + ताडयति = छात्रांस्ताडयति ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३) उपसर्गयोगादर्थभेदः—मन् (to think) मन्यते । अनुमन्यते (permits) (अपमन्यते—अवमन्यते disregards) संमन्यते = (approves) बहुमन्यते (honours.)

४) पर्यायाः—

बालः २—बालस्तु स्यान्माणवकः ।

युवा ३—वयस्यस्तरुणो युवा ।

चोरः १०—चोरः कुम्भीलकः स्तेनो दस्यु तस्कर मोषकाः ।
प्रतिरोधि परास्कन्दि पाटच्चरमलिम्लुचाः ॥

चोर *m.* a thief
सहाध्यायिन् *m.* a fellow-student
आम्रफल *n* mangofruit
सन्धिच्छेद *m.* making breaches in a wall
प्रबोध *m.* wakefulness
महार्घ *a. n.* highly valuable
रक्षापुरुष *m.* Policeman
दण्डाधिप *m.* chiefmagistrate
वध्यभूमि *f.* place of execution
सकृत् *in.* once
मिलित *a. m.* assembled
पुत्रघातिनी *a. f.* one who has killed her own son
स्तेयासक्ति *f.* habit of stealing

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२३. मूर्खस्योपकारो न कर्तव्यः

कश्चन मूर्खः कदाचित् ग्रामान्तरात् प्रतिनिवर्तमानो निजग्रामगामिनं पन्थानं व्यस्मरत्। अथ पन्थानं पृच्छन्तं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तं मूर्खं जनाः 'नदीतटे दृश्यमानस्य तरोरुपरि वर्त्मना गच्छ'—इत्यवोचन् ॥

ततः स तरुमुपगम्य 'एतस्योपरि खलु मे पन्था जनैरुपदिष्टः इति मत्वा तस्य तरोः पृष्ठमारोहत् । तस्य पृष्ठे सर्पतस्तस्य भारात् तरोः शाखा ननाम । स तां यत्नेनावलम्ब्य यावदतिष्ठत् तावत् कश्चिदाधोरणः गजोपरि स्थितः नद्या आरुह्य तेन पथा समाययौ ॥

तरुशाखावलम्बी मूर्खस्तं हस्त्यारोहं दृष्ट्वा सदैन्यमवोचत्—'महाभाग! मां गृहाण'—इति । तदाकर्ण्य हस्त्यारोहः करुणया तं तरोरवतारयितुं पाणिभ्यां तस्य पादावग्रहीत् । मूर्खस्तु तरुशाखां नामुञ्चत् । अत्रान्तरे गजो निर्गतः । हस्त्यारोहः शाखाग्रलम्बिनस्तस्य पादयोर्ललम्बे ॥

ततः स मूर्खः सम्भ्रान्तो हस्त्यारोहमभ्यधात्—'यदि जानासि तर्हि शीघ्रं किमपि गीतं पठ । गानं श्रुत्वा कोऽप्यागत्य आवामितोऽवतारयेत्'—इति ॥

एवं तेनोक्तः स हस्त्यारोहस्तथा मधुरमगायत् यथा स मूर्खः प्रहृष्टः रसेन करतालिकां दातुं प्रावर्तत । अथ तत्क्षणं सहस्त्यारोहः स मूर्खो नद्यां निपत्य विपेदे । पश्यत! उपकर्तुं प्रवृत्तस्य हस्त्यारोहस्य गतिम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१) प्रश्नाः—

१. पन्थानं पृच्छन्तं मूर्खं के किमवोचन्? २. मूर्खः किमकरोत्? ३. तदा किं संवृत्तम्? ४. तेन पथा कः कथं समाययौ? ५. हस्त्यारोहः किमर्थं मूर्खस्य पादावग्रहीत्? ६. हस्त्यारोहः कुतः मूर्खस्य पादयोः ललम्बे? ७. कः किमर्थम् अगायत्? ८. ततः किमभूत्? ९. पाठादस्मात् क उपदेशो गृह्यते?

२) यावत्—तावत्, यदि—तर्हि; अत्रान्तरे, तत्क्षणम्—

एतानि उपयुज्य वाक्यानि रचयत (use the above in your own sentences.)

३) पर्यायाः—

सत्वरम् ११—अथ क्षिप्रमरं शीघ्रं त्वरितं लघु सत्वरम्।
द्रुतं च त्वरितं तूर्णम् अविलम्बितमाशु च॥

नर्तनम् ६— ताण्डवं नटनं नाट्यं लास्यं नृत्यं च नर्तनम्॥

वर्त्मन् *n.* a way, road
पृष्ठम् *n.* upper side
ननाम *P.* bent
सदैन्यम् *in.* pitiably [one
महाभागः *a. m.* illustrious
हस्त्यारोह *m.* an elephant rider
करतालिका *f.* clapping the hands.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२४. जरासन्धः

पुरा किल बृहद्रथो नाम मगधानां राजा बभूव। स काशिराजस्य द्वे अपि सुते पर्यणयत्। महताऽपि कालेन तस्य वंशकरः सुतो नाजायत। अतः स राट् भृशं दुःखितो राज्यं परित्यज्य भार्याभ्यां सह तपोवनमगच्छत्॥

तत्र चण्डकौशिको नाम मुनिः सभार्यं तं तपसि निरतमपश्यत्। अपृच्छच्च तं तपसः कारणम्। पार्थिवश्चात्मनः सन्ततेरभावं कारणं व्यज्ञापयत्॥

तन्निशम्य सत्यवाक् स महर्षिः आम्रफलमेकं तस्मै दत्त्वा जगाद—'इदं फलं सन्ततिं दास्यति। निवर्तस्व। अलं क्लेशकारिणा तपसा'—इति।

तदादाय प्रहृष्टो नृपः पत्नीभ्यां सहितः स्वपुरम् आजगाम। आगत्य च ताभ्यां तत्फलं प्रायच्छत्। ते उभे अपि तत् फलं द्विधा विभज्य तमभक्षयताम्। कालेनैका सजीवं शरीरार्धं प्रासूत, अपरा चापरमर्धम्। भीता धात्री ते अर्धे वनं नीत्वा क्वचिदुत्ससर्ज॥

अथ जरा नाम राक्षसी पर्यटन्ती तमुद्देशमाजगाम। अवलोक्य च ते शरीरार्धे कौतुकेन संयोजयामास। तदैक-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मूर्तिधरो वरः कुमारः समपद्यत। धार्मिकस्य महीक्षितः देशे वसन्ती सा राक्षसी न तं कुमारं हन्तुमैच्छत् ॥

ततः सा कुमारमादाय राजानमुपगम्याब्रवीत्—'राजन्! अयं ते सुतः पत्नीद्वये जातः, गृह्यताम्'—इति। भूपः सहर्षं तमादाय जरया सन्धितस्य तस्य 'जरासन्धः' इति नाम चक्कार ॥

---

१) प्रश्नाः—

१. किं निमित्तं बृहद्रथो राजा भार्याभ्यां सह तपोवनमगच्छत्? २. तत्र कस्तमपश्यत्? ३. सः राजानं किम् अपृच्छत्? ४. राजा किं व्यज्ञापयत्? ६. राजा किमकरोत्? ७. के किमकुरुताम्? ८. फलभक्षणेन किमभवत्? ९. जरा नाम राक्षसी किं चकार? १०. पुत्रस्य तथा नामकरणे को हेतुः?

२) श्चुत्व सन्धिः—(तवर्गस्य चवर्गेण संयोगे यथाक्रमं चवर्गः भवति)

तस्मात् + च = तस्माच्च
जलात् + जायते = जलाज्जायते।
अरीन् + जयति = अरीञ्जयति।
तत् + छलम् = तच्छलम्
सुहृत् + छद्म = सुहृच्छद्म ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३) सन्धि विश्लेषयत—(split)

पादावग्रहीत् । यल्लभ्यते । दण्डनीय आसीत् । प्राविशत् ।
अपृच्छच्च । कालेनैका । चात्मनः । तदैकमूर्तिधरः ।

४) उपसर्गान् पृथक्कृत्य दर्शयत—

आरभत । उद्धरन्ति । समाययौ । सञ्चरति ।

५) उपसर्गयोगादर्थभेदः—

१) नी (to lead) = नयति । आनयति (brings)
निर्णयति (decides) परिणयति (marries)
अनुनयति (passifies) अपनयति (removes)
उपनयति (leads near) विनयति-ते (tames)

२) गम्, गच्छ् (to go) गच्छति। अवगच्छति (understands)
उद्गच्छति (Rises) निर्गच्छति (goes out)
अनुगच्छति (follows) अधिगच्छति (attains)
आगच्छति (comes) उपगच्छति (approaches)
प्रतिगच्छति goes towards संगच्छति (unites)

३) भज् (to serve) = भजति । विभजति (divides)

४) सृज् (to create) = सृजति । संसृजति (joins)
विसृजति-उत्सृजति (sends)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

६) पर्यायाः—

राजा ६—राजा राट् पार्थिवक्ष्माभृन्नृपभूपमहीक्षितः ।

कुतूहलम् ४—कौतूहलं कौतुकं च कुतुकं च कुतूहलम् ।

सन्तोषः १२—मुत् प्रीतिः प्रमदो हर्षः प्रमोदामोदसम्मदाः ।
स्यादानन्दथुरानन्द, शर्मशातसुखानि च ॥

७) नानार्थाः—(Words having various meanings)

Page	Reference	
		स्वर्गेषुपशुवाग्वज्र दिङ्नेत्रघृणिभूजले
8	गो	लक्ष्यदृष्ट्या स्त्रियां पुंसि गौर्लिङ्गम् ॥
58 & 90	अहो.	अहो धिगर्थे शौके च करुणार्थ विषादयोः संबोधने प्रशंसायां विस्मये पादुपूरणे । असूयायां वितर्के च प्रायशोऽहो प्रयुज्यते अहो बतानुकम्पायांखेदामन्त्रणयोस्तथा ॥
93	कुलम्	कुलं गोत्रं च गेहे च सजातीयगणेऽपिच ॥

वंशकर *a. m.* founding a family
निरत *a. m.* engaged in
सत्यवाक् *a. m.* one whose words are true
धात्री *f* a nurse
उत्ससर्ज *P.* threw away
कौतुक *n* curiosity
सन्धित *a. m.* joined together
व्यज्ञापयत् *P.* informed
जगाद *P.* told.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri



२५. चन्द्रोदयः

पश्य! पूर्वाद्रिशिखरे चन्द्रमाश्चारुमण्डलः।
भाति क्रीडाङ्गणे न्यस्तः सौवर्ण इव कन्दुकः॥ १
अथवा तमसा व्याप्तं जगद्दीपयितुं क्षमः।
सर्वानन्दकरो विद्युत्प्रदीप इव भात्ययम्॥ २
अथवा व्योमकाशारे नक्षत्रकुमुदान्विते।
पयोदशैवलाकीर्णे भात्ययं राजहंसवत्॥ ३
भासुरैस्तस्य किरणैः अभिव्याप्ता वसुन्धरा।
हैमद्रवविलिप्तेव भाति सर्वमनोहरा॥ ४
भासयन् जगतीं सर्वां घनध्वान्तं व्यपोहयन्।
चन्द्रश्चन्द्र इवाभाति न तस्य सदृशः क्वचित्॥ ५

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१) प्रश्नाः—

१. चन्द्रमाः कः क इव भाति ? २. वसुन्धरा का इव भाति ? केन हेतुना ? ३. कीदृशस्य तस्य न सदृशोऽस्ति ?

२) ष्टुत्व सन्धिः—(तवर्गस्य टवर्गेण योगे यथाक्रमं टवर्गः भवति)

उत् + टङ्कते = उट्टङ्कते । चक्रिन् + ढौकसे = चक्रिण्ढौकसे ।

तद् + टीका = तट्टीका । षड् + नवतिः = षण्णवतिः ॥

३) पर्यायाः—

चन्द्रः २० —हिमांशुश्चन्द्रमाश्चन्द्र इन्दुः कुमुदबान्धवः ।
विधुः सुधांशुः शीतांशुः औषधीशो निशापतिः ।
अब्जो जैवातृकः सोमो ग्लौर्मृगाङ्कः कलानिधिः ।
द्विजराजः शशधरो नक्षत्रेशः क्षपाकरः ॥

नक्षत्रम् ६—नक्षत्रमृक्षं भं तारा तारकाऽप्युडु वा स्त्रियाम् ॥

पूर्वाद्रि *m.* the eastern mountain behind which the Sun and the Moon are supposed to rise
चन्द्रमस् *m.* moon
विद्युत्प्रदीप *m.* electric light
तमस् *n.* darkness
अभिव्याप्त *a. m.* covered with
क्षम *m.* capable
भासुर *a. m.* shining
कासार *m. n.* a lake
कुमुद *n* a night-lotus
पयोद *m.* a cloud
शैवल *n.* moss
वसुन्धरा *f.* earth
हैमद्रव *m.* gold fluid
घन *a. m.* thick
ध्यान्त *n.* darkness

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१६. पितापुत्रयोः संभाषणम्

एकस्मिन् दिवसे गोपालो नाम बालकः पाठशालायां गोविन्दं नाम सहपाठिनं दुर्वचनैरनिन्दत्। तां प्रवृत्तिमुपाध्यायो गोपालस्य पित्रे सन्दिष्टवान्। पिता सायं पाठालयादागतं गोपालमाहूय, पृच्छति—

पिता—वत्स! अद्य पाठालये त्वया किमपि दुश्चेष्टितं कृतमिति श्रुतं मया। अपि तत् सत्यम्?

पुत्रः—तात! सत्यमेव तत्। प्रथमं गोविन्दो मामनिन्दत्। पश्चादहं तमनिन्दम्। स मां प्राहरत्। अहमुच्चैराक्रोशम्। सोऽप्याक्रोशत्।

पिता—तदानीमुपाध्यायः किं नासीत्?

पुत्रः—आसीदुपाध्यायः। सोऽध्यापयन्नवर्तत। आवयोराक्रोशं श्रुत्वा स भृशं कुपितोऽभूत्।

पिता—कुपितः किमकरोत्?

पुत्रः—स सत्वरं पीठादुत्थाय आवयोः समीपम् आगतः।

पिता—ततः किमकरोत्?

पुत्रः—ततः उपाध्यायः 'अरे! हस्तं प्रसारय' इति गोविन्दमवोचत्। गोविन्दो हस्तं प्रासारयत्। ततस्तं हस्ते वेत्रकाष्ठेनाताडयत्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पिता—मन्ये तद्वत् त्वयाऽपि दुश्चेष्टितस्य फलम् अनुभूतमिति।

पुत्रः—तात! मामप्युपाध्यायो 'हस्तं प्रसारय' इत्यवादीत्। नाहं प्रासारयम्।

पिता—रे! उपाध्यायस्य वचनं न कृतम्? अस्तु। ततः किमभूत्?

पुत्रः—ततो मामुपाध्यायः संरुष्टः 'पुस्तकानि गृहीत्वा त्वमितो याहि' इत्यवोचत्। अहं दण्डभयेन ततो निर्गत्य गृहमागतः।

पिता—अरे दुष्ट! दण्डभयेन ततो निर्गतस्त्वं द्विगुणं दण्डमर्हसि। (इत्युक्त्वा स वेत्रकाष्ठं हस्तेन गृहीतवान्)

पुत्रः—तात! अयमेकोऽपराधः क्षम्यताम्। इतः परं नैनं करिष्यामि।

पिता—वत्स! तव सत्यवचनेन तुष्यामि। इतः परमीदृशे कर्मणि मा प्रवर्तस्व। आचार्यदेवो भव। सतां मतिमतां च बालकानां पन्थानमनुयाहि।
'अकृत्वा परसन्तापम् अगत्वा खलमन्दिरम्।
अनुत्सृज्य सतां वर्त्म यत् स्वल्पमपि तद्बहु'॥
(सुभाषितरत्नाकरात् उद्धृतम्)

———

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१) प्रश्नाः—

१. कां प्रवृत्तिमुपाध्यायः गोपालस्य पित्रे सन्दिष्टवान् ? २. गोपालस्य पिता किमकरोत् ? ३. गोपालेन पाठालये कृतं दुश्चेष्टितं किम् ? ४. किमर्थं सः तथा अकरोत् ? ५. उपाध्यायः किमिति गोपाले कुपितोऽभूत् ? ६. स कुपितः किमकरोत् ? ७. पिता कुपितः किं व्यधात् ? ८. कथं पितुः कोपः शान्तः ? ९. पिता पुत्रं किमुपदिष्टवान् ?

२) सन्धि विश्लेषयत—(split up)

सौवर्ण इव । भात्ययम् । चन्द्रश्चन्द्रः । विलिप्तेव । सहसैव । एतस्योपरि । तस्मा आम्रफलम् ॥

३) अनुनासिकद्वित्वसन्धिः—(ह्रस्वात् परस्य नकारस्य 'अचा योगे द्वित्वं भवति)

अध्यापयन् + अवर्तत = अध्यापयन्नवर्तत ।
एकस्मिन् + अहनि = एकस्मिन्नहनि ।
सन् + अच्युतः = सन्नच्युतः ।
कथयन् + इव = कथयन्निव ॥

४) उपसर्गयोगादर्थभेदः—वृत् (to be) = वर्तते ।

अतिवर्तते (Overtakes), अनुवर्तते (follows), परिवर्तते—विवर्तते (turns round), प्रत्यावर्तते—निवर्तते—(comes back) उपावर्तते (approaches)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

५) पर्यायाः—

पुत्रः ६—आत्मजस्तनयः सूनुः सुतः पुत्रस्तनूभवः ।

पिता ३—तातस्तु जनकः पिता ।

कोपः ७—कोपक्रोधामर्षरोषप्रतिघाः रुट्क्रुधौ स्त्रियाम् ।

सत्यम् ६—सत्यं तथ्यमृतं सम्यक् यथार्थोऽवितथं तथा ॥

दुश्चेष्टित *n.* a wicked act
पश्चात् *in.* afterwards
आक्रोश *m.* a loud cry
वेत्रकाष्ठ *n.* cane
दण्डभय *n.* fear of punishment
द्विगुण *n.* double
अपराध *m.* a fault
सन्ताप *m.* pain
मन्दिर *n.* house
अनुत्सृज्य *in.* not having given up.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२७. महाकविः श्रीकालिदासः

पुरा भोजस्य राज्ञः सभायां परश्शताः कवयोऽभूवन्। तेषामेकः कालिदासो नाम। कालिदासः प्रतिभया सर्वानन्यान् कवीनत्यशेत। तेन भोजराजस्य तस्मिन् महानादरः। तमेव स कवीनां चक्रवर्तिनममन्यत॥

इतरे कवयः तदसहमानाः परोक्षे भोजं राजानमनिन्दन्। अयं वृत्तान्तः कथञ्चित् भोजस्य कर्णमागतः॥

एकस्मिन्नहनि राजा सर्वान् कवीनाहूय 'क-ख-ग घ' इत्येतां 'समस्यां' दत्वा तानब्रवीत्—'यः समस्यामिमां पूरयिष्यति स एव कवीनां चक्रवर्ती भविष्यति' इति। एवमुक्त्वा तान् विससर्ज॥

गृहमेत्य सर्वे कवयः सर्वान् व्यापारान् परित्यज्य समस्यायाः पूरणे निरता बभूवुः। परं नैकोऽपि समस्यां पूरयितुं शशाक। परेद्युस्ते राजसभामेत्य म्लानमुखाः तस्थुः॥

कालिदासस्तु सभां प्रति चलन् मार्गे तालपत्रमयं पुस्तकमादाय पाठशालां गच्छन्तीं बालिकामपश्यत्। सा च तं दृष्ट्वा सविनयं प्रणनाम। तेन तस्यां प्रीतः कविः क्षणं तया सह सँल्लपति—

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कालिदासः—का त्वं बाले ?

बालिका—काञ्चनमाला ।

कालिदासः—कस्याः पुत्री ?

बालिका—कनकलतायाः ।

कालिदासः—हस्ते किं ते ?

बालिका—तालीपत्रम् ।

कालिदासः—का वा रेखा ?

बालिका-क-ख-ग-घ ॥

तया सहैवं सँल्लप्य कालिदासः सभामगच्छत्। ततो राजा प्राह—'भो भोः कवयः ! कवयः ! पठ्यतां यदि पूरिता समस्या' सर्वे निर्वचना अधोमुखाः स्थिताः। अथ कालिदासः पीठादुत्थाय व्यजिज्ञपत्—'राजन् मया पूरिता समस्या'। राजा प्राह—'पठ्यताम्' कालिदासः पठति—

का त्वं बाले ? काञ्चनमाला
कस्याः पुत्री ? कनकलतायाः ।
हस्ते किं ते ? तालीपत्रं
का वा रेखा ? क—ख—ग—घ ॥

श्लोकमिमं श्रुत्वा सर्वेऽपि कवयः त्यक्तमत्सराः कालिदासमेव कवीनां सार्वभौममन्वमन्यन्त ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१) प्रश्नाः—

१. कालिदासो नाम कविः कुत्रासीत् ? २. कः कुतस्तं कवीनां चक्रवर्तिनममन्यत ? ३. इतरे कवयः किमकुर्वन् ? ४. राजा कां समस्यां दत्वा तान् किमब्रवीत् ? ५. सर्वे कवयः किं चक्रुः ? ६. अपि ते समस्यामपूरयन् ? ७. कालिदासः कथं तामपूरयत् ? ८. कालिदासेन रचितः श्लोकः कः ? ९. श्लोकमिमं श्रुत्वा सर्वेऽपि किमकुर्वन् ?

२) छत्वसन्धिः—तकारात् दकारात् वा परस्य शकारस्य 'छकारः' भवति)

तत् + शिवः = तच्छिवः ।
तत् + श्लोकेन = तच्छ्लोकेन ।
तत् + श्रुत्वा = तच्छ्रुत्वा ।
अवदत् + शठः = अवदच्छठः ।
मृद् + शकटिकम् = मृच्छकटिकम् ॥

३) उपसर्गयोगादर्थभेदः—

लप् (to say)=लपति । प्रलपति, (chatters)
विलपति (Cries), आलपति-सँल्लपति (converses)

४) पदानाम् अर्थः—

१) चक्रवर्ती सार्वभौमो नृपोऽन्यो मण्डलेश्वरः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२) समस्या तु समासार्था किंवदन्ती जनश्रुतिः ।

३) विप्रलापो विरोधोक्तिः सँल्लापो भाषणं मिथः ॥

टिप्पणम्—

१) चक्रवर्ती, सार्वभौमः इति द्वौ पर्यायौ आसमुद्रक्षितीशस्य । तदन्यो नृपो मण्डलेश्वरः—इति ।

२) या समासार्था पूरणीयार्था सा 'समस्या' । यथा 'क-ख-ग-घ' इति समस्या । तत्पूरणं यथा ।—

का त्वं बाले काञ्चनमाला, कस्याः पुत्री कनकलतायाः ।
हस्ते किं ते तालीपत्रम्, का वा रेखा 'क·ख ग-घ' ॥

३) विप्रलापः, विरोधोक्तिः—इति अन्योन्य विरुद्धभाषणस्य । सँल्लापः-परस्परं युक्तिप्रयुक्तियुक्तं भाषणम् ॥

परश्शताः *a. m.* more than a hundred

प्रतिभा *f* genius

अत्यशेत *A.* excelled

चक्रवर्ती *m.* an emperor

परोक्षे *in.* behind one's back

समस्या part of a stanza given to be completed

व्यापार *m.* engagement

परेद्युः in next day

म्लानमुखाः *a. m.* with their dejected faces

तालीपत्रमय *a. n.* consisting of palm leaves

निर्वचनाः *a. m.* without-words

त्यक्तमत्सर *a. m.* giving up envy..

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२८. सीताविवाहः

पुरा मिथिलायां जनको नाम राजा बभूव। तस्य सुता सीता नाम। सा रूपे शीले चानुपमा बभूव। तां परिणेतुमिच्छन्तोऽनेके राजकुमाराः जनकाय दूतान् प्रेषयामासुः॥

जनकस्तु तां वीर्यसम्पन्नाय क्षत्रियकुमाराय दातुमैच्छत्। अतः स तां वीर्येण क्रेतव्यामकल्पयत्। तथा हि—तस्य सकाशे गुरुतरं किमपि धनुरासीत्। 'य इदं धनुरुद्धृत्य अस्मिन् शरं सन्धत्ते स मम सुतां परिणेष्यति' इति जनकः प्रतिजज्ञे॥

तां तस्य प्रतिज्ञां श्रुत्वा शतशो राजकुमाराः समाजग्मुः; परं नैकोऽपि तेषां तद्धनुश्चलयितुमपि शशाक। 'लङ्काधिपतिः रावणोऽपि साटोपं समेत्य सलज्जं प्रतिनिवृत्तः' इति ज्ञायते॥

सर्वान् राजकुमारान् प्रतिनिवृत्तान् विलोक्य 'को मे दुहितुर्भर्ता भविष्यति!' इति चिन्तापरोऽभूज्जनकः। अत्रान्तरेऽयोध्याधिपतेः दशरथस्य पुत्रः श्रीरामः सलक्ष्मणो विश्वामित्रेण तत्रानीयत। श्रीरामो महर्षेः विश्वामित्रस्य वचनेन लीलयैव तद्धनुरुद्धृत्य यावत् तस्मिन् बाणमारोपयति तावत् तद्धनुर्द्वेधा भग्नमभूत्॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

साधु साध्विति ब्रुवाणाः श्रीरामस्य वीर्यं प्रशशंसुर्जनाः ॥

जनकस्य राज्ञो हृदयं प्रहृष्टमभूत्। ततः स दशरथादीन् आनाय्य महता विभवेन सीतारामयोः विवाहोत्सवं निरवर्तयत् ॥

तथा च श्रीमद्वाल्मीकिरामायणे बालकाण्डे त्रिसप्ततितमः सर्गः—

'अब्रवीज्जनको राजा कौसल्यानन्दवर्धनम् ।
इयं सीता मम सुता सहधर्मचरी तव ॥
प्रतीच्छ चैनां भद्रं ते पाणिं गृह्णीष्व पाणिना ।
पतिव्रता महाभागा छायेवानुगता तव' ॥

---

१) प्रश्नाः—

१. कां परिणेतुमिच्छन्तोऽनेके राजकुमाराः कस्मै दूतान् प्रेषयामासुः ? २. जनकः किं प्रतिजज्ञे ? ३. तस्य प्रतिज्ञां श्रुत्वा के समागताः ? ४. किन्निमित्तं चिन्तापरोऽभूज्जनकः ? ५. अत्रान्तरे कस्तत्रानीयत ? ६. धनुः कदा द्वेधा भग्नमभूत् ? ७. के कथं प्रशशंसुः ? ८. कस्य हृदयं प्रहृष्टमभूत् ? ९. ततो जनकः सीताविवाहं कथं निरवर्तयत् ?

२) रेफलोप सन्धिः—(द्वयोः रेफयोः संयोगे आद्यस्य रेफस्य लोपः' ततः पूर्वस्य अचः दीर्घश्च भवतः)

अधिपतिः + रावणः = अधिपती रावणः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

यतिः + राजते = यती राजते ।
पुनः + रमते = पुना रमते ।
गुरुः + रेजे = गुरू रेजे ।

३) क्रियाविशेषणानि सङ्ख्याव्ययानि—

एकधा (In one way), द्विधा or द्वेधा (In two ways) त्रिधा or त्रेधा, (In three ways) चतुर्धा, पञ्चधा, षड्धा or षोढा, सप्तधा, अष्टधा, नवधा, दशधा, शतधा, सहस्रधा, बहुधा (In many ways) (अनेकधा) (In various ways) कतिधा (In how many ways)

४) पर्यायाः—

शीलम् ५—निष्ठा शीलं च चारित्रं चरित्रं चरितं तथा
दूतः २—स्याद् सन्देशहरो दूतः ॥

अनुपमा *f* matchless
दूत *m* messenger
वीर्य *n* valour
क्रेतव्या *a·f.* fit to be bought i, e., won
संधत्ते *A* fixes
गुरुतर *n* heavier
परिणेष्यति *P.* will marry
उद्धृत्य *ind.* having taken
सकाशे *m* in one's possession
शतशः *in* in hundreds
साटोपम् *in* in a stately manner
लीलया *f* with ease
निरवर्तयत् *A* performed

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२९. विरक्तः महर्षिः

अहो! रम्यः शान्तश्च अयमाश्रमः। आश्रमस्य पार्श्वे प्रसन्ना नदी प्रवहति। आश्रमं परितस्तरवो लताश्च पुष्पितास्तिष्ठन्ति। अयं महर्षिः इदानीमीश्वरं ध्यायति॥

अस्य निकटे विद्यामभ्यस्यन्ति बहवः छात्राः। अयमतीव विरक्तो महर्षिः। नास्य धने स्पृहा वर्तते। महार्घाणि रत्नान्यप्ययं लोष्टवत् पश्यति। अतः शिष्यैः स्वयं भक्त्या दीयमानामपि गुरुदक्षिणां नायं प्रतीच्छति॥

एकदा कश्चित् राजकुमारोऽस्मात् विद्यामध्यैत। समाप्तविद्यः स गुरुं गुरुदक्षिणया तोषयितुमिच्छन् महता धनव्ययेन रत्नालङ्कृतं हैमं कङ्कणद्वयं कारयित्वा ऋषेः समीपमाजगाम॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ऋषिः सायं नद्यास्तीरे शिलायामासीनः प्रकृतेश्चारुतां पश्यन्नवर्तत। राजकुमारस्तमुपसृत्य कङ्कणद्वयं तस्मै समर्प्य प्राञ्जलिस्तस्थौ। ऋषिस्तयोः कङ्कणयोश्चारुतामवेक्षमाण इव ते निरूपयामास। अथ तयोरेकं स्वयमेव हस्तात् परिभ्रष्टमिति व्याजेन नद्यां पातयामास। अत्रान्तरे राजकुमारः प्रकृतेश्चारुतां पश्यन्नासीत्। विदितवृत्तान्तस्य राजकुमारस्य प्राणा उत्क्रान्ता इवाभवन्॥

अथ राजकुमारः 'स्वयमेव नद्यां निपत्य तत् ग्रहीष्यामि' इति मत्वा ऋषिमपृच्छत्—'भगवन्! कुत्र तत् पतितम्?' इति। ऋषिरपि व्याकुल इव भूत्वा 'अत्र तत् पतितम्' इति दर्शयन् द्वितीयमपि कङ्कणं नद्यां प्राक्षिपत्। राजकुमारः परिदूनो लज्जितश्च प्रत्यगात्॥

१) प्रश्नाः—

१. कीदृशोऽयमाश्रमः? २. अयं महर्षिरिदानीं किं करोति? ३. कुतो नायं गुरुदक्षिणां प्रतीच्छति? ४. शिष्यः राजकुमारः किमकरोत्? ५. ऋषिः किं चकार? ६. कुतो राजकुमारस्य प्राणा उत्क्रान्ता इवाभवन्? ७. स ऋषिं किमपृच्छत्? ८. ऋषिः किमकरोत्?

२) 'अर्' सन्धिः—(अकारस्य आकारस्य वा ऋकारेण योगे द्वयोः वर्णयोः 'अर्' भवति)

महा + ऋषिः=महर्षिः। वसन्त + ऋतुः = वसन्तर्तुः।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

देव + ऋषिः = देवर्षिः । पुरुष + ऋषभः = पुरुषर्षभः ।
सप्त + ऋषयः = सप्तर्षयः । देव + ऋणम् = देवर्णम् ॥

३) उपसर्गयोगादर्थभेदः—वह् (to carry) = वहति ।

१) उद्वहति विवहति (marries,) प्रवहति (flows,)
निर्वहति (carries out) आवहति (Produces)

२) क्षिप् (to throw)=क्षिपति । अधिक्षिपति (insults)
आक्षिपति (questions) निक्षिपति (places)
संक्षिपति (abridges) प्रक्षिपति (throws)

४) पर्यायाः—

आश्रमः ४ आश्रमो मुनिवेश्म स्यात् पर्णशालोटजोऽस्त्रियाम् ।
तापसः ५—तपस्वी तापसः पारिकाङ्क्षी वाचंयमी मुनिः ।
ऋषिः २, वर्णी २—ऋषयः सत्यवचसः वर्णिनो ब्रह्मचारिणः ॥

अहो *in.* How great or wonderful
आश्रम *m. n.* hermitage
विरक्त *a. m.* free from passion
लोष्टवत् *in.* like a lump of earth
अधीत *A.* learnt
कङ्कणद्वय *n.* a pair of bangles
चारुता *f.* beauty
प्राञ्जलि *m.* with hands folded together
उत्क्रान्त *a. m.* departed
परिदून *a. m.* very much pained.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३०. चित्रश्लोकाः (Charming Slokas)

कस्तूरी जायते कस्मात् ?
को हन्ति करिणां कुलम् ?
किं कुर्यात् कातरो युद्धे ?
मृगात् सिंहः पलायते ॥ १

अस्ति कुक्षिः शिरो नास्ति
बाहुरस्ति निरङ्गुलिः ।
अपदो नरभक्षी च
यो जानाति स पण्डितः ॥ २

अपदो दूरगामी च
साक्षरो न च पण्डितः ।
अमुखः स्फुटवक्ता च
यो जानाति स पण्डितः ॥ ३

सीमन्तिनीषु का शान्ता ?
राजा कोऽभूद्गुणोत्तमः ? ।
विद्वद्भिः का सदा वन्द्या ?
तत्रैवोक्तं न बुध्यते ॥ ४

कुलालस्य गृहेऽस्त्यर्धं
तदर्धं हस्तिनापुरे ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

लङ्कायामपि तद्युग्मं
यो जानाति स कोविदः ॥ ५

अम्लानपङ्कजा माला
कण्ठे रामस्य सीतया ।
मुधा बुधा भ्रमन्त्यत्र
प्रत्यक्षेपि क्रियापदे ॥ ६

विराटनगरे रम्ये
कीचकादुपकीचकम् ।
अत्र क्रियापदं वक्त्रे
हैमं दास्यामि कङ्कणम् ॥ ७

Note: Each Sloka Contains Questions and their Answers like **प्रश्नोत्तरमाला** ।

१) उत्तराणि (Answers)

१. (1) मृगात्, (2) सिंहः (3) पलायते—इत्येतानि क्रमेण त्रयाणां प्रश्नानामुत्तरत्वेन द्रष्टव्यानि । २, कञ्चुः (coat)। ३. लेखः (Letter)। ४. प्रति-प्रश्नम् आद्यन्ताक्षरयोः मेलने तत्तत्प्रश्नस्योत्तरं सम्पद्यते—सीता, रामः, विद्या । ५. (1) कुम्भः (2) कर्णः (3) कुम्भकर्णः । ६. 'प्रत्यक्षेपि' इत्येतत् क्रियापदम्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

७. 'आट' इति क्रियापदम्, अटतेर्लिट्, (Past tense of अट् to roam) विः, (Bird) आट (wandered) इति छेदः ॥

२) सन्धिं विश्लेषयत—

पश्यन्नवर्तत । लीलयैव । बाहुरस्ति । तत्रैवोक्तम् ॥

३) किं बहुना, कथञ्चित्, नाम—एतान्युपयुज्य वाक्यानि रचयत ॥

४) उपसर्गयोगादर्थभेदः—

ज्ञा (to know) = जानाति । अनुजानाति (Permits), अवजानाति (Disregards), प्रतिजानाति (Promises)

५) पर्यायाः—

हस्तः ८—भुजबाहू प्रवेष्टो दोः पाणिर्हस्तः शयः करः ॥

कस्तूरी *f.* musk
कुल *n.* a herd
कातर *n. m.* cowardly
मृग *m.* a deer
कुक्षि *f.* belly
साक्षर *a. m.* possessed of letters
सीमन्तिनी *f.* a woman
कुलाल *m.* a potter
युग्म *n.* a pair
कीचक *m.* a bamboo rattling in the wind
हैम *a. n.* made of gold.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri



३१. काकोलूकीयम्

एकदा पक्षिणः सम्भूय मन्त्रयामासुः—'अस्माकं राजा वैनतेयः। स च वासुदेवस्य सेवायां तत्परो नास्माकं कामपि चिन्तां करोति। किं तेन राज्ञा नः प्रयोजनम्? अतोऽन्यं कमपि राज्येऽभिषिञ्चामः'—इति। एवं निश्चित्य तैः भद्राकारम् उलूकम् अवलोक्याभिहितम्—'एष उलूकः अस्माकं राजा भविष्यति। सम्पाद्यन्तां पट्टाभिषेकसम्बन्धिनः सम्भाराः'—इति॥

अथ समानीतानि विविधतीर्थोदकानि। प्रदत्तं सिंहासनम्। प्रसारितं व्याघ्रचर्म। प्रज्वलिता दीपाः। आरब्धानि वाद्यानि। युवतयो गानम् आरभन्त। आनीता

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पट्टमहिषी कृकालिका। उलूकोऽभिषेकार्थं सिंहासनमारोपितः। जरद्गवोऽभिषेकार्थं हेमकुम्भं हस्तेन धृतवान्॥

अत्रान्तरे वायसः कश्चित् तत्र समायातः। अपृच्छच्च—अहो! किमेष सकलानां पक्षिणां समागमो महोत्सवश्च?'—इति। यथास्थितं निवेदयामासुः पक्षिणः॥

अथ काको विहस्याह—'अहो! न युक्तम् एतत्! किमिति हंसादिषु पक्षिषु विद्यमानेषु दिवान्धस्य क्रियतेऽभिषेकः? श्रोतव्यं सर्वैः—

'वक्रनासं सुजिह्माक्षं क्रूरमप्रियदर्शनम्।
उलूकं नृपतिं कृत्वा का नः सिद्धिर्भविष्यति"

तस्योपदेशं श्रुत्वा—'साध्वनेनाभिहितम्। पार्थिवार्थमधिकृत्य भूयः समेत्य मन्त्रयिष्यामहे' इति ब्रुवाणाः सर्वे पक्षिणः यथाभिमतं गताः। दिवान्धः केवलं सिंहासनोपविष्टः कृकालिकया सहास्ते। आह च—'कः कोऽत्र भोः? किमद्यापि न क्रियतेऽभिषेकः' इति॥

ततः कृकालिकयाऽभिहितम्—'तवाभिषेके कृतोऽयं विघ्नो वायसेन। गताः सर्वे पक्षिणः। तत् त्वमुत्तिष्ठ। स्वाश्रयं त्वां प्रापयामि'—इति। ततः स दिवान्धः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कृकालिकया दर्श्यमानमार्गः सविषादं स्वाश्रयं जगाम। ततः प्रभृति काकानाम् उलूकानां च शाश्वतिकः विरोधः अभवत्॥

(पञ्चतन्त्रसंग्रहात् उद्धृतम्)

Note : काकोलूकीयम् = Natural enemity of the काक and the उलूक (owl). Also the name of the third तन्त्र in पञ्चतन्त्र।

१) प्रश्नाः—

१. एकदा पक्षिणः सम्भूय किं मन्त्रयामासुः? २. उलूकमवलोक्य तैः किमभिहितम्? ३. अथ किं वृत्तम्? ४. केन कथं पट्टाभिषेकस्य विघ्नः कृतः? ५. पक्षिणः किम् अभिहितवन्तः कृतवन्तश्च? ६. दिवान्धः किं चकार? ७. उलूकः कथं स्वाश्रयं गतः? ८. काकानाम् उलूकानां च विरोधः कथं अभवत्?

२) पूर्वसवर्ण सन्धिः—

दिक् + हसति = दिग्घसति। उत् + हृत्य = उद्धृत्य।
वाक् + हरति = वाग्घरति। अवदत् + हरिः = अवदद्धरिः॥
सत् + हेतुः = सद्धेतुः। रामात् + हि = रामाद्धि।
तत् + हितम् = तद्धितम्। कश्चित् + हयः = कश्चिद्धयः॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३) परसवर्ण सन्धि :—

सम् + कीर्तयति=सङ्कीर्तयति। शत्रुम् + जयति = शत्रुञ्जयति।
शम् + करः = शङ्करः सम् + छन्नम् = सञ्छन्नम्।
सम् + चिनोति=सञ्चिनोति। सम् + तरति = सन्तरति॥

४) उपसर्गान् पृथक्कृत्य दर्शयत—

अभिषिञ्चामः। निरवर्तयत्। प्रत्यगात्। पलायते॥

५) पर्यायाः—

उलूकः ९—उलूको वक्रनासश्च वायसारातिपेचकौ।
(owl) दिवान्धः कौशिको घूको दिवाभीतो निशाटनः॥
विघ्न ३—विघ्नोऽन्तरायः प्रत्यूहः॥
क्षणः ५—अथ क्षणः स्यादुद्धर्षो मह उद्धव उत्सवः।

वैनतेय *m.* गरुड
सम्भार Preparation
जरद्धव *m.* and old vulture
हेमकुम्भ *m.* golden jar
वायस *m.* a crow
दिवान्ध *m.* an owl
पार्थिवार्थ *m* the question of coronation of a King
भूय *in.* again
कृकालिका *f* she owl
स्वाश्रय *a. m.* one's abode

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri



३२. फलानि

चित्रेऽस्मिन् आम्रं पनसं कदलीफलं सीताफलं द्राक्षा मातुलङ्गम् इत्यादीनि विविधानि फलानि सन्ति। उपरिष्टात् प्रथमायां पङ्क्तौ वामतस्त्रीण्याम्रफलानि

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विद्यन्ते। तान्येकस्मिन् वृन्ते श्लिष्टानि वर्तन्ते। अपक्कानि च तानि। पक्कान्याम्रफलानि रुचिराणि भवन्ति, वर्णश्च तेषां रम्यः॥

आम्राणां दक्षिणतो विद्यमानं पनसफलम्। बहिः कण्टकैरावृतं वर्तते पनसफलम्। तस्य गन्धस्तु मनोहरः। परम् अधिकतया भक्ष्यमाणं तदुदरपीडां जनयति॥

द्वितीयस्यां पङ्क्तौ वामतः कदलीफलानि विद्यन्ते। पक्कानां कदलीफलानां वर्णः पीतः; अपक्कानां तु हरितः। कानिचित् कदलीफलानि रुचिराणि हितावहानि च भवन्ति। कादलानां दक्षिणतः सीताफलं वर्तते, तस्यापि दक्षिणतो द्राक्षागुच्छः॥

तृतीयस्यां श्रेणौ वामभागे विद्यमानानि मातुलुङ्ग-फलानि। इतरेषां केषाञ्चित् फलानां नामान्यप्रसिद्धानि। तेषु कानिचित् विदेशीयानि फलानि॥

फलानामाहारः सात्त्विकः पथ्यश्च। अत एव मुनयः प्रायेण फलैरेव जीविकां वर्तयन्ति। तेन ते नीरोगाश्चिरायुषश्च भवन्ति॥

---

१) प्रश्नाः—

१. चित्रेऽस्मिन् कीदृशानि फलानि सन्ति? २. तेषां

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

गुणविशेषाः के ? ३. उदरपीडां कदा किं जनयति ? ४. कुतो मुनयः फलैर्जीविकां वर्तयन्ति ? ५. तेन ते कीदृशा भवन्ति ?

२) षट् वर्णाः (Six colours) :—

पाण्डुः	(Yellowish white)	पाटलः	(Pale red)
धूसरः	(Reddish Brown)	धूम्रः	(Smoky)
शोणः	(Tinged red)	श्यावः	(Dark brown)
अरुणः	(Tauny)	कपिशः	(Brown)

३) पर्यायाः—

पनसः २—पनसः कण्टकिफलः ।

पीतवर्णः ३—पीतो गौरो हरिद्राभः ।

हरितवर्णः ३—पलाशो हरितो हरित् ।

रक्तवर्णः ३—रोहितो लोहितो रक्तः ॥

आम्र *n.* mango fruit
पनस *n.* jack fruit
कादल *n.* plantain fruit
सीताफल *n.* mustard apple
द्राक्षा *f.* grape
वामतः *in.* from left
वृन्त *a.* foot-stalk of a leaf or a fruit
श्लिष्ट *a.* sticking to
कण्टक *m. n.* a thorn
उदरपीडा *f.* stomach-ache
विदेशीय *n. n.* foreign
सात्त्वक *a. m.* harmless
नीरोग *a. m.* free from disease
चिरायुष *a. m.* long-lived.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३३. लक्ष्मणस्य प्रस्थानम्

पितुराज्ञया मुदित एव वनं प्रस्थितः सीतया सहितो रामः। लक्ष्मणस्तु बलवदह्यत शोकेन। क्षणं स उन्मत्त इव कर्तव्यं नाज्ञासीत्। न खलु रामं विना क्षणमप्यवस्थितं लक्ष्मणेन। अतः स कथं सहतां श्रीरामस्य विरहम्!॥

अथ स धीरः कुमारश्चिरं विचिन्त्य गत्यन्तरमपश्यन् स्वयं रामस्यानुगमने मतिं व्यधत्त। ततः स मातरं सुमित्रामाप्रष्टुं तदन्तिकं जगाम। रामस्य विरहमनुचिन्त्य मृतेव भूमौ पतिता सा लक्ष्मणस्यागमनं नाभ्यनन्दत्। लक्ष्मणस्तु तां सम्बोध्य मृदुना स्वरेणात्मनश्छन्दं न्यवेदयत्॥

तेन वचनेन प्रत्युज्जीवितेव सा झटित्युत्थाय कुमारं गाढमालिलिङ्ग। जगाद च सगद्गदम्—'जात! अद्याहं पुत्रिणी जाता। अद्याहं वीरमाताऽस्मि। अद्य मे शोकस्त्वया शान्तिं गमितः। सर्वथैव रामभद्रमनुयाहि'—इति॥

अथ मुदितः कुमारो मातरं प्रणनाम। सा तं मूर्ध्न्युपाघ्राय कथयति—

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

"गम्यतामर्थलाभाय क्षेमाय विजयाय च ।
शत्रुपक्षविनाशाय पुनः सन्दर्शनाय च ॥
रामं दशरथं विद्धि मां विद्धि जनकात्मजाम् ।
अयोध्यामटवीं विद्धि गच्छ तात यथासुखम् "—इति ॥
(श्रीमद्वाल्मीकिरामायणे अयोध्याकाण्डे चत्वारिंशः(४०) सर्गः॥

अथ लक्ष्मणो देवतायाः प्रसादमिव मातुरुपदेशं मानयन् धनुर्बाणपाणिः श्रीरामम्अन्वगच्छत् ॥

---

१) प्रश्नाः—

१. लक्ष्मणः कुतो न सहते रामस्य विरहम्? २. सुधीः कुमारः चिरं विचिन्त्य किमकार्षीत्? ३. तस्य माता कुतो न तस्यागमनमभ्यनन्दत्? ४. केन प्रत्युज्जीवितेव जाता सा? ५. किं जगाद सगद्गदम्? ६. सा तं मूर्ध्न्युपाघ्राय किं कथयति? ७. लक्ष्मणः किमकरोत्?

२] उपसर्गयोगादर्थभेदः—कृ (to do)=करोति ।

अनुकरोति (Imitates), अपकरोति (troubles),
उपकरोति (helps), निराकरोति, (Rejects)
परिष्करोति (Polishes) संस्करोति (Cleans)

प्रच्छ् (to ask) = पृच्छति । परिपृच्छति (asks with respect)
आपृच्छते (take leave)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३) सन्धिं विश्लेषयत—फलैरेव, हरौ राजते, वर्णश्च, कोऽत्र, सर्वथैव, मूर्ध्न्युपाघ्राय ॥

४) लङि रूपाणि निर्दिशत—

अटति	इच्छति	उज्झति	अश्नति
ईक्षते	उक्षति	अयते	ईहते

५) पर्यायाः—

वैरम् ३—वैरं विरोधो विद्वेषः ।

शोकः ३—मन्युशोकौ तु शुक् स्त्रियाम् ।

शान्तिः ३—शामथस्तु शमः शान्तिः ।

दान्तिः ३—दान्तिस्तु दमथो दमः ।

मृदु ५—मसृणं सुकुमारं च कोमलं मृदुलं मृदु ।

वियोगः ४—वियोगो विप्रयोगश्च विश्लेषविरहौ समौ ॥

प्रस्थान *n.* going forth, departure
उन्मत्त *a. m.* a mad man
बिरह *m.* separation
आप्रष्टुम् *in.* to take leave of
विद्धि *P.* understand
छन्द *m.* wish
सगद्गदम् *in.* in a faltering tone
मूर्धा *m.* the head
अटवी *f.* a forest
प्रसाद *m.* favour.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३४. भूमिः

भूमिः कन्दुकवत् गोलाकृतिः। तस्यास्त्रिषु भागेषु द्वौ भागौ जलम्। त्रिष्वेको भागः स्थलम्। चित्रं पश्य, तत्र शुक्लो भागः स्थलम्। कृष्णो भागः जलम्।

स्थलभागः एष्या, यूरोप्, आफ्रिका, अमेरिका, आस्त्रेलिया चेति पञ्चखण्डत्वेन विभक्तः।

जलभागः—शान्तसागरः, अतलान्तिकसागरः, भारतसागरः, उत्तरध्रुवसागरः, दक्षिणध्रुवसागरश्चेति पञ्चसागरत्वेन विभक्तः। समुद्रेषु तत्र तत्र सिंहलादयो द्वीपाः सन्ति॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

एष्याखण्डः सर्वेषु खण्डेषु विशालतमः। खण्डेऽस्मिन् विद्यया परिष्कारेण च खण्डान्तराण्यतिशयनाऽस्माकं भारत-भूमिर्विराजते। अस्यां परमपावनाः गङ्गा-सिन्धु-गोदावरी-नर्मदा-कावेरीप्रभृतयो नद्यः, परमोन्नता हिमालयप्रभृतयः पर्वताश्च विलसन्ति। अत एव भारतभूमिः अतीव प्रशस्ता॥

यूरोपखण्डोऽनेकैः सार्वभौमैर्विभज्य भुज्यते। तस्मिन् निवसन्तो जनाः श्वेतगात्राः॥

अमेरिकाखण्डो दक्षिणामेरिका उत्तरामेरिका चेति द्वेधा विभक्तः। खण्डोऽयमतीव विशालः समृद्धश्च। गोधूमादीनि धान्यानि प्रभूततया तत्र प्ररोहन्ति॥

आफ्रिकाखण्डो विशाल एव। किन्तु अत्र भूयान् भागो मरुभूमिः। नद्योऽत्र विरलाः। सहाराख्योऽतिविशालः कश्चिन्मरुप्रदेशोऽत्र सुप्रसिद्धः॥

आस्त्रेलियाखण्डः सर्वेषु खण्डेष्वल्पिष्ठः। खनिजानि द्रव्याण्यत्र बाहुल्येन समासाद्यन्ते। ऊर्णाव्यवसायोऽस्मिन् खण्डे प्रसिद्धः॥

शान्तसागरोऽन्वर्थनामा विराजते। अतीव विशालोऽव्ययमत्यन्तं शान्तः। अस्मिन्नावर्ताः कल्लोलाश्च न सन्ति॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अतलान्तिकाब्धिरल्पीयानप्यतीव भयङ्करः। भारतसागरोऽस्माकं भारतवर्षस्य दक्षिणतो वर्तते ॥

उत्तरध्रुवसागरस्य जलमतीव शीतलम्। तत्रत्येषु द्वीपेषु जनानां वासो दुष्करः। समुद्रेऽस्मिन् शैलतुल्या हिमखण्डाः प्लवन्ते। ते वात्यया नीयमानाः शश्वत् प्रवहणानि निहत्य जले मज्जयन्ति। दक्षिणध्रुवसागरस्य जलं शैत्येन घनीभूतं शिलाप्रायं वर्तते। तस्मिन् द्वीपाः सन्ति, नापि तत्र प्रवहणानि सञ्चरन्ति ॥

आकाशे परिभ्रमत गोलानां मध्ये भूमिरन्यतमा। भूगोलापेक्षयाऽप्युत्तराणि गोलान्तराण्याकाशे विद्यते। सूर्यचन्द्रौ सर्वाणि नक्षत्राणि च भूगोलवत् गोलानि इति तत्रापि जीवराशयो निवसन्ति इति च गोलशास्त्राभिज्ञाः कथयन्ति ॥

---

१) प्रश्नाः—

१. भूमिः कीदृशी? २. तस्याः कियान् भागो जलम्? ३. कियान् भागः स्थलम्? ४. पञ्च खण्डाः के? ५. पञ्च सागराः के? ६. उत्तरध्रुवसागरः दक्षिणध्रुवसागरश्च कीदृशौ? ७. भारतभूमेः प्राशस्त्यं कथम्? ८. सा कस्मिन् खण्डे अन्तर्भवति?

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

९. आकाशे विद्यमानानि गोलान्तराणि कानि? १०. गोलशास्त्राभिज्ञाः किं कथयन्ति ?

२) संख्याविशेषणानि—

प्रथमः, द्वितीयः, तृतीयः, चतुर्थः, (तुर्य–तुरीयः) पञ्चमः, षष्ठः, सप्तमः, अष्टमः, नवमः, दशमः, एकादशः, विंशः, त्रिंशः, चत्वारिंशः, पञ्चाशः, षष्टितमः, सप्ततितमः, अशीतितमः, नवतितमः, शततमः, सहस्रतमः, अयुततमः, लक्षतमः, प्रयुततमः, कोटितमः इत्यादि ॥

३) निर्दिष्टैः क्रियापदैः वाक्यानि पूरयत—

१. गोपालः गृहमागतं मित्रं कुशलं (पृच्छ्-लट्) स्म ।

२. विदेशं प्रस्थितः पुत्रः पितरौ (आपृच्छ्-लट्) स्म ।

३. सन्तश्छात्राः परस्परं पश्यन्तः (नमस्कृ-लट्) ॥

४) पर्यायाः—

भूमिः २७—भूर्भूमिरचलाऽनन्ता रसा विश्वम्भरा स्थिरा ।
धरा धरित्री धरणी क्षोणिर्ज्या काश्यपी क्षितिः ।
सर्वंसहा वसुमती वसुधोर्वी वसुन्धरा ।
गोत्रा कुः पृथिवी पृथ्वी क्षमाऽवनिर्मेदिनी मही ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

गोलाकृति *a. f.* Globular-shaped
सिंहल *m* Ceylon
खण्ड *m* a continent
द्वीप *m* Island
भारतभूमि *f* The Continent of India
विराजते *A.* shines
श्वेतगात्र *n. m.* having white body
खनिज *n* grown in mines
प्रभूतता *f* in plenty
आवर्त *m* whirlpool
कल्लोल *m* large wave
विरल *a. m.* rare
सांयात्रिक *m* Sea trader
वात्या *f* a storm
शिलाप्राय *n* like rock
प्रवहण *n* ship
गोधूम *m* wheat
अन्यतम *a. m.* one of many
भूगोलशास्त्राभिज्ञ *a. m.* well-versed in Geography.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३५. नीतिमाला—प्रथमो भागः ॥

लक्ष्मीर्वसति जिह्वाग्रे जिह्वाग्रे मित्रबान्धवाः ।
बन्धनं चैव जिह्वाग्रे जिह्वाग्रे मरणं ध्रुवम् ॥ १

प्रियवाक्य प्रदानेन सर्वे तुष्यन्ति जन्तवः ।
तस्मात् तदेव वक्तव्यं वचने का दरिद्रता ॥ २

हस्तस्य भूषणं दानं सत्यं कण्ठस्य भूषणम् ।
श्रोत्रस्य भूषणं शास्त्रं भूषणैः किं प्रयोजनम् ॥ ३

दिवा पश्यति नोलूकः काको नक्तं न पश्यति ।
विद्याविहीनो मूढस्तु दिवा नक्तं न पश्यति ॥ ४

विद्या ददाति विनयं विनयाद्याति पात्रताम् ।
पात्रत्वाद्धनमाप्नोति धनाद्धर्मं ततः सुखम् ॥ ५

रूपयौवनसम्पन्ना विशालकुलसम्भवाः ॥
विद्याहीना न शोभन्ते निर्गन्धा इव किंशुका ॥ ६

विद्वत्वं च नृपत्वं च नैव तुल्यं कदाचन ।
स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते ॥ ७

विदेशेषु धनं विद्या व्यसनेषु धनं मतिः ।
परलोके धनं धर्मः शीलं सर्वत्र वै धनम् ॥ ८

१) प्रश्नाः—

१. जिह्वाग्रे कानि वसन्ति ? २. कुतः प्रियं वाक्य वक्तव्यम् ?

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३. हस्तादीनां भूषणानि कानि ? ४. उलूकः काकः मूढश्च कदा न पश्यन्ति ? ५. कथं विद्या सुखस्य कारणम् ? ६. विद्याहीनाः क इव न शोभन्ते ? ७. विद्वत्त्वं च नृपत्वं च कुतो न तुल्ये ? ८. विद्या, मतिः, धर्मः, शीलं च कुत्र कुत्र धनं भवन्ति ?

२) सन्धत्त—लक्ष्मीः + वसति, न + उलूकः, निर्गन्धाः + इव, न + एव, मूढः + तु, वदन् + एव, हिताः + न ॥

३) समानार्थाः—

नक्तन्दिवम्, रात्रिन्दिवम्, अहर्निशम् = (Day & Night)

४) पर्यायाः—

धनम् १३—द्रव्यं वित्तं स्वापतेयं रिक्थमृक्थं घनं वसु।
हिरण्यं द्रविणं द्युम्नम् अर्थरैभिधा अपि ॥

प्राणी ६—प्राणी तु चेतनो जन्मी जन्तु जन्युशरीरिणः ॥

जिह्वाग्र *n* the tip of the tongue
प्रियवाक्य *n* a pleasing word
दरिद्रता *f* poverty
श्रोत्र *n* the ear
दिवा नक्तम् *in.* day and [night
विनय *m* modesty
पात्रता *f* the state of being a worthy person
यौवन *u* youthfulness
निर्गंन्ध *a. m.* inodorous
किंशुक *m.* a kind of tree having beautiful red blossoms but without any smell
तुल्य *n* equal
विदेश *m* foreign countries
व्यसन *n* calamity

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रदोषे दीपकश्चन्द्रः प्रभाते दीपको रविः ।
त्रैलोक्ये दीपको धर्मः सुपुत्रः कुलदीपकः ॥ ९

एकेनापि सुवृक्षेण पुष्पितेन सुगन्धिना ।
वास्यते तद्वनं सर्वं सुपुत्रेण कुलं यथा ॥ १०

एकेनापि कुवृक्षेण कोटरस्थितवह्निना ।
दह्यते तद्वनं सर्वं कुपुत्रेण कुलं यथा ॥ ११

कोऽतिभारः समर्थानां किं दूरं व्यवसायिनाम् ।
को विदेशः सविद्यानां कः परः प्रियवादिनाम् ॥ १२

न कश्चिदपि जानाति किं कस्य श्वो भविष्यति ।
अतः श्वः करणीयानि कुर्यादद्यैव बुद्धिमान् ॥ १३

न संशयमनारुह्य नरो भद्राणि पश्यति ।
संशयं पुनरारुह्य यदि जीवति पश्यति ॥ १४

नरस्याभरणं रूपं रूपस्याभरणं गुणः ।
गुणस्याभरणं ज्ञानं ज्ञानस्याभरणं क्षमा ॥ १५

क्षमाशस्त्रं करे यस्य दुर्जनः किं करिष्यति ।
अतृणे पतितो वह्निः स्वयमेवोपशाम्यति ॥ १६

---

१) प्रश्ना :—

९. चन्द्रः, रविः, धर्मः, सुपुत्रश्च कीदृशाः ? १०. सुपुत्रेण तुल्यः कः ? ११. वनं केन दह्यते ? १२. समर्थादीनां किं किं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नास्ति ? १३. कुतः श्वः कार्यमद्य कुर्वीत ? १४. कदा नरः भद्राणि न पश्यति ? कदा पश्यति ? १५. नरस्य, रूपस्य, गुणस्य, ज्ञानस्य चाभरणं किम् ? १६. क्षमाशस्त्रेण को गुणः सिध्यति ? अत्र दृष्टान्तः कः ?

२) सन्धत्त—एकेन + अपि, कः + विदेशः, श्वः + करणीयम्, तत् + वनम्, यतिः + राजते, हरिः + जयति ॥

३) विरुद्धपदानि—सुलभः × दुर्लभः । सुपुत्रः × कुपुत्रः ।
सुकरः × दुष्करः । सुवृक्षः × कुवृक्षः ।
सुजनः × दुर्जनः । सुवचः × दुर्वचः ॥

४) पर्यायाः—

संशयः ४—विचिकित्सा तु सन्देहः संशयो विशयस्तथा ।
आयुधम् ४—आयुधं तु प्रहरणं शस्त्रमस्त्रं नपुंसके ।
भद्रम् ४—श्वः श्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम् ।
भावुकं भविकम् भव्यम् कुशलं क्षेममस्त्रियाम् ॥

प्रदोष *m* night fall
दीपक *m* that which gives light
वास्यते *A* is perfumed
व्यवसायी *a. m.* energetic
पर *m.* a foe
करणीयानि *n* which are to be done
संशयं *m* **अनारुह्य** *in* without entertaining a doubt
आभरण *n* ornament
अतृणं *n* a place free from grass
वह्नि *m* fire
भद्राणि *n* good fortunes

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अविचार्य न वक्तव्यं वक्तव्यं सुविचारितम् ।
किञ्च तत्रैव वक्तव्यं यत्रोक्तं सफलं भवेत् ॥ १७
मनसा चिन्तितं कार्यं वचसा न प्रकाशयेत् ।
अन्यलक्षितकार्यस्य यतः सिद्धिर्न जायते ॥ १८
यदशक्यं न तच्छक्यं यच्छक्यं शक्येमेव तत् ।
न जले शकटं याति न च नौर्गच्छति स्थले ॥ १९
चिन्तनीया हि विपदामादावेव प्रतिक्रिया ।
न युक्तं कूपखननं सन्दीप्ते वह्निना गृहे ॥ २०
परोऽपि हितवान् बन्धुः बन्धुरप्यहितः परः ।
अहितो देहजो व्याधिः हितमारण्यमौषधम् ॥ २१
मातृवत् परदारांश्च परद्रव्याणि लोष्टवत् ।
आत्मवत् सर्वभूतानि यः पश्यति स पश्यति ॥ २२
छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे ।
फलान्यपि परार्थाय वृक्षाः सत्पुरुषा इव ॥ २३
गुणवज्जनसंसर्गात् याति स्वल्पोऽपि गौरवम् ।
पुष्पमालानुषङ्गेण सूत्रं शिरसि धार्यते ॥ २४
महाजनस्य संसर्गः कस्य नोन्नतिकारकः ।
पद्मपत्रस्थितं वारि धत्ते मुक्ताफलश्रियम् ॥ २५

---

१) प्रश्नाः—

१७. कीदृशं वचः कुत्र वक्तव्यम्? कथं न वक्तव्यम्? १८. मनसा चिन्तितं कार्यं वचसा कुतो न प्रकाशयेत्? १९. शक्य-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अशक्यं च कार्यमुदाहरत । २०. विपदां प्रतिक्रिया कदा चिन्तनीया ? कूपखननं कदा न युक्तम् ? २१. परोऽपि को बन्धुः ? बन्धुरपि कः परः ? अत्र दृष्टान्तौ कौ ? २२. 'स पश्यति' कः ? २३. 'वृक्षा सत्पुरुषा इव' कथम् ? २४. 'स्वल्पः कथं गौरवं याति ? दृष्टान्तः कः ? २५. महतां संसर्गः किं सम्पादयन्ति ? दृष्टान्तं वद ॥

२) सतिसप्तमी—(Locative Absolute)

१) भानावुदिते सति अन्धकारो नश्यति ।

२) गृहे वह्निना सन्दीप्ते सति कूपखननमयुक्तम् ।

३) रामे राज्यं शासति सति देशे सर्वत्र सुभिक्षमासीत् ॥

३) पर्यायाः—

औषधम् ५—भेषजौषधभैषज्यान्यगदो जायुरित्यपि ॥

वैद्यः ५—रोगहार्यरदङ्कारो भिषग्वैद्यो चिकित्सके ॥

अविचार्यं *in.* without giving thought
किञ्च *in.* and, further
लक्षित *a.* seen
विपदः *f* adversities
प्रतिक्रिया *f* remedy
अहितः *m* injurious
आरण्यम् *a.* forest-born
लोष्टवत् *in.* like a lump of earth
आत्मवत् *in* like one's own self
छाया *f* shade
आतपः *m* Sunshine
संसर्गः *m* contact
अनुषङ्ग *m* connection
सूत्रम् *n* a thread
उन्नतिकारकः *m* leading to exaltation
पद्मपत्रं *n* a lotus leaf
मुक्ताफलं *n* a pearl

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३६. पर्यायपदानाम् अनुक्रमणिका

पर्यायसंख्या	नामानि	पृष्ठम्	पर्यायसंख्या	नामानि	पृष्ठम्
3	अमृतम्	23	20	चन्द्रः	78
4	अन्यः	47	10	चोरः	69
4	अयोध्या	17	4	चौर्यम्	69
13	अश्वः	20	25	जलम्	35
4	आधोरणः	56	2	जोषम्	7
4	आयुधम्	114	5	तापसः	92
4	आश्रमः	92	5	तीरम्	59
9	उलूकः	99	3	दान्तिः	105
2	उलूखलम्	53	2	दूतः	89
2	ऋषिः	92	11	देहः	26
3	एकाकी	47	4	दम्पती	39
5	औषधम्	116	13	धनम्	112
2	किम्	7	6	नर्तनम्	72
4	कुक्कुटः	45	6	नक्षत्रम्	78
4	कुतूहलम्	76	6	पक्षः	61
7	कृष्णः	32	4	परतन्त्र	29
4	कोकिलः	32	2	पनसः	102
7	कोपः	82	2	पिच्छम्	42
5	क्षणः	99	3	पिता	82
12	गजः	56	6	पिपासा	23
6	गोपः	10	3	पीतवर्णः	102
6	गौः	10	6	पुत्रः	82
4	घृतम्	10	6	प्राणी	112

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पर्यायसंख्या	नामानि	पृष्ठम्	पर्यायसंख्या	नामानि	पृष्ठम्
2	बालः	69	6	वेगः	59
14	बुद्धिः	65	5	वैद्यः	116
4	बुभुक्षितः	45	3	वरम्	105
11	भद्रम्	114	3	व्याघ्रः	26
5	भाण्डम्	7	3	शान्तिः	105
27	भूमिः	110	3	शिखा	42
9	मयूरः	42	5	शीलम्	89
4	माता	7	13	शुक्लः	32
6	मूढः	59	10	शृगालः	23
15	मृदु	105	3	शोकः	105
5	याचकः	6	10	सततम्	47
3	युवा	69	6	सत्यम्	82
3	रक्तवर्णः	102	11	सत्वरम्	72
6	राजा	76	5	सहकारः	13
11	रात्रिः	53	37	सूर्यः	3
5	लता	50	4	संशयः	114
2	वर्णौ	92	12	सन्तोषः	76
10	वानरः	39	5	स्वतन्त्रः	29
3	विघ्नः	99	2	स्वसा	65
3	विषम्	23	3	हरितवर्णः	102
4	वियोगः	105	8	हस्तः	95
13	वृक्षः	13			

आहत्य पर्यायपदानि 89

नानार्थ पदानाम् अनुक्रमणिका
(Words having various meanings)

समग्र, Page 76, गो, अहो, कुलम्

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

37. APPENDIX

1. Usage of Nouns with Adjectives :—

(Note that all Adjectives must agree with the Nouns in Gender, Case and Number)

Examples :—

क.	पुंलिङ्गे		स्त्रीलिङ्गे	
विभक्तिः	Adjective	Noun	Adjective	Noun
प्र	सुगुणः	बालः	सुगुणा	बाला
सं प्र	हे सुगुण	बाल	हे सुगुणा	बाले
द्वि	सुगुणं	बालं	सुगुणां	बालां
तृ	सुगुणेन	बालेन	सुगुणया	बालया
च	सुगुणाय	बालाय	सुगुणायै	बालायै
प	सुगुणात्	बालात्	सुगुणायाः	बालायाः
ष	सुगुणस्य	बालस्य	सुगुणायाः	बालायाः
स	सुगुणे	बाले	सुगुणायां	बालायाम्

नपुंसकलिङ्गे तु प्रथमाद्वितीयाविभक्त्योः 'सुगुणं मित्रम्' इति। शेषं पुंलिङ्गवत्॥

ख. 'किम्' शब्दस्य नामपदैः सह प्रयोगः—

	पुंलिङ्गे		स्त्रीलिङ्गे	
प्र.	कश्चित्	कविः	काचित्	बाला
द्वि.	कंचित्	कविं	कांचित्	बालां
तृ.	केनचित्	कविना	कयाचित्	बालया
च.	कस्मैचित्	कवये	कस्यैचित्	बालायै
प.	कस्मैचित्	कवेः	कस्याश्चित्	बालायाः
ष.	कस्यचित्	कवेः	कस्याश्चित्	बालायाः
स.	कस्मिंश्चित्	कवौ	कस्यांश्चित्	बालायाम्

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नपुंसकलिङ्गे तु प्रथमाद्वितीयाविभक्त्योः 'किञ्चित् फलम्' इति। शेषम् अकारान्तपुंलिङ्गवत्॥

2. क. 'तद्, युष्मद्, अस्मद् शब्दानां क्रियापदैः सह भूतकाले (Past Tense) प्रयोगः—

प्र. सः पाठम् अपठत्। तौ पाठम् अपठताम्। ते पाठम् अपठन्।
म. त्वं पाठम् अपठः। युवां पाठम् अपठतम्। यूयं पाठम् अपठत
उ. अहं पाठम् अपठं। आवां पाठम् अपठाव। वयं पाठम् अपठाम।

ख. लोटि (Imperative Mood) प्रयोगः

प्र. सः	पाठं पठतु	तौ	पाठं पठतां	ते	पाठं पठन्तु
म. त्वं	पाठं पठ	युवां	पाठं पठतं	यूयं	पाठं पठत
उ. अहं	पाठं पठानि	आवां	पाठं पठाव	वयं	पाठं पठाम

ग

१. प्र. पु. ए. रामः पितरम् अवन्दत
प्र. पु. द्वि. रामः कृष्णः च पितरम् अवन्देताम्
प्र. पु. ब. रामः कृष्णः गोपालश्च पितरम् अवन्दन्त।
२. म. पु. ए. त्वं पितरम् अवन्दथाः
म. पु. द्वि. त्वं रामः च पितरम् अवन्देथाम्[1]
म. पु. ब. रामः कृष्णः गोपालश्च पितरम् अवन्दध्वम्[1]
३. उ. पु. ए. अहं गोपालश्च पितरम् अवन्दे
उ. पु. द्वि. अहं पितरम् अवन्दावहि[2]
उ. पु. ब. अहं रामः गोपालश्च पितरम् अवन्दामहि।

Note: 1. Verbs must be in Second Person when there is युष्मच्छब्द as the Subject.
2. Verbs must be in the First Person when there is अस्मच्छब्द as the Subject.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३. धातूनां कर्मणि (In the Passive Voice) लटि, लङि लटि च प्रथमपुरुषैकवचने रूपाणि.

	धातुः	लट्	लङ्	लृट्
१.	*(अनु) भू	अनुभूयते	अन्वभूयत	अनुभविष्यते
२.	*(अनु) स्था	अनुष्ठीयते	अन्वष्ठीयत	अनुष्ठास्यते
३.	पठ्	पठ्यते	अपठ्यत	पठिष्यते
४.	गम्	गम्यते	अगम्यत	गमिष्यते
५.	दृश्	दृश्यते	अदृश्यत	द्रक्ष्यते
६.	पा	पीयते	अपीयत	पास्यते
७.	कृ	क्रियते	अक्रियत	करिष्यते
८.	लभ्	लभ्यते	अलभ्यत	लप्स्यते
९.	वन्द्	वन्द्यते	अवन्द्यत	वन्दिष्यते
१०.	नी	नीयते	अनीयत	नेष्यते

4. Present and Future Participles (in the Passive voice)

Present and future Participles are formed by adding **मान** to the base.

Ex. १. पठ्य + मानः = पठ्यमानः
२. पठिष्य + माणः = पठिष्यमाणः

---

*भू and स्था though intransitive, become transitive when used with अनु.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

५. प्रश्नाः (Questions)

I. Correct the following giving reaons

१. अहं रामः च उषसि प्रबुध्य पाठान् पठतः ।
२. युवां गुरुः च मद्रपुरीं अगच्छन् ।
३. कश्चित् ग्रामे एका वणिक् अवर्तत् ।
४. धीमान् बालं गुरुः अपृच्छत् ।
५. कश्चित् नारी बालेन सह तिष्ठति ॥

II. Join the following words stating kind of सन्धि

१) भूमौ	+	अपतत्	६) इति	+	इव
२) तस्मै	+	अयच्छत्	७) सः	+	तत्र
३) शिष्यः	+	अनमत्	८) सः	+	अवदत्
४) बालाः	+	तत्र	९) गुरुः	+	आगच्छति
५) इति	+	एवम्	१०) कश्चित्	+	बालः

III. Rewrite the following using Active Participles

१) पथि गच्छन् सः रक्षापुरुषैः गृहीतः ताडितः दण्डाधिपस्य समीपं नीतश्च । २) मया समस्या पूरिता ।
३) श्रीरामः सलक्ष्मणः विश्वामित्रेण तत्र नीतः ॥

IV. Give the opposite words.

१) स्मरति	३) सूर्योदयः	५) विकसित मुखः
२) रामेण सह	४) सन्तुष्टः	६) अधोमुखः

V. Give one word for.

१) लोष्टः इव २) सः इव ३) चारोः भावः

शुभं भूयात् । समस्तसन्मङ्गळानि सन्तु ॥ 'जय विजयी भव'

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

SANSKRIT STUDY MADE EASY SERIES

Approved by the Text Book Committee.

॥ संस्कृतद्वितीयादर्शः ॥

(SAMSKRITA DWITEEYADARSA)

—:o:—

READER II

PUBLISHED BY
R. S. VADHYAR & SONS,
BOOK-SELLERS & PUBLISHERS
KALPATHI : : PALGHAT-678003
S. INDIA

1978

Rs. 2/50.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

SANSKRIT STUDY MADE EASY SERIES

A Reformed Series of Four Illustrated Sanskrit Readers.

Infant Reader	संस्कृत बालादर्शः	34th Edn.	2 00
Reader I	संस्कृत प्रथमादर्शः	19th Edn.	2 25
Reader II	संस्कृतद्वितीयादर्शः	12th Edn.	2 50
Reader III	संस्कृत तृतीयादर्शः	8th Edn.	3 00

Easy Texts on Sanskrit Grammar संस्कृतव्याकरण ग्रन्थाः

1. शब्दमञ्जरी-तिङन्त-अव्यय - समासप्रकरण - शब्दार्थकोश सहिता.
The addition of an Interesting chapter on समासप्रकरण with examples in श्लोकाः & वाक्याः is a Special Feature to this enlarged 15th Edition. 3 00

2. धातुरूपमञ्जरी- Deals with 500 most common roots with Sans. & Eng. meanings etc., 5th Edition. 4 00

3. संस्कृत व्याकरण प्रवेशिका—The First Book of its kind containing 47 Lessons dealing on Nouns, Gender, Verbs, Tenses, Parsing, Analysis, etc., 2nd Edn. 2 00

Easy Texts on Sanskrit Poetry लघु काव्य ग्रन्थाः

श्रीरामोदन्तम्- with instructive Notes in Sans. & English			1 25
रघुवंशमहाकाव्यम्—रघुवंशजीविनी टीका in Sanskrit and English	Canto 1.	Do.	2 00
श्रीकृष्णविलासकाव्यम्—	Canto 2.	Do.	0 50
महाविजयः— with English Translation & Notes.			1 50

Sanskrit Copy Books—संस्कृत प्रतिलेखावलिः

These are suitably graded with selected Maxims and Quotations. In No. 1 Copy Book Diagram to correctly write the entire Sanskrit Alphabet is given.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof: Marrozi, HONOLULU, U.S.A. writes :—

.....The Students here are making good use of the Copy Books and are very appreciative of them

No 1 Bold	Hand	स्थूललिपिः	60 P.
No 2 Medium	Hand	मध्यमलिपिः	60 P.
No 3 Small	Hand	सूक्ष्मलिपिः	60 P.

Useful Text Books for College Students

Text in Sanskrit with English Translation, Exhaustive Notes, Model Questions etc.-

By T. K. RAMACHANDRA IYAR, M.A.,B.O.L.,

BOOKS ON SANSKRIT PROSE

बालरामायणम् बाल-अयोध्या-आरण्य काण्डाः— Part I A Simple Prose Version of Valmiki Ramayana retaining the idioms of the original.	3 50
Do किष्किन्धा-सुन्दर-युद्धकाण्डाः—Part II	5 00
चन्द्रापीडचरितम्–The Story of Bana Bhatta's Kadambari Concisely written in his own words	5 00
English Translation & Notes on Harsha Charitha Sangraha-Uchvasas 4 & 5 (Without Text)	4 00

A Short History of Sanskrit Literature (covering the whole range of vedic, Sutra and classical Periods). 8 00

Exercises in Sanskrit Translation—with guidelines for Translation from Sans. to Eng. & vice versa In Press.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

(3)

USEFUL TEXT BOOKS FOR COLLEGE STUDENTS

Text in Sanskrit with English Translation, Exhaustive Notes, Model Questions etc.,

By **T. K. RAMACHANDRA IYER M. A., B. O. L.,**

BOOKS ON SANSKRIT POETRY

रघुवंशमहाकाव्यम्—	
(दिलीपस्य वसिष्ठाश्रमगमनं नाम प्रथमः सर्गः)	4 00
Do दिलीपस्य नन्दिनी वरप्रदानं नाम द्वितीयः सर्गः	2 00
Do रघुदिग्विजयो नाम चतुर्थः सर्गः	4 00
Do दण्डकाप्रत्यागमनं नाम त्रयोदशः सर्गः	5 00
नलोपाख्यानम् (श्रीमन्महाभारते वनपर्वणि अध्यायाः ५०—५४ Damayanti Svayamvaram) 2nd Edition	3 00
शिशुपालवधे मन्त्रवर्णनं नाम द्वितीयः सर्गः	5 00
किरातार्जुनीयम्—व्यवसायदीपनो नाम प्रथमः सर्गः	5 00
कुमारसंभवे उमापरिणयो नाम सप्तमः सर्गः	5 00
श्रीमन्महाभारते वनपर्वणि यक्षप्रश्नः	In Press
Selections from रामायणे—"रामभरत संवादः", श्रीमद्भागवते—"ध्रुवचरितम्", मनुस्मृतौ— "अध्याय ८—श्लोकाः १ to ९३", & नारायणीये— "रुक्मिणीहरणम्"—Dasakas 78 & 79.	4 00

BOOKS ON SANSKRIT DRAMA

दूतवाक्यम्	of Bhasa	5 00
कर्णभारम्	Do	4 00
स्वप्नवासवदत्तम्	Do	12 00

ALANKARA

कुवलयानन्दः—श्रीमदप्पय्यदीक्षित विरचितः (वृत्तिरहितः)	
50 selected Alankaras with the commentary "Samanvaya" in Sanskrit & English	6 00

R. S. VADHYAR & SONS, PALGHAT-678003.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

॥ संस्कृतद्वितीयादर्शः ॥

(SAMSKRITA DWITEEYADARSA)

READER II

By

Vidyasagar K. L. V. SASTRI,

Mahopadhyaya, Siromani, Sahityanipuna, Vidyalankara etc.,

Retired Senior Sanskrit Pandit

THE PRESIDENCY COLLEGE, MADRAS

Revised Twelfth Edition.

ALL RIGHTS RESERVED.

PUBLISHED BY

R. S. VADHYAR & SONS,

Book-Sellers & Publishers

KALPATHI : : PALGHAT-678003

S. INDIA.

1978

Paper used : Double Crown 11.8 Kg. White Printings

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

॥ भारतदेशीयगं तम् ॥

——:o:——

जन गण मन अधिनायक जय हे !
भारत-भाग्यविधाता ।
पंजाब सिन्धु गुजरात मराठा
द्राविड उत्कल वंगा ॥
विन्ध्य हिमाचल यमुना गंगा
उच्छल जलधि तरंगा ।
तव शुभ नामे जागे
तव शुभ आशिष मागे
गाहे तव जय गाथा ॥
जन गण मंगल दायक जय हे !
भारत-भाग्य-विधाता ।
जय हे ! जय हे ! जय हे !
जय ! जय ! जय ! जय हे ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

INDIAN NATIONAL ANTHEM

Thou art the ruler of the minds
of all People,

Thou Dispenser of India's Destiny.

Thy name rouses the hearts of the Punjab,
Sind, Gujarat and Maratha,
of Dravid, Orissa and Bengal.

It echoes in the hills of the Vindhyas and
Himalayas,
mingles in the music of Jamuna and
Ganges,
and is chanted by the waves of the
Indian Sea.

They pray for Thy Blessings,
and sing Thy Praise,

The Saving of all People waits in Thy
hands.

Thou Dispenser of India's Destiny,

Victory ! Victory ! Victory to Thee !

This Stanza composed by Sree Rabindranath Tagore has been adopted by the Indian Constitution as the National Anthem of India, on 24th January, 1950.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अनुक्रमणिका—CONTENTS

पाठः			पृष्ठम्
	भारतदेशीयगीतम्		ii
	Do English Translation		iii
१.	श्रीकृष्णप्रार्थना	(पद्यपाठः)	१
२.	सिंहः		५
३.	नालिकेरवृक्षः		८
४.	परोपकारप्रशंसा	(पद्यपाठः)	१२
५.	कमलम्		१४
६.	नहुषमहाराजः		१७
७.	पक्षिणः		२०
८.	कीलोत्पाटी वानरः		२४
९.	घौम्य आरुणिश्च		२७
१०.	लोभी मत्सरी च		३०
११.	श्रीरामगुणानुवर्णनम्	(पद्यपाठः)	३३
१२.	कदली		३६
१३.	हंसः		४०
१४.	उष्ट्रः		४४
१५.	महात्मा दधीचः		४७
१६.	मधुकराः	(पद्यपाठ)	५०
१७.	नगरम्		५३
१८.	आहारः		५६
१९.	समुद्रः प्रवहणं च		५९

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पाठः			पृष्ठम्
२०.	शकटम्		६३
२१.	दैवं पुरुषकारश्च	(पद्यपाठः)	६६
२२.	त्रिशङ्कुमहाराजः		६८
२३.	सहपाठिनां संभाषणम्		७२
२४.	गृध्रो मार्जारश्च		७७
२५.	हिमालयः		८१
२६.	साधवः	(पद्यपाठः)	८५
२७.	श्रीबुद्धदेवः		८७
२८.	विद्यया विन्दते अमृतम्		९२
२९.	चाटुश्लोकाः	(पद्यपाठः)	९६
३०.	वाराणसीक्षेत्रम्		९९
३१.	श्रीशङ्कराचार्यः		१०३
३२.	सुभाषितावलिः प्रथमं दशकम्	(पद्यपाठः)	१०८
	तथा द्वितीयं दशकम्	,,	१११
	तथा तृतीयं दशकम्	,,	११३
	INDEX OF पर्यायपदानि		११७
	Do कृत्प्रत्ययान्ताः		११९
	Do उपसर्गाः		१२०
	Sanskrit Participles with English equivalents and Examples		१२२

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विन्दते

॥ विद्यया

अमृतम् ॥

Sanskrit Study Made Easy Series

A Reformed Series of Four Illustrated Sanskrit Readers.
With Grammatical Conversational Exercises,
Glossary etc,
For a Pleasant & Quick Study of Sanskrit.

Most widely used throughout India and Foreign Countries
Viz: Ceylon, Siam, Bangkok, Germany, Italy, Australia,
California, San Francisco etc.

AND SELECTED BY THE EMBASSY OF INDIA
and The Ministry of Education and Scientific Research of Govt. of India for Presentation to Foreign Students of Sanskrit.

PRINTED AT
NEW BHARATHI VIJAYAM PRINTERS
MADRAS-600 005.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीरामजयम् ॥

॥ विद्यया विन्दते अमृतम् ॥

॥ संस्कृतद्वितीयादर्शः ॥

१. श्रीकृष्णप्रार्थना

जयतु जयतु देवो देवकीनन्दनोऽयं
जयतु जयतु कृष्णो वृष्णिवंशप्रदीपः ।
जयतु जयतु मेघश्यामलः कोमलाङ्गः
जयतु जयतु पृथ्वीभारनाशो मुकुन्दः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

हे देव हे दयित हे जगदेकबन्धो
हे कृष्ण हे चपल हे करुणैकसिन्धो।
हे नाथ हे रमण हे नयनाभिराम
हा हा कदा नु भवितासि पदं दृशोर्मे ॥ २

हे गोपालक हे कृपाजलनिधे हे सिन्धुकन्यापते
हे कंसान्तक हे गजेन्द्रकरुणापारीण हे माधव।
हे रामानुज हे जगत्त्रयगुरो हे पुण्डरीकाक्ष मां
हे गोपीजननाथ पालय परं जानामि न त्वां विना ॥३

जिह्वे कीर्तय केशवं मुररिपुं चेतो भज श्रीधरं
पाणिद्वन्द्व समर्चयाच्युतकथाः श्रोत्रद्वय त्वं शृणु।
कृष्णं लोकय लोचनद्वय हरेर्गच्छाङ्घ्रियुग्मालयं
जिघ्र घ्राण मुकुन्दपादतुलसीं मूर्धन् नमाधोक्षजम् ॥ ४

कृष्णो रक्षतु मां चराचरगुरुः कृष्णं नमस्याम्यहं
कृष्णेनामरशत्रवो विनिहताः कृष्णाय तस्मै नमः।
कृष्णादेव समुत्थितं जगदिदं कृष्णस्य दासोऽस्म्यहं
कृष्णे भक्तिरचञ्चलाऽस्तु भगवन् हे कृष्ण तुभ्यं नमः॥५

(मुकुन्दमालास्तोत्रात् उद्धृताः इमे श्लोकाः).

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

(१) प्रश्नाः-१. प्रथमश्लोके प्रथमान्तानि पदानि सम्बुध्यन्ततया विपरिणमय्य वाक्यानि रचयत। २. द्वितीये तृतीये चतुर्थे च श्लोके सम्बुध्यन्तानि पदानि प्रथमान्ततया विपरिणमय्य वाक्यानि घटयत। ३ जिह्वया, चेतसा पाणिद्वन्द्वाभ्यां च किं किं कर्तव्यम्? ४. पञ्चमश्लोके कृष्णशब्दस्य स्थाने सर्वत्र रामशब्दं निवेश्य श्लोकं पठत॥

(२) प्रयोग विपरिणमयत—

१. जगच्चरगुरुः कृष्णो मां रक्षतु।
२ भोः श्रोत्रद्वय! त्वमच्युतस्य कथाः शृणु।
३. भो पुण्डरीकाक्ष! जगत्त्रयगुरुं त्वां विनाऽन्यं न जानामि

(३) निर्दिष्टानां धातूनां लटः रूपैः वाक्यानि पूरयत—

१. कृष्णस्य भक्ताः सर्वदा तदीयानि चरितानि शृण्वन्ति।
२. भो गतामगम्यं भगवत्तस्तत्त्वं योगिनो जानन्ति॥

(४) कृत्प्रत्ययान्ताः (Participles):—

जि to conquer— जयति = जितः, जितवान्, जयन्, जीयमानः, जित्वा, विजित्य, जेतुम्, जेतव्यम्, जेयम्।
ज्ञा to know—(जानाति) = ज्ञातः, ज्ञातवान्, जानन्, ज्ञायमानः, ज्ञात्वा, विज्ञाय, ज्ञातुम्, ज्ञातव्यम् ज्ञेयम्।
श्रु to hear—(शृणोति) = श्रुतः, श्रुतवान्, शृण्वन्, श्रूयमाणः, श्रुत्वा, प्रतिश्रुत्य, श्रोतुम्, श्रोतव्यम्, श्राव्यम्॥

(५) समासः— देव यः नन्दनः देवकानन्दनः—तत्पुरुषसमासः।

अस्मिन् पाठे तत्पुरुष समासान् वदत॥

(६) पर्यायाः—

नयनम् ६—लोचनं नयनं नेत्रम् ईक्षणं चक्षुरक्षिणी॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१. नन्दन *m* son
प्रदीप *m* light
मेघश्यामल *a* black-like a cloud
दृश् *f* eye
पुण्डरीकाक्ष *a m.* lotus-eyed i.e, विष्णु

२. दयित *a. m.* dear.
भविता'स (First future) would be
पदम् *n* object

३. सिन्धुकन्या *f* daughter of the ocean. i.e., लक्ष्मी
चारीण *a* he who fulfils one's desire.
रामानुज *m* कृष्ण here राम means बलराम
पर *a* other

४. जिह्वा tongue
चेत *n* mind
अङ्घ्रियुग्म *n* pair of foot
जिघ्र *P.* smell
घ्राण *n* nose
मूर्धन् *m* head
अधोक्षज *m* विष्णु

५. नमस्यामि *P.* I bow
अमरशत्रु *m* enemy of देवाः

Note that in Sloka 5 the declension of कृष्ण is used in all the 7 cases in singular number.

ABBREVIATIONS USED

N Noun विशेष्यम्
a Adjective विशेषणम् (can be used in all the 3 genders)
m Masculine पुंल्लङ्गम्
f Feminine स्त्रीलङ्गम्
n Neuter नपुंसकलिङ्गम्
P. Parasmaipadi परस्मैपदी
A. Atmanepadi आत्मनेपदी
in. Indeclinable अव्ययम्

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri



२. सिंहः

अपि युष्माभिः कदाऽपि कुत्रापि सिंहो दृष्टः ? नास्माभिः दृष्टः । पश्यत, अत्रास्ति सिंहस्य चित्रम् । सिंहो न ग्राम्यः, किन्तु वन्यो मृगः । अरण्यवासिनां शार्दूलशूकरादीनां मध्ये सिंहः शूरो मानी गम्भीरो बलिष्ठश्च । अनितरसाधारणेन विक्रमेण स सर्वान् मृगानतिशेते । अतः स 'मृगराजः' इति प्रथां भजते ॥

सिंहानां शिरसि कण्ठे च धूसराः केसराः सन्ति । अतस्ते केसरिण इत्यभिधीयन्ते । तेषामास्यमतीव विस्तृतम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तेन ते पञ्चास्या इत्याख्यायन्ते । तेषामक्षिणी पिङ्गले भासुरे च । सिंहेष्वतिदीर्घाः खरा नखराः परुषा दन्ताश्चेश्वरेण सृष्टाः॥

केसरिणो न सर्वत्र देशेषु निवसन्ति । आफ्रिकाखण्डे ते प्राचुर्येणोपलभ्यन्ते । भारतखण्डे तु ते पुरा शुतुद्र्याः सिन्धोश्च मध्यवर्तिनि सिकतारण्ये न्यवसन् । इदानीं तु ते गुर्जरदेशस्य दक्षिणतः स्थितेषु घोरारण्येषु वसन्ति ॥

मृगेन्द्राः प्राधान्येन मत्तेभैः सह विगृह्य तस्तेषां मूर्धानमारुह्य गण्डौ च भित्त्वा तत्रत्यं मांसं भक्षयन्ति । एव वने स्थितानितरान् मृगानपि ते निघ्नन्ति । यदा ते परितश्चरन्तो न मृगान् विन्दन्ति तदा तारं गर्जन्ति । तद्गर्जनं श्रुत्वा सर्वे मृगाः सभयमितस्ततो धावन्ति । तदा सिंहाः सत्वरं तेषामुपरि निपत्य तान् विध्यन्ति ॥

कदाचिदाहारमलभमानः सिंहः सर्वावयवान् स्तब्धीकृत्य भूमौ शेते । तथा शयानं तं दृष्ट्वा मृगास्तं मृतं मन्यमानास्तस्यान्तिके चरन्ति । मृगमागतं दृष्ट्वा सिंहो झटित्युत्थाय तं गृह्णाति । इत्थं सिंहाः स्वबुद्धिकौशलेन जीविकां वर्तयन्ति ॥

१) प्रश्नाः—१. सिंहः कीदृशो मृगः? २. सिंहानामवयवाः कीदृशाः? ३. सिंहाः कुत्र उपलभ्यन्ते? ४. कीदृशस्तेषामाहारः? ५. कथं च ते तं लभन्ते? ६. सिंहस्य बुद्धिकौशलं वर्णयत ॥

२) प्रयोगं विपरिणमयत—

१) केसरिणो न सर्वत्र देशेषु वसन्ति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२. मृगेन्द्राः प्राधान्येन मत्तेभानां मांसं भक्षयन्ति ।
३. अन्तिकमागतान् मृगान् सिंहो झटिति गृह्णाति ॥

(३) उपसर्गयोगादर्थभेदः—

शी = शेते, अतिशेते, अनुशेते, आशेते, विशेते, संशेते ।
ग्रह = गृह्णाति, गृह्णीते । अनुगृह्णाति, निगृह्णाति, परिगृह्णाति, प्रतिगृह्णाति, विगृह्णाति, संगृह्णाति एवम् अनुगृह्णीते इत्यादि आत्मनेपदेऽपि द्रष्टव्यम् ॥

(४) विकरणभेदः—

विद् ज्ञाने to know-वेत्ति । विद् सत्तायाम् to be विद्यते ।
विद् विचारणे to consider—विन्ते ।
विद् प्राप्तौ to obtain—विन्दति, विन्दते ॥

The following sloka shows the different forms of the root विद्

सत्तायां विद्यते ज्ञाने वेत्ति विन्ते विचारणे ।
विन्दते विन्दति प्राप्तौ रूपभेदे विदेः स्मृतः ॥

(५) समानशब्दाः—दक्षिणतः, पश्चिमतः, उत्तरतः, पूर्वतः ॥

(६) पर्यायाः—

सिंहः १—सिंहो मृगेन्द्रः पञ्चास्यो हर्यक्षः केसरी हरिः

शार्दूल *m* tiger	खर *a* severe, sharp
सूकर *m* boar	परुष *a* hard
मानिन् *a* possessed of self respect	प्राचुर्य *a* plenty
गम्भीर *a* grave	शुतुद्री *f* the river Sutlej
धूसर *a* grey	सिन्धु *f* the Indus river
केसर *m. n* the mane	सिकतारण्य *n* sandy jungle
पिङ्गल *a* reddish.brown	जीविका *f* livelihood.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri



३. नालिकेरवृक्षः

वृक्षोऽयं नालिकेर इति नारिकेल इति नारिकेर इति नारीकेल इति नाडिकेर इति केर इति चैवं बहुधाऽभिधीयते। केरोऽयं केरलेषु बाहुल्येन प्ररोहति। अत एवास्य देशस्य 'केरलव्यपदेशः' इत्याचक्षते जनाः॥

नालिकेराः समुद्राणामासन्नेषु सिकतिलेषु प्रदेशेषु प्ररोप्यमाणाः पञ्चषैरब्दैः फलन्ति। बाल्ये नालिकेराणां द्वित्राणि वर्षाणि यावज्जलसेचनमावश्यकम्। ततः परं ते स्वयमेव

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पादैर्भूतलाज्जलमाकृष्य पिबन्ति। क्रमशः प्रवृद्धास्ते प्रथमवयसि पीतं तोयं स्मरन्त इवामृतकल्पमुदकं शिरसि वहन्तो मनुष्याणां प्रत्युपकारमाचरन्ति ॥ उक्तं च नीतिशतके—

"प्रथमवयसि पीतं तोयमल्पं स्मरन्तः
शिरसि निहितभारा नारिकेला नराणाम्।
उदकममृतकल्पं दद्युराजीवनान्तं
न हि कृतमुपकारं साधवो विस्मरन्ति"—इति।

नालिकेरस्य सर्वमङ्गं सप्रयोजनं दृश्यते। केफलसारो न केवलं विविधेभ्यो व्यञ्जनेभ्य उपयुज्यते, किन्तु तमातपे शोषयित्वा यन्त्रे निधाय निष्पीडितात् तस्मात् स्नेहोऽपि गृह्यते जनैः। स्नेहग्रहणात् परमवशिष्यमाणः कल्कः पिण्याकम्। पिण्याकं गोभ्यो रोचते। केचित्तु तेन विविधान् भक्ष्यविशेषान् कुर्वन्ति ॥

नालिकेरः शाखारहितो वृक्षः। चित्रमवलोक्यताम्—दृश्यते तत्र दीर्घदीर्घो नालिकेरकाण्डः, काण्डस्य शिरसि द्वादशाधिकानिपत्राण्यवेक्ष्यन्ते। केषुचिद्देशेषु केरपत्रैर्गृहपटलादिकं निर्मीयते। तस्य काण्डोऽपि पनसादिवद् गृहदारुत्वेनोपयुज्यते। फलत्वचा रज्जवः क्रियन्ते, आस्तरणान्यप्युयन्ते ॥

अपरिणत नालिकेरं लाङ्गलीत्युच्यते। लाङ्गलीजलं निदाघकाले पीयमानं स्वादु हितं च भवति। मद्यकाराः पल्लवकाण्डात् स्यन्दमानं रसं गृहीत्वा मद्यं संपादयन्ति। तत्

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

केचित् पिबन्ति। किन्तु तत् पीयमानमुन्मादं जनयति। तस्मात् तत् सर्वथा न पेयम् ॥

न सुरां पिबेत्; न कलञ्जं भक्षयेत्; इति हि महतामुपदेशः ॥

---

(१) प्रश्नाः—१. नालिकेरः कथं बहुधाऽभिधीयते २. नालिकेराः कुत्र बाहुल्येन प्ररोहन्ति? ३. कथं ते वर्धन्ते? ४. प्रवृद्धास्ते किं कुर्वन्ति? ५. कानि प्रयोजनानि नालिकेरवृक्षस्य तत्फलस्य च? ६. लाङ्गलीं मद्य खादित्वा किं जानीथ? ७. महान्तः किम् उपदिशन्ति।

(२) कर्तरिप्रयोगं वदत—

१. फलत्वचा रज्जवः क्रियन्ते, आस्तरणान्यप्युयन्ते।

२. केरफलसारो विविधे व्यञ्जनेभ्य उपयुज्यते।

३. यन्त्रे निष्पीडितात् केरफलसारात् स्नेहो गृह्यते जनैः ॥

(३) एवं पदं वदत-(Give one word for) :—

१. आसन्नेषु सिकतिलेषु प्रदेशेषु। २. सर्वम् अङ्गम ॥

(४) समानशब्दाः—

एको वा द्वौ	वा	= एकद्वाः।
द्वौ वा त्रयो	वा	= द्वित्राः।
त्रयो वा चत्वारो	वा	= त्रिचतुराः।
चत्वारो वा पञ्च	वा	= चतुःपञ्चाः।
पञ्च वाषट्	वा	= पञ्चषाः ॥ इत्यादयः

(५) उपसर्गयोगादर्थभेदः—

युज्—युङ्क्ते, अभियुङ्क्ते, उद्युङ्क्ते, उपयुङ्क्ते, नियुङ्क्ते, प्रयुङ्क्ते, वियुङ्क्ते, विनियुङ्क्ते, संयुङ्क्ते।

मा—माति। अनुमाति, निर्माति, परिमाति, प्रमाति ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

६) कृत्प्रत्ययान्ता :—

ग्रह् to receive (गृह्णाति)=गृहीतः, गृहीतवान्, गृह्णन्, गृह्यमाणः, गृहीत्वा (अनुगृह्य), ग्रहीतुम्, ग्रहीतव्यम्, ग्राह्यम्।
पा (पिब्) to drink - (पिबति) = पीतः, पीतवान्, पिबन्, पीयमानः, पीत्वा, निपीय, पातुम्, पातव्यम्, पानीयम्॥

७) जनपदवाचकाःशब्दा नित्यं पुंल्लिङ्गा बहुवचनान्ताश्च, यथा केरलाः, मद्राः, नेपालाः, आन्ध्राः, वङ्गाः, कलिङ्गाः, मगधाः, महाराष्ट्राः, सौराष्ट्राः काश्मीराः, कर्णाटकाः, भारतीयाः, सिंहलाः, आङ्गलाः (Englishmen). कम्बोडियाः (Combodians) इत्यादयः॥

८) पर्यायाः—

संवत्सरः६-संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत् समाः।
पर्णम् ६-पत्त्रं पलाशं छदनं दलं पर्णछदः पुमान्॥

सिकतिल *a* sandy
अमृतकल्प *a* nearly equal to nectar
केरफलसार *m* kernel
व्यञ्जन *n* an article used in seāsoning food
आतप *m* heat of the Sun
स्नेह *m* oil
कल्क *m* the viscous sediment deposited by oily substances when ground
पिण्याक *n* oil-cake
नालिकेरकाण्ड *m* the trunk of a coconut tree
गृहपटल *n* the roof of a house
दारु *n* timber
आस्तरण *a* a carpet
अपरिणत *a* unripe
लाङ्गली *f* tender coconut
निदाघ *m* Summer
मद्य *n* toddy
उन्माद *m* intoxication.
सुरा *f* toddy
कलञ्ज *n* flesh
सिंहलाः Ceylonese

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

४. परोपकारप्रशंसा

श्रूयतां धर्मसर्वस्वं यदुक्तं ग्रन्थकोटिषु।
परोपकारः पुण्याय पापाय परपीडनम् ॥ १

परोपकारः कर्तव्यः प्राणैरपि धनैरपि।
परोपकारजं पुण्यं न स्यात् क्रतुशतैरपि ॥ २

परोपकारशून्यस्य धिक् मनुष्यस्य जीवितम्।
जीवन्तु पशवस्तेषां चर्माप्युपकरिष्यति ॥ ३

परोपकाराय फलन्ति वृक्षाः परोपकाराय वहन्ति नद्यः।
परोपकाराय दुहन्ति गावः परोपकारार्थमिदं शरीरम् ॥ ४

श्रोत्रं श्रुतेनैव न कुण्डलेन दानेन पाणिर्न तु कङ्कणेन।
विभाति कायः खलु सज्जनानां परोपकारेण न चन्दनेन ॥ ५

पिबन्ति नद्यः स्वयमेव नाम्भः स्वयं न खादन्ति फलानि वृक्षाः।
नादन्ति सस्यान्यपि वारिवाहाः परोपकाराय सतां विभूतयः॥

---

१) प्रश्नाः—१. ग्रन्थकोटिषूक्तं धर्मसर्वस्वं किम्? २. कुतः परोपकारः कर्तव्यः? ३. 'जीवन्तु पशवः' कुत इदं प्रार्थ्यते? ४ परोपकाराय के किं कुर्वन्ति? ५. सज्जनानां कायः केन विभाति? ६. 'परोपकाराय सतां विभूतयः' इदं दृष्टान्तेन निरूपयत?

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२) निर्दिष्टानां धातूनां लिङो रूपैः वाक्यानि पूरयत—

१) भूतिमिच्छन्तो जनाः स्वीयानि कर्माणि काले कृ...।
२) वयं बालादपि शुकादपि युक्तियुक्तं वचो ग्रह्...।
३) श्रेयस्कामो जनः सूर्योदये सूर्यास्तसमये च न शी...।
४) वयं धार्मिकेभ्य आचार्येभ्यो धर्मं श्रु...॥

३) उपसर्गयोगादर्थभेदः—

वह्—वहति, वहते। आवहति, उद्वहति, निर्वहति, प्रवहति, विवहति। एवमात्मनेपदेऽपि। प्रवहति 'इत्ययं तु नित्यं परस्मैपदीति बोध्यम्।

भा—भाति। प्रतिभाति, विभाति, अनुभाति॥

४) कृत्प्रत्ययान्ताः—

कृ to do—करोति. कुरुते = कृतः, कृतवान्, कुर्वन्, क्रियमाणः, कृत्वा (अनुकृत्य), कर्तुम्, कर्तव्यम्, करणीयम्, कार्यम्।

मृ to die—म्रियते = मृतः, मृतवान्, म्रियमाणः, मृत्वा (अनुमृत्य), मर्तुम् मर्तव्यम्, मरणीयम्॥

५) समानरूपा धातवः—द्रा, पा, भा, मा, या, वा, ष्ठा,॥

(६) चरन्, वहन्, पश्यन्, रुदन्, गच्छन्—एषां शत्रन्तानां लटि प्रथमपुरुषैकवचने रूपाणि निर्दिशत।

७) पर्यायाः—प्राणाः २—पुंसि भूम्न्यसवः प्राणाः॥

(पुंसि = पुंलिङ्गे ; भूम्नि = बहुवचने)

क्रतु *m* sacrifice याग
वारिवाह *m* cloud मेघ
विभूति *f* prosperity
चर्म *n* skin.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri



५. कमलम्

कमलानि सरसि पङ्के जायन्ते। अतस्तानि सरसिजानि पङ्कजान्यम्भोजानीत्यादिभिः शब्दैर्व्यवह्रियन्ते। कमलेषु नानाजातयः सन्ति। तत्र नीलमम्भोरुहम् 'उत्पलम्' इति, रक्तम् 'कोकनदम्' इति, सितम् 'पुण्डरीकम्' इति चाभिधां भजति॥

कुवलयान्यपि सरसि पङ्के एव जायन्ते। अथापि तेषां न पङ्कजादिशब्दैर्व्यवहारः। कुवलयानि कमलाकाराण्येव। किन्तु तेषु सौगन्ध्यं नास्ति॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

चित्रं पश्य, कानिचित् कुसुमानि मुकुलितानि, कानिचित् विकसितानि च दृश्यन्ते। कुसुमस्याधस्ताद्दृश्यमानः प्रकाण्डो मृणाळम्। मृणालस्यान्तर्भागे छिद्राणि तन्तवश्च वर्तन्ते॥

कमलसरांसि कमलिन्यः इति कुमुदसरांसि कुमुदिन्य इति चोच्यन्ते। कमलिन्यः सूर्यस्य कुमुदिन्यश्चन्द्रस्य चोदये विकसन्ति। तेन सूर्यः कमलिनीनायक इति, चन्द्रः कुमुदिनीनायक इति च प्रसिध्यतः। हेमन्ते हिमेन सिक्ताः कमलिन्यः स्मरणीयशोभाः सम्पद्यन्ते॥

कमलानां मध्यभागे किञ्जल्काः सन्ति। तेषु सुगन्धयः परागा विद्यन्ते। मधुकराः प्राधान्येन कमलेभ्यो मधु पिबन्ति॥

यद्यपि मल्लिकादीनि कुसुमानि कमलापेक्षया सुगन्धितराणि तथापि तेषामेतावत् सौन्दर्यं नास्ति। अरविन्दान्येव कुसुमेषु सुन्दरतमानि। अत एव पद्मं पद्मायाः सद्म निगद्यते॥

---

(१) प्रश्नाः—१. कुतः कमलानि सरसिजानि पङ्कजानीत्यादिभिः शब्दैः व्यवहियन्ते? २. उत्पलं कोकनदं पुण्डरीकं च किम्? ३. कुवलयान्यधिकृत्य किं जानीथ? ४. किं नाम मृणालम्? ५. 'कमलिनीनायकः' 'कुमुदिनीनायकः' इति व्यपदेशे किं कारणम्? ६. कुतः पद्मं पद्मायाः सद्म निगद्यते?

२) तत्तद्धातूनां निर्दिष्टैः लकारैः वाक्यानि पूरयत—

१) सरांसि जानि शैवलेनावृतान्यपि रम्याणि भा...(लट्)।

२) मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तन्...(लट्)।

३) त्वं स्मात् सरसः पञ्चषाणि कमलानि ग्रह्...(लोट्)॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३) अतिशायनार्थकौ तरप्-तमप् प्रत्ययौ (Degrees of Comparison)—

सुगन्धि	सुगन्धितरम्	सुगन्धितमम्।
सुन्दरम्	सुन्दरतरम्	सुन्दरतमम्॥

४) कृत्प्रत्ययान्ताः—

सिच् to water (सिञ्चति) सिक्तः, सिक्तवान्, सिञ्चन्, सिच्यमानः, सित्वा, (निषिच्य) सेक्तुम्, सेक्तव्यम्, सेचनीयम्, सेच्यम्।

मुचू to set free—(मुञ्चति) मुक्तः, मुक्तवान्, मुञ्चन्, मुच्यमानः, मुक्त्वा, (विमुच्य) मोक्तुम्, मोक्तव्यम्, मोचनीयम्, मोच्यम्॥

५) उपसर्गयोगादर्थभेदः—

अय्—अयते। उदयते, परा + अयते = पलायते।
पद्=पद्यते। आपद्यते, उत्पद्यते, उपपद्यते, निष्पद्यते, प्रपद्यते, प्रतिपद्यते, विपद्यते, सम्पद्यते॥

६) पर्यायाः—

पद्मम् १७—वा पुंसि पद्मं नलिनम् अरविन्दं महोत्पलम्।
सहस्रपत्रं कमलं शतपत्रं कुशेशयम्॥
पङ्केरुहं तामरसं सारसं सरसीरुहम्॥
विसप्रसून राजीव पुष्कराम्भोरुहाणि च॥

पुष्पम् ५—स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं सुमम्॥
(स्त्रियः सुमनसः—सुमनस् शब्दः स्त्रीलिङ्गः, बहुवचनान्तश्च इत्यर्थः)॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

उत्पल *n* blue lotus
कोकनद *n* red lotus
पुण्डरीक *n* white lotus
अभिधा *f* name नामन्
सौगन्ध्य *n* fragrance; odour
मुकुलित *a* half blossomed
विकसित a blossomed
प्रकाण्ड *m* stem
मृणाल *n* stem of lotus
तन्तु *m* fibre
किञ्जल्क *m* filament of a lotus
पराग *m* the pollen of a lotus
अरविन्द *n* a lotus
पद्म *n* lotus
पद्मा *f* Goddess Lakshmi
सद्मन् *n* abode
शैवल *n* moss
लक्ष्मन् *n* mark

---

६. नहुषमहाराजः

पुरा किल चन्द्रवंशे पुरूरवसः पौत्र आयुषः पुत्रः शीलवान् मतिमान् धार्मिकश्चनहुषो नाम नरपतिरासीत्। स च महता विभवेन शतमश्वमेधानाहृत्य द्वितीयः शतक्रतुरिव व्यराजत॥

अत्रान्तरे वृत्रं हत्वा पापमवाप्य स्वपदात् प्रच्युतो वासवः तत्प्रायश्चित्ततया कञ्चित्कालमन्तर्जले न्यलीयत। तस्मिन्नवसरे नहुषोऽयं देवराजपदमधिरोपितः। तत्पदमधिरूढमात्र एव स राजा श्रीमदान्धः सर्वमेव लोकं तृणायामन्यत॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अथ स इन्द्राणीं द्रष्टुमिच्छन् महताऽऽडम्बरेण तस्या वासभवनं गच्छन् सप्तर्षीनानाय्य स्वशिबिकावहनायादिदेश। सप्तर्षयस्तस्य शासनमनुल्लङ्घनीयं ज्ञात्वा शिबिकां वहन्तः कथं कथमपि चेलुः। राजा च तान् सर्वान् पदे पदे स्खलतः परुषवचनैरनिन्दन्। विशेषतश्चैतरैः सह गन्तुमशक्तं ह्रस्वकायमगस्त्यम्—'कुम्भडिम्भ! सर्प सर्प' इत्यधिचिक्षेप॥



आत्मानमधिक्षिप्तं पश्यन् भृशं व्याकुलीभूतश्चुलुकीकृताम्भोराशिः कुम्भयोनिर्नहुषं 'सर्पो भव' इत्यशपत्। शप्तमात्र एव नहुषो महाकायः काकोदरो भूत्वा शिबिकातः क्षितौ पपात॥

मानो हि महतां धनम्। अतः उन्नतं पदं प्राप्तो मान्यान् नावमन्येत॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१) प्रश्नाः—१. नहुषः कीदृशो नरपतिरासीत्? १. कस्मिन्नवसरे स देवराजपदमधिरोपितः? ३. कुतः स महाकायः काकोदरोऽभवत? ४. नहुषस्य कथया कः उपदेशः गृह्यते युष्माभिः?

२) लोकं तृणायामन्यत—अत्र व्याकरणविशेषः कः?

३) कृत्प्रत्ययान्ताः

हन् to kill—हन्ति=हतः, हतवान् घ्नन्, हन्यमानः, हत्वा. (निहत्य) हन्तुम्, हन्तव्यः, हननीयः, वध्यः।

मनू to think—मन्यते = मतः, मतवान्, मन्यमानः, मत्वा, (अवमत्य) मन्तुम्, मन्तव्यः, मननीयः, मान्यः।

शप् to curse—शपति=शप्तः, शप्तवान्, शपन्, शप्यमानः, शप्त्वा, (अभिशप्य), शप्तुम्, शप्तव्यम्, शपनीयम्।

क्षिप् to throw—क्षिपति = क्षिप्तः, क्षिप्तवान्, क्षिपन्, क्षिप्यमाणः, क्षिप्त्वा. (आक्षिप्य) क्षेप्तुम्, क्षेप्तव्यम्, क्षेपणीयम्, क्षेप्यम्॥

४) पर्यायाः—

इन्द्राणी ५—पुलोमजा शचीन्द्राणी पौलोमी मघवप्रिया।

अगस्त्यः ४—कुम्भयोनिरगास्तः स्यात् अगस्त्यः—[कुम्भसम्भवः॥

सर्पः २६—सर्पः प्रदाकु भुजगो भुजंगोऽहिर्भुजंगमः।
आशीविषो विषधरश्चक्री व्यालः सरीसृपः॥ १
कुण्डली गूढपाच्छ्वभ्रः कोदरः फणी।
दर्वीकरो दीर्घपृष्ठो दन्दशूको बिलेशयः॥ २
उरगः पन्नगो भोगी जिह्मगः पवनाशनः।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विभव *m* riches
आहृत *in.* having performed
शिबिका *f* palanquin
शासन *n* order
सर्प *m.* serpent
सर्प *v.* (Imperative mood) you move on.
चुलुकीकृताम्भोराशि *m* he who has made the ocean, a handful of water



७. पक्षिणः

पक्षिणां पक्षौ पादौ च स्तः । अतस्ते पक्षाभ्यां व्योम्नि डयितुं पादाभ्यां भूमौ चलितुं च शक्नुवन्ति । यदा ते डयन्ते

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तदा पक्षौ विवृण्वन्ति, यदा च क्वचिदुपविशन्ति तदा संवृण्वन्ति। कुक्कुटादयः केचिदण्डजाः पक्षवन्तोऽपि सम्यग्डयितुं न प्रभवन्ति। गरुडाः कदाचिदत्यूर्ध्वं नभसि पतन्ति। हंसादयः केचित् पक्षिणो जले चरन्ति॥

पक्षिणो वृक्षशाखासु नीडानि निर्माय तत्र निवसन्ति। नीडानि तृणकणैर्निर्मीयन्ते। आलेख्येऽस्मिन्नेका विहगी शाखायामुपविष्टा। तस्याः सविधे कश्चित् कुलायो दृश्यते। तस्मिन् कुलाये चत्वारः शावकाः सन्ति। सा विहगी तेभ्यो धान्यकणान् ददाति॥

विहगा अहन्याहाराय चरित्वा सायं स्वनीडमागच्छन्ति। रात्रौ तत्र निद्राय प्रातस्तरां प्रबुध्यन्ते। प्रबुध्य च वृक्षात् वृक्षमटन्तो मधुरं विरुवन्तश्च जनानामानन्दं जनयन्ति। उदिते च भानौ भूय एवाहारार्थं आभ्यन्ति। पक्षिणां दन्ताभावात् ते चञ्च्वा भक्ष्याणि खादन्ति। वाग्गुदानां तु दन्ताः सन्ति, पक्षौ च स्तः। ते न अण्डजाः। अतः ते मृगजातावन्तर्भवन्ति॥

विहगाः फलानि धान्यानि कृमीन् कीटान् वा यथेष्टमाहरन्ति। पारावतः पिकः शुकश्चटकश्च प्राधान्येन धान्यानि फलानि च खादन्ति। गृध्रस्ताक्ष्यों बक इत्यादयो मांसमप्यश्नन्ति। काको मांसं धान्यं फलं च भक्षयति। अग्निकणभक्षिणः शिलाशकलभक्षिणश्च केचिद्विहगाः श्रूयन्ते।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

चातकास्तु केवलं जलदेभ्यः पतितान् जलबिन्दूनाहरन्तो जीवन्तीति कवयो वर्णयन्ति ॥

---

१) प्रश्नाः—१. के के पक्षिणः कुत्र कुत्र कथं चलन्ति ? २. ते कुत्र निवसन्ति ? ३. दिवा नक्तं च पक्षिणः कथं कालं नयन्ति ? ४. के के पक्षिणः किं किं भक्षयन्ति ? ५. वाग्गुदाः कस्यां जातौ अन्तर्भवन्ति ? कुतः ?

२) नाम निर्दिश्य प्रयोगं विपरिणमयत—

१) विहगाः फलानि कीटान् वा यथेष्टमाहरन्ति ।
२) अग्निकणभक्षिणः केचिद्विहगाः श्रूयन्ते ।
३) पक्षिभिर्वृक्षाणां शाखासु नीडानि निर्मीयन्ते ।

३) निर्दिष्टैस्तत्तद्धातूनां लकारैः वाक्यानि पूरयत—

१) वयं व्योमयानेन व्योम्नि उड्डयितुं शक्...(लट्) ।
२) वयं शिशुभ्यो गवां क्षीरं यच्छ्...(लट्) ।
३) न खलु क्षुधितोऽपि शार्दूलः शाद्वलं अद्...(लट्) ।

४) कृत्प्रत्ययान्ताः—

विश् to enter—विशति = विष्टः, विष्टवान्, विशन्, विश्यमानः, विष्ट्वा, (प्रविश्य) वेष्टुम्, वेष्टव्यम्, वेश्यम् ।

बुध् to know—बुध्यते = बुद्धः, बुद्धवान्, बुध्यमानः (active), बुध्यमानः (Passive), बुद्ध्वा, (प्रबुध्य) बोद्धुम्, बोद्धव्यम् बोधनीयम्, बोध्यम् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

५) उपसर्गयोगादर्थभेदः—

विशू—विशति। आविशति, उपविशति, निर्विशति प्रविशति, संविशति।

वृ—वृणोति, वृणुते, । आवृणोति. अपवृणोति, अपावृणोति, विवृणोति, संवृणोति। एवम्, आवृणुते इत्यादि आत्मनेपदेऽपि द्रष्टव्यम्॥

६) पर्यायाः—

पक्षी २७—खगे विहङ्ग विहग विहङ्गमविहायसः।
शकुन्ति पक्षि शकुनि शकुन्त शकुनद्विजाः।
पतत्रि पत्रि पतग पतत्पत्ररथाण्डजाः।
नगौकोवाजिविकर वि विष्कर पतत्रयः॥
नांडोद्भवाः गरुत्मन्तः पित्सन्तो नभसङ्गमाः॥

पक्ष *m.* a wing	कृमि *m* worm
व्योमन् *n* sky	कीट *m* an insect
ढयन्ते *A* fly	पारावत *m* pigeon
विवृण्वन्ति *P.* open	चटक *m* sparrow
संवृण्वन्ति *P.* close	गृध्र *m* vulture
अण्डज *m* bird	तार्क्ष्य *m* Garuda
आलेख्य *n* picture	बक *m* crane
कुलाय *m* nest	चातक *m* a kind of bird which lives only on rain drops.
विरुवत् *a* crying	
चञ्चु *f* beak	
पारगुद *m* bat	

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

८. कीलोत्पाटी वानरः

अव्यापारेषु व्यापारं यो नरः कर्तुमिच्छति ।
स नूनं निधनं याति कीलोत्पाटीव वानरः ॥

तद्यथा — अस्ति ब्रह्मारण्यस्य समीपे विरिञ्चिपुरं नाम नगरम् । तत्र शुभदत्तनामा धनवान् वैश्यः प्रतिवसति । तस्य चिराय सन्ततिर्नासीत् । तेन स धर्मपरो भूत्वा दानधर्मादिकमाचरत् । व्रतान्यन्वतिष्ठत् । कूपतटाकादीन्यखानयत् । अन्ततश्च दैवज्ञानामादेशेन कञ्चिद्देवालयं निर्मातुमुपाक्रमत ॥



अथ सोऽरण्यपरिसरे कारुभिर्दारुकर्म कारयामास । एकस्मिन् दिवसे कारवः करपत्रेणैकं स्तम्भं किञ्चिद्दूरं विदार्य

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

द्वयोः खण्डयोर्मध्ये कीलकं निधाय मध्यह्ने भोजनाय गृहं गताः। तदा तत्र कश्चिद्बलवान् वानरसन्दोहः क्रीडन्नागतः॥

वानराः प्रकृत्या चपलाः। अव्यापारेषु व्यापारो वानराणां जातौ प्रसिद्धः। तेषामेको वानरः कालप्रेरित इव तं कीलकं हस्ताभ्यां धृत्वा पादौ च दारुखण्डयोरुपरि निधायोपविष्टः। तदा तस्य पुच्छो दारुखण्डयोरभ्यन्तरं प्राविशत्। स वानरस्तं कीलकमचलयत्। स तु दृढतरोऽभूत्। अथापि स चापल्यादविरतो भूयोऽपि चलयन् महता यत्नेन तं कीलकमाकृष्टवान्। आकृष्टे च कीलके चूर्णितपुच्छः स इष्टदेवतां स्मरन् पञ्चत्वं गतः॥

---

१) प्रश्नाः—१. कः कुत्र देवालयं निर्मातुमुपाक्रमत? २. कुत्र वानरसन्दोहः क्रीडन्नागतः? ३. एको वानरः किमकरोत्? ४. तत्र किं वृत्तम्? ५. अनया कथया किमस्माभिर्गृह्यते?

२) अधोरेखाङ्कितानां स्थाने तत्तद्धातूनां 'लिट्' रूपाणि निवेशयत—

१. तस्य चिराय सन्ततिः न आसीत्।
२. तस्य पुच्छो दारुखण्डयोरभ्यन्तरं प्राविशत्।

३) प्रयोगान्तरतया विपरिणमयत—

१. जलं जलसम्पृक्तं महाजलाय भवति।
२. किं हीनकुसुमं सहकारं मधुकराः सेवन्ते?

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

४) उपसर्गयोगादात्मनेपदम्—उपक्रमते, प्रक्रमते ॥

५) कृत्प्रत्ययान्ताः (Participles)

कृष् to plough—कर्षति=कृष्टः, कृष्टवान्, कर्षन्, कृष्यमाणः, कृष्टा, (आकृष्य) कृष्टुम्, कृष्टव्यम्, कर्षणीयम्।
पिषू to crush—पिनष्टि=पिष्ट, पिष्टवान्, पिंषन्, पिष्यमाणः पिष्टा, (निपिष्य) पेष्टुम्, पेष्टव्यम्, पेषणीयम्।

६) पर्यायाः—

वानरः ९—कपि प्लवङ्ग प्लवग शाखामृग वलीमुखाः
मर्कटो वानरः कीशो वनौकाः ॥

दैवज्ञः ८—

सांवत्सरो ज्यौतिषको दैवज्ञगणकावपि।
स्युर्मौहूर्तिक मौहूर्त ज्ञानिकात न्तिका अपि ॥

दैवज्ञ *m* astrologer
आदेश *m* advice
कारु *m* carpenter
करपत्र *n* saw
कीलक *m* wedge
सन्दोह *m* group ; multitude
प्रकृति *f* natural form
इष्टदेवता *f* Favourite Deity
पञ्चत्व *n* Death
सहकार *m* mango tree

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri



९. धौम्य आरुणिश्च

आसीत् कश्चिदृषिर्धौम्यो नाम। तस्य शिष्यास्त्रयो बभूवुः-आरुणिः, उपमन्युः, वेदश्च, इति। स एकदा शिष्यमारुणिं पाञ्चाल्यं प्रेषयामास—'गच्छ, केदारखण्डं बधान'—इति॥

स उपाध्यायेन समादिष्ट आरुणिस्तत्र गत्वा तत् केदारखण्डं बन्धुं नाशकत्। स क्लिश्यमानोऽपश्यदुपायम्—'भवतु, एवं करिष्यामि'—इति। स तत्र केदारखण्डे संविवेश। शयाने च तथा तस्मिन्नुदकं तस्थौ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ततः किञ्चिदतीत्योपाध्यायो धौम्यः शिष्यावपृच्छत्—'क आरुणिः पाञ्चालको गतः?'—इति। तौ तं प्रत्यूचतुः—'भगवन्! त्वयैव प्रेषितो गच्छ केदारखण्डं बधान'—इति। स एवमुक्तः प्रत्युवाच—'तर्हि तत्र सर्वे गच्छामो यत्र स गतः' इति। तत्र गत्वोपाध्यायस्तस्याह्वानाय शब्दं चक्रार—'भो आरुणे! पाञ्चालक! क्वासि? वत्स! एहि'—इति॥

स तद्वाक्यमारुणिरुपाध्यायवाक्यं तस्मात् केदारखण्डात् सहसोत्थाय तमुपाध्यायमुपतस्थे, प्रोवाच चैनम्—'अयमस्मत्र केदारखण्डे निस्परमाणमुदकमवारणीयं संरोद्धुं संविष्टः। भगवच्छब्दं श्रुत्वैव सहसा विदार्य केदारखण्डम्, भवन्तमुपस्थितः। तदभिवादये भवन्तम्। आज्ञापयतु भवान् कमर्थं करवाणि'—इति॥

स एवमुक्त उपाध्यायः प्रत्युवाच—'यस्मात् केदारखण्डं विदार्योत्थितस्तस्मात् 'उद्दालक' एव नाम्ना त्वं भविष्यसि; यस्माच्च मद्वचनमनुष्ठितं तस्माच्छ्रेयोऽवाप्स्यसि। सर्वे च वेदास्ते प्रतिभास्यन्ति, सर्वाणि च शास्त्राणि'—इति।

अथोपाध्यायेनानुगृहीत आरुणिर्गुरुकुलात् गृहं न्यवर्तत॥

---

१) प्रश्नाः—१. आरुणिः कस्य शिष्यः? २. तमुपाध्यायः कुत्र प्रेषयामास? ३. उपाध्यायेनादिष्ट स किं चकार? ४. किञ्चिदतीत्योपाध्यायेनाहूतः स किं प्रोवाच? ५. उपाध्यायः किं प्रत्युवाच?

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१) तत्तद्धातूनां निर्दिष्टैः लकारैः वाक्यानि पूरयत—

१) पुरा शिष्या गुरुकुले वसन्तो विद्यां ग्रह...(लिट्)।
२) उपाध्यायेनादिष्टः शिष्यो गां गोष्ठे बन्ध...(लट्)।
३) केदारखण्डे शयानः स निःसरत्पाणमुदकं रुधू...(लिट्)।
४) नदी पर्वतादुत्पद्य समुद्रम् उप+इ...(लट्)॥

३) कृत्प्रत्ययान्ताः—

बन्धू to bind—बध्नाति=बद्धः- वध्नन्, बध्नन्, बध्यमानः, बद्ध्वा, आबध्य, बन्धुम्, बद्धव्यम् बन्धम्।
रुधू to obstruct—रुणद्धि=रुद्ध, रुद्धवान्, रुन्धन्, रुध्यमानः, रुद्ध्वा, (निरुध्य) रोद्धुम्, रोधनीयम्, रोद्धव्यम्, रोध्यम्॥

४) उपसर्गयोगादर्थभेदः—

इ—एति। अत्येति, अध्येति, अन्वेति, उपैति, अभ्येति, अवैति, प्रत्येति, व्यपैति, समेति।
ज्ञा—ज्ञापयति। आज्ञापयति, विज्ञापयति, अनुज्ञापयति॥

५) उपसर्गयोगादात्मनेपदम्—स्था—तिष्ठति। उपतिष्ठते।

६) पर्यायाः—

गुरुः५—उपाध्यायोऽध्यापकः स्यादाचार्यो देशिको गुरुः।
शिष्यः५—छात्रान्तेवासिनौ शिष्ये शैक्षाः प्राथमकल्पिकाः।
यशः७—यशः कीर्तिः समज्या च स्तवः स्तोत्रं स्तुतिर्नुतिः

केदारखण्ड *m* small dyke
संविवेश *P*, lied down
एहि (आ + इहि) *v* (you) come
पाञ्चाल्य *a* native of पाञ्चाल
गुरुकुल *n* teacher's abode

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१०. लोभी मत्सरी च

लोभो मत्सरश्च पुरुषस्य श्रेयसः पन्थानमवरुन्धाते। मत्सरी पुरुषः परस्य हानिमेवात्मनो लाभं मन्यते। लोभी तु लोभेनान्धीकृतो ऽनर्थपातं न पश्यति। श्रूयते चात्र काचित् कथा, यथा—आस्तामेकस्मिन् ग्रामे सुन्दसुन्दरनामानौ द्वौ पुरुषौ। तयोः सुन्दोऽतीव लोभी, सुन्दरोऽत्यन्तं मत्सरी चासीत्। तावेकदा चराचरगुरुं भगवन्तं परमेश्वरं प्रत्यक्षीकर्तुं क्वचिच्छिवमन्दिरे तपस्तेपाते॥

तयोस्तपसा प्रीतो भवानीपतिः सद्य एवाविर्भूय जगाद—'भोः साहसिकौ! युवयोरनन्यसाधारण्या भक्त्या तुष्टोऽस्मि। अलं भूयसा तपसा। वरं वृणीतम्। यद्वरिष्येथे तद्दास्यामि। परन्तु, यः प्रथमं यद्वरिष्यते स तल्लभेत। अन्यस्तु तदेव द्विगुणं लप्स्यते'—इति॥

भगवतो महादेवस्य तद्वचनं श्रुत्वा लोभी सुन्दः—'नाहमादौ वरं वृणे। अयं मम सखा भूरि द्रविणं याचिष्यते! तदेव द्विगुणं मया लभ्येत'—इति विचिन्त्य स्वयं तूष्णीमास्त॥

परस्योत्कर्षमसहमानो मत्सरी सुन्दरस्तु लोभिनं वञ्चयितुकामः साष्टाङ्गं प्रणिपत्य शिवमभ्यर्थयामास—'भगवन्! भक्तवत्सल! यदि मयि प्रसन्नोऽसि यदि च ते मय्यनुकम्पा तर्हि ममैकं नयनमन्धीभवतु'—इति। 'तथाऽस्तु' इति शूलिनोक्ते

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मत्सरी सद्य एवैकाक्षो जातः। लोभिनस्तु द्वे अप्यक्षिणी उपहते अभूताम्।

---

१) प्रश्नाः—१. सुन्दः सुन्दश्च कीदृशावास्ताम्? २. तौ किमर्थं तपस्तेपाते? ३. भवानीपतिराविर्भूय किं जगाद? ४. तद्वचनमाकर्ण्य लोभी सुन्दः किमचिन्तयत्? ५. मत्सरी सुन्दः शिवं किमभ्यर्थयामास? ६ तेन किं वृत्तम्?

२) लिटः स्थाने 'लङ्' रूपाणि निवेशयत—

१) पुरा विश्वामित्रो नाम ऋषिर्घोरं तपस्तेपे।
२) तस्य तपसा तुष्टो भगवांस्तस्य पुरस्तादाविर्बभूव।
३) तथा विचिन्त्य लोभी सुन्दस्तूष्णीमासाञ्चक्रे॥

३) प्रयोगं विपरिणमयत—

१) गच्छ, केदारखण्डं बधान।
२) आज्ञापयतु भवान् कमर्थं करवाणि।
३) परितुष्टाद्भगवतः स वरं वृणीते।
४) दुष्टः स्वदोषान् संवृणोति, परदोषांश्चापावृणोति॥

४) विकरणभेदः—वृ—वरणे—वृणाति. वृणीते।
वृ—आच्छादने—वृणोति, वृणुते॥

५) उपसर्गयोगादर्थभेदः—

सद्—सीदति। आसीदति. उत्सीदति, उपसीदति, निषीदति, प्रसीदति, विषीदति, प्रत्यासीदति॥

कम्प्—कम्पते। अनुकम्पते

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

६) कृत्प्रत्ययान्ताः—

प्री to be pleased—प्रीयते = प्रीतः, प्रीतवान्, प्रीयमाणः, प्रीत्वा, (संप्रीय), प्रेतुम्, प्रेतव्यम्।

तुष् to be pleased—तुष्यति = तुष्टः, तुष्टवान्, तुष्यन्, तुष्ट्वा, (सन्तुष्य) तोष्टुम्, तोषणीयम्, तोष्यम्॥

७) अतिशायनार्थकाः (Degrees of comparison)—

Positive	Comparative	Superlative
बहुः	भूयान्	भूयिष्ठः
पटुः	पटीयान्-पटुतरः,	पठिष्ठः-पटुतमः
महान्	महीयान्-महत्तरः	महिष्ठः-महत्तमः
दूरः	दवीयान्	दविष्ठः
अन्तिकः	नेदीयान्	नेदिष्ठः

८) पर्यायाः—

मत्सर १—मत्सरोऽन्यशुभद्वेषे।

लोभः २—लोभस्तृष्णा च गर्धनम्।

लोभी ३—लुब्धोऽभिलाषुकस्तृष्णकू लोभी गृध्नुश्च गर्धनः।

लोभ *m* avarice, greed	साहसिक *a* bold
मत्सर *m* jealousy	द्विगुण *a* twofold
हानि *f* loss	द्रविण *n* wealth
गर्तपात *m* falling into a ditch	शूलिन् *m* Lord Siva
शिवमन्दिर *n* Siva's temple	उपहत *a* injured
	अक्षि the eye.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

११. श्रीरामगुणानुवर्णनम्

इक्ष्वाकुवंशप्रभवो रामो नाम जनैः श्रुतः ।
नियतात्मा महावीर्यो द्युतिमान् धृतिमान् वशी ॥ १
बुद्धिमान् नीतिमान् वाग्मी श्रीमाञ्छत्रुनिबर्हणः ।
विपुलांसो महाबाहुः कम्बुग्रीवो महाहनुः ॥ २
महोरस्को महेष्वासो गूढजत्रुरिन्दमः ।
आजानुबाहुः सुशिराः सुललाटः सुविक्रमः ॥ ३
समः समविभक्ताङ्गः स्निग्धवर्णः प्रतापवान् ।
पीनवक्षा विशालाक्षो लक्ष्मीवाञ्छुभलक्षणः ॥ ४
धर्मज्ञः सत्यसन्धश्च प्रजानां च हिते रतः ।
यशस्वी ज्ञानसम्पन्नः शुचिर्वश्यः समाधिमान् ॥ ५
प्रजापतिसमः श्रीमान् धाता रिपुनिषूदनः ।
रक्षिता जीवलोकस्य धर्मस्य परिरक्षिता ॥ ६
रक्षिता स्वस्य धर्मस्य स्वजनस्य च रक्षिता ।
वेदवेदाङ्गतत्त्वज्ञो धनुर्वेदे च निष्ठितः ॥ ७
सर्वशास्त्रार्थतत्त्वज्ञः स्मृतिमान् प्रतिभानवान् ।
सर्वलोकप्रियः साधुरदीनात्मा विचक्षणः ॥ ८
सर्वदाभिगतः सद्भिः समुद्र इव सिन्धुभिः ।
आर्यः सर्वसमश्चैव सदैव प्रियदर्शनः ॥ ९

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

स च सर्वगुणोपेतः कौसल्यानन्दवर्धनः ।
समुद्र इव गाम्भीर्ये धैर्यण हिमवानिव ॥ १०

विष्णुना सदृशो वीर्ये सोमवत् प्रियदर्शनः ।
कालाग्निसदृशः क्रोधे क्षमया पृथिवीसमः ॥ ११

धनदेन समस्त्यागे सत्ये धर्म इवापरः ।
तमेवं गुणसम्पन्नं रामं सत्यपराक्रमम् ॥ १२

ज्येष्ठं श्रेष्ठगुणैर्युक्तं प्रियं दशरथः सुतम् ।
प्रकृतीनां हितैर्युक्तं प्रकृतिप्रियकाम्यया ॥ १३

यौवराज्येन संयोक्तुम् ऐच्छत् प्रीत्या महीपतिः ॥ १४

(श्रीमद्वाल्मीकिरामायणे बालकाण्डे प्रथमसर्गात्
उद्धृताः ८—२० श्लोकाः)

---

१) प्रश्नाः—१. श्रीरामस्य गुणान् स्व स्व वाक्यैः वर्णयत ।
२) दशरथः केन कारणेन रामं यौवराज्येन योक्तुमैच्छत् ?

२) निर्दिष्टानां धातूनां 'लङ्' रूपैः वाक्यानि पूरयत—
१) श्रीरामः इक्ष्वाकुवंशे दशरथस्य सुतत्वेन—(जन्) ।
२) स नीत्या प्रीत्या च प्रजाः—(पालु) ।
३) श्रीरामः स्मृतिमान् प्रतिभानवांश्च—(अस्) ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३) कृत्प्रत्ययान्तैः पदैः वाक्यानि पूरयत—

१) रामः पुरा पितुर्वचनाद्राज्यं त्यज्...वनं गतवान्।
२) पञ्चवट्यां वसतस्तस्य सहचरीं रावणो हृ...लङ्कां गतः।
३) रामो वानरैः सह सागरं तृ...लङ्कां प्रविष्टवान्।
४) तत्र रणे रावणं हन्—राज्यं च विभीषणाय दा—सीतामादायायोध्यां प्रतियातवान्॥

४) पर्यायाः—

बुद्धिः १४—बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः।
प्रेक्षोपलब्धिश्चित् संवित् प्रतिपज्ज्ञाप्तचेतनाः

यशिन् *m* one who has subdued his passions

वाग्मिन् *m* an eloquent man

निबर्हण *a* destroyer

कम्बुग्रीव *a* having the neck like conch shell

वेद *m* the scriptures of the Hindus, viz. ऋग्वेद, यजुर्वेद, सामवेद & अथर्ववेद

वेदाङ्ग *n* name of certain classes of works auxiliary to the Vedas

They are six in number

शीक्षा व्याकरणं छन्दो
निरुक्तं ज्योतिषं तथा।
कल्पश्चेति षडङ्गानि
वेदस्याहुर्मनीषिणः॥

प्रतिभावान् *a* real witted

सिन्धु *f* a river

सोम *m* moon

कालाग्नि destructive fire also शीरुद्रमूर्ति

धनदः *m* epithet of कुबेर

प्रकृति *f* the subjects (of a King)

संयोक्तुं *in* to entrust with.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१२. कदली

जगति विद्यामानास्तरुलतादिरूपा उद्भिदः केचित् फलपाकान्ताः, केचित्तथाभूताश्च । तेषु फलपाकान्ता उद्भिदः 'ओषधयः' इत्युच्यन्ते । कदलीनां फलपाक एवान्तो भवति । अतस्ता ओषधयो भवन्ति । व्रीह्यियवादयोऽप्योषधिवर्गेऽन्तर्भवन्ति ॥



कदल्यः फलदेषूद्भित्सु प्रशस्ताः क्षिप्रफलाश्च । वर्षेणैकेन ताः फलन्ति । कदलीप्रसव एकस्मिन् शतद्वयाधिकानि फलानि स्युः । सहस्रफला अपि केचिद्रम्भातरवः सन्ति ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

रम्भाफलानि नानाजातीयानि सन्ति, तेषां गुणो वर्णं आकारो रुचिश्च तत्तज्जातिभेदाद्भिद्यन्ते। सामान्यतः कदली-फलानि त्वचि पीतवर्णानि। कानिचिद्रक्तवर्णानि। अन्यानि कानिचिदन्तः पक्वान्यपि त्वचि हरितवर्णानि अपक्वानीव लक्ष्यन्ते। कानिचित् फलानि भक्ष्यमाणानि ज्व मुत्पादयन्ति॥

कदल्यः प्राधान्येन भारतवर्षे सर्वत्र प्ररोहन्ति। आफ्रिकामेरिकाखण्डयोरपि ता बहुत्रोपलभ्यन्ते। कदल्याः सर्वोपि भाग उपयोगाय कल्पते। तस्याः पत्राणि भोजनामत्रत्वेनोपयुज्यन्ते। कदल्याः काण्डे स्थितानां त्वचां पाटनायामन्ते काण्डसार उपलभ्यते। तस्मात् काण्डसारादमेरिकाखण्डस्था-जनाः सक्तून् सम्पाद्य तैरूपान् रधयन्ति। एवं कदल फलेभ्योऽपि शोषितेभ्योऽपूपोपयुक्तान् सक्तून् सम्पादयन्ति जनाः॥

कदलीद्रुमाणां मूलेऽङ्कुराः प्ररोहन्ति। ते स्थलान्तरे संरोप्यमाणाः पुष्टाङ्गाः फलानि वितरन्ति। केषाञ्चित् कदली-फलानामन्तर्भागे बीजानि विद्यन्ते। तान्यप्युप्यमानान्युद्भिद्यन्ते। कदल्यो दोहदं जलं च सर्वदाऽपेक्षन्ते॥

---

१) प्रश्नाः—१. का नाम ओषधयः? २. कदल्यः कथमोषधिवर्गेऽन्तर्भवन्ति? ३. नानाजातीयानि रम्भाफलानि कीदृशानि? ४. कदल्यः प्राधान्येन केषु देशेषूत्पद्यन्ते? ५. कदलीनां प्रयोजनानि कानि? ६. ताः कथं प्ररोप्यन्ते?

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२) प्रयोगं विपरिणमयत—

१) कानिचित् फलानि भक्ष्यमाणानि ज्वरमुत्पादयन्ति।

२) तस्याः पत्राणि भोजनाभत्रत्वेनोपयुज्यते जनैः।

३) कदल्याः काण्डस्यान्तः काण्डसार उपलभ्यते।

४) यादृशं बीजमुप्यते तादृशं फलमवाप्यते॥

३) अतिशायनार्थकैः पदैः वाक्यानि पूरयत—

१) जम्बुकः काकात् ... (पटु)।

२) भूमौ स्थलभागात् जलभागः ... (बहु)।

३) भगवान् अणोरणीयान् महतो ... (महत्)।

४) सूर्यापेक्षया चन्द्रो भूमेः ... (अन्तिक)।

५) चन्द्रापेक्षया सूर्यः ... (दूर)॥

४) उपसर्गविशेषाः—अन्तर्, आविस्, तिरस्, प्रादुस्।

भू —भवति। अन्तर्भवति, आविर्भवति, तिरोभवति प्रादुर्भवति।

अस—अस्ति। आविरस्ति, प्रादुरस्ति।

कृ —करोति, कुरुते। आविष्करोति। आविष्कुरुते, तिरस्करोति, तिरस्कुरुते।

धा —दधाति, धत्ते। तिरोदधाति, तिरोधत्ते, अन्तर्दधाति अन्तर्धत्ते॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

५) उपसर्गयोगादर्थभेदः—

ईक्ष्—ईक्षते। अपेक्षते, अवेक्षते, उपेक्षते, परीक्षते, प्रेक्षते, प्रतीक्षते, वीक्षते, समीक्षते॥

६) कृत्प्रत्ययान्ताः—

पच् to cook–(पचति)=पक्तः-पक्तवान्, पचन्, पच्यमानः, पक्त्वा, (विपच्य) पक्तुम्, पक्तव्यम्, पच्यम्॥

७) पर्यायाः—

कदली ५—कदली वारणबुसा रम्भा मोचांऽशुमत्फला॥

उद्भिद् *m* plant	आकार *m* shape
ओषधि *f* herb	त्वच् *f* skin, bark
व्रीहि *m* corn	भोजनपात्र *n* भोजनपात्र dining plate
यव *m* barley	
गुण *N. m* quality	सक्तु *m* flour
वर्ण *N. m* colour	दोहद *m. n.* manure.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१३. हंसः



यद्यपि पक्षिणः प्रायेण नभसि उडयन्ते तरुशाखासु च निवसन्ति, तथापि हंसादयः केचित् पक्षिणः सलिलगामिनः पृथिवीचारिणश्च दृश्यन्ते। ते बाहुल्येन पद्मिनीषु वसन्ति। मन्द भूभौ सञ्चरन्ति च। तेषां पक्षौ कोमलौ। अतस्ते उड्यमानाः सुदूरं गन्तु न पारयन्ति॥

तेषां गतिमधिकृत्य काचित् कथा श्रूयते, यथा-कदाचिदेकः काको हंसस्य मन्दगामितामुपहसन् सव्याजमवोचत्—'सखे! त्वं उड्डयनेऽत्यन्त निपुण इति मया बहुशः श्रुतम्। अतस्त्वां गतिं परीक्षितुमिच्छामि। युगपदस्मादृशात् प्रस्थितयोरावयोः कतरः प्रथमं सरसः पारं प्राप्नोतीति परीक्षावहे। तत् किमद्य मया सह ग्लहं कर्तुं सज्जोऽसि?—इति। हंसः 'तथा कुवः' इति तद्वचनमङ्गीचकार॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ततस्तावुभावपि युगपत् प्रातिष्ठेताम्। हंसो यावत् पञ्चषाणि पदानि गच्छति तावत् काको द्रुतं डयमानः सुदूरं जगाम। परं काको द्रुतगत्या नितान्तं श्रान्तः सरसः मध्ये पतित्वा पञ्चत्वं गतः। हंसस्तु मन्दं सञ्चरन् पदे पदे विश्राम्यन् केनचित् समयेन सरसः पारं प्रापत् ॥

हंसानां गरुतः श्वेताः, इतराण्यङ्गानि तु पीतानि। केषाञ्चन हंसानां चञ्चुचरणाश्च लोहिताः। ते राजहंसा इति व्यपदिश्यन्ते। मल्लिकाक्षा अपि हंसभेदा एव। तेषां चञ्चुचरणाश्च धूम्रवर्णाः। हंसानां स्त्रियो 'हंस्यः' इति 'वरटाः' इति चाभिधीयन्ते ॥

यथा विष्णोर्गरुडस्तथा ब्रह्मणो वाहनं हंस इति पुराणेषु श्रूयते। कवयो हंसान् नीरक्षीरयोः पृथक्करणे शक्तानाहुः। उक्तं च—

हंसः शुक्लो बकः शुक्लः को भेदो बकहंसयोः।
नीरक्षीरविभागे तु हंसो हंसो बको बकः ॥—इति ॥

ईदृशा हंसाः सम्प्रति क्वापि नोपलभ्यन्ते जगति। कविभिस्तावदेतादृशानां हंसानां रात्रौ सञ्चारः मानसाख्ये सरसि निवासश्च वर्ण्यते ॥

हंसा विषाहारा इत्याचक्षते कवयः। अथापि ते बाहुल्येन मत्स्यान् भक्षयन्ति। हंसा पद्मसरसामलङ्कारभूताः प्रेक्षकाणामक्षीण्यावर्जयन्ति ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१) प्रश्नाः—१. पक्ष्यन्तराणां हंसादीनां च को भेदः? हंसानां गतिः कीदृशी? ३. तामधिकृत्य का कथा श्रूयते? ४. हंसभेदाः के? ५. कानि तेषां लक्षणानि? ६. कविभिरुक्ताः हंसाः कीदृशाः? ७. हंसानामाहारः कः?

२) प्रयोगान्तरतया विपरिणमयत—

१) हंसाः प्राधान्येन पद्मनीषु वसन्ति।

२) कवयो हंसान् नीरक्षीरविभागे शक्तानाहुः॥

३) निर्दिष्टैर्लकारैः वाक्यानि पूरयत—

१) शुकोऽपि जनैः शिक्षितो राम रामेति ब्रू ... लङ्।

२) राघवेण पृष्टो हनूमान् रामस्य दूतोऽहमिति आ+चक्षू- लङ्।

३) मद्वचनात् त्वं पितरमेवं ब्रू... लोट्-

४) उपसर्गयोगादर्थभेदः—

चर्—चरति। अनुचरति, आचरति, चरति, उपचरति, परिचरति, प्रचरति, सञ्चरति।

लभ्—लभते। आलभते, उपलभते, उपालभते, विप्रलभते।

५) कृत्प्रत्ययान्ताः—

चक्ष् to tell—(चष्टे)। ख्यातः, ख्यातवान्, चक्षाणः, ख्यायमानः ख्यात्वा, (आख्याय), ख्यातुम्, ख्यातव्यः, ख्येयः।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अस् to be—(अस्ति)। भूतः, भूतवान्, सन्, अनुभूयमानः, भूत्वा, (अनुभूय). भवितुम्, भवितव्यम्, भाव्यम्॥

६) अङ्गीकरोति, अलङ्करोति, नमस्करोति, वशीकरोति एतैः पृथक् पृथक्, वाक्यानि रचयत॥

७) एकपदं वदत—१. नितान्तं श्रान्तः। २. नितान्तं पटुः॥

८) पर्यायाः—

हंसः ५—हंसास्तु श्वेतगरुतश्चक्राङ्गा मानसौकसः।
राजहंसस्य लक्षणः—
'राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिताः॥' इति

युगपत् *in* simultaneously
पार *n* the other bank
ग्लह *m* bet
गरुत् *m* feather
धूम्रवर्णः *a* smoke
बकः *n* crane
विसाहार *a* one whose food is lotus stalk [coloured
प्रेक्षक *a* observer.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri



१४. उष्ट्रः

उष्ट्रो नाम कश्चिद्वक्रकायो जन्तुः। स गज इवात्यन्तं प्रांशुः। तस्यावयवास्तु तनीयांसः। तस्य चरणाः कृशा दीर्घाश्च। कन्धरा त्वायता कुटिला च। पुच्छो ह्रस्वः। उष्ट्राणां पृष्ठभाग एको गड्डुर्विद्यते। केषाञ्चित्तु द्वौ गड्डू स्तः। उष्ट्राः सर्वदोर्ध्वमेव पश्यन्ति॥

इत्थमुष्ट्रो यद्यपि विरूपाकृतिस्तथापि स मनुष्याणामत्यन्तोपकारी जन्तुः। गजो हि गुरुतरान् भारान् वोढुं क्षमते, न तु शीघ्रं गन्तुम्। अश्वस्तावद्द्रुतं गन्तुं शक्नोति, न त्वतिमहतो

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

भारान् वोढुम्। उष्ट्रस्तु महान्ति भाण्डानि वहन् द्रुततरं गच्छति। चित्रेऽस्मिन्नेकः पुरुषः उष्ट्रस्योपरिष्टादुपविष्टः। कदाचित् पञ्चषा अपि जना उष्ट्रमारूढाः सञ्चरन्ति॥

सन्ति खल्वारभादिदेशेषु समुद्रवदतिविशाला अदृश्यमानसीमानो मरुभूमयः; यत्र हि गृहाणां नदीनां कूपानां वृक्षाणां च कथाऽपि न विद्यते, तत्रोष्ट्राः केवलं सञ्चारार्थमुपयुज्यन्ते। उष्ट्राः खलु बहून् दिवसान् निराहाराः सञ्चरितुं शक्ताः। प्रस्थानकाले ते पञ्चषेभ्यः दिवसेभ्यः पर्याप्तं जलं पिबन्ति। अतः समुद्रेषु महानौका इव मरुभूभागेषु सञ्चरतां जनानामुष्ट्रा एवाश्रयाः। अत एवारभीयाः सार्थवाहा उष्ट्रान् स्तुत्या गीत्या चोपगायन्ति॥

उष्ट्राः प्राधान्येन निम्बपत्राण्यश्नन्ति। कण्टकवृक्षेषु तेषां महती प्रीतिः। उष्ट्राणां शावकाः 'करभा' इत्यभिधीयन्ते। कलभास्तु करिशावकाः॥

---

१) प्रश्नाः—१. कथमुष्ट्रो विरूपाकृतिः? २. कथं स मनुष्याणामत्यन्तोपकारी जन्तुः? ३. कस्मादारभीया उष्ट्रान् स्तुत्या गीत्या चोपगायन्ति? ४. उष्ट्राः किं भक्षयन्ति? ५. करभाः कलभाश्च के?

२) प्रयोगं विपरिणमयत—

१) गजा गुरुतरान् भारान् वहन्ति।
२) उष्ट्रा बहून् दिवसान् निराहाराः सञ्चरितुं शक्नुवन्ति।
३) ते पञ्चषेभ्यो दिवसेभ्यः पर्याप्तं जलमेकदैव पिबन्ति

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३) निर्दिष्टानां धातूनां लृटो रूपैः वाक्यानि पूरयत—

१) यस्मान्मद्वचनमनुष्ठितं तस्माच्छ्रेयः (अवाप्) ...।

२) सर्वे वेदाः सर्वाणि च शास्त्राणि ते (प्रति + भा) ...।

३) अन्यस्तु प्रथमेन यद्याचितं ततो द्विगुणं (लभ्) ...।

४) भो, सखे, अहं कर्णमधुरं ते गानं (श्रु) ...।

४) अतिशायनार्थकानि विशेषरूपाणि—

तनुः	तनीयान्	तनिष्ठः।
स्थूलः	स्थवीयान्	स्थविष्ठः।
कृशः	कृशीयान्	कृशिष्ठः।
लघुः	लघीयान्	लघिष्ठः।
गुरुः	गरीयान्	गरिष्ठः।
ह्रस्वः	ह्रसीयान्	ह्रसिष्ठः।
दीर्घः	द्राघीयान्	द्राघिष्ठः।

५) कृत्प्रत्ययान्ताः—

वह् to carry—(वहति) ऊढः, ऊढवान्, वहन्, उह्यमानः, ऊढ्वा, (समुह्य) बोढुम्, वोढव्यम्, वहनीयम्।

रुह् to grow—(रोहति)। रूढः, रूढवान्, रोहन्,—रूढ्वा, रोढुम्, रोढव्यम्, रोहणीयम्॥

६) एकपदीकुरुत—अत्यन्तं प्रांशुः, अतीव गुरुः, अतीव द्रुतम्॥

७) पर्यायाः— उष्ट्रः ४—उष्ट्रे क्रमेलक मय, महाङ्गः—'करभः' शिशुः उष्ट्राणां वृन्दम्' = औष्ट्रकम्॥

उष्ट्र *m* camel	मरुभूमि *f* desert
काय *m* body	करभ *m* young camel
कृश *a* lean	कलभ *m* young elephant
आयत *a* long	आरभीय *n* Arab
गदु *m* hump	निम्ब *n* margo-tree
प्रांशुः *a* high, tall	कण्टकवृक्ष *n* Thorny tree

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri



१५. महात्मा दधीचः

कालेया नाम दानवाः पुरा वृत्रं समाश्रित्य त्रिविष्टपं पीडयामासुः। तान् हन्तुमशक्नुवन्तः शक्रादयो देवाः परिम्लान-मुखश्रियो ब्रह्माणमुपेत्य हृदयङ्गमैः स्तवैस्तं तुष्टुवुः। अथ पुरस्तादाविर्भूताय तस्मै दानवभंय निवेद्य तमन्वयुञ्जत-'भगवन् किमत्र करवामहै' इति। ब्रह्माऽब्रवीत्—'वत्साः, मा विभीत।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

दधीचमृषिं गत्वा तस्यास्थीनि गृह्णीत। तैश्च वज्रं कृत्वा तेन वृत्रं हत' इति॥

तद्वचनमनुसृत्य देवाः सद्य एव दधीचस्याश्रमं गत्वा नत्वा च तं तदीयान्यस्थीन्ययाचन्त। तेषामभ्यर्थनया स महर्षिः प्रहर्षमगात्। आत्मनः शरीरलाभं बहुमन्यत। स्वीयं तपः फलितमाकलयत्। सद्य एव स महात्मा त्रैलोक्यस्य हितायात्मनः प्राणानुत्ससर्ज। परासोस्तस्यास्थीन्यादाय देवास्त्वष्ट्रा वज्रं कारयामासुः॥

तदनु शक्रपुरोगमाः सुमनसो रोदसी आवृत्य तिष्ठन्तं कालेयैरभिरक्षितुं वृत्रमभ्ययान्। तैः सह देवानां तुमुलमायोधनं प्रावर्तत। रजोभिः सर्वाः ककुभो व्याप्यन्त। सर्वे लोका अकम्पन्त। एवं भूते व्यतिकरे विष्णुतेजसाऽऽविष्टो जिष्णुरेकाकी रणधुरां वहन् वृत्रस्य शिरसि वज्रमपातयत्। वृत्रो भग्नशिराः क्षितावपतत्। देवाः समाश्वसन्। इन्द्रो 'वृत्रहा' इति प्रथां प्राप्नोत्॥

१) प्रश्नाः—१. शक्रादयो देवाः किंनिमित्तं ब्रह्माणमुपायन्, किञ्चः तमन्वयुञ्जत? २. ब्रह्मा किमब्रवीत्? ३. देवाः किमकुर्वन्?
४. दधीचः किमकरोत्? ५. देवाः किं चक्रुः?
६. ते कमभ्यायन्? ७. ततः किमासीत्?

२) प्रयोगं विपरिणमयत—

१. भगवन् किमत्र करवामहै।
२. दधीचमृषिं गत्वा तस्यास्थीनि गृह्णीत।
३. तैश्च वज्रं कृत्वा तेन वृत्रं हत॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३) निर्दिष्टैर्लकारैः वाक्यानि पूरयत—

१) ब्रह्मा परिम्लानमुखश्रियो देवान् अनु+युज् ... (लङ्)।

२) शक्रपुरोगमा देवा दधीच्यमृषिं गत्वा तस्यास्थीनि ग्रह- (लङ्)।

३) सं+आ+श्वस् (लोट्) भवन्तः, युष्माकं पीडा नश् ... (लृट्)॥

४) उपसर्गयोगादर्थभेदः—

आप्—आप्नोति, अवाप्नोति, समाप्नोति, प्राप्नोति, व्याप्नोति।

श्वस्—श्वसिति। आश्वसिति, निःश्वसिति, विश्वसिति।

सृ—सरति। अनुसरति, अपसरति, उपसरति, निःसरति, परिसरति, प्रसरति॥

५) कृत्प्रत्ययान्ताः—

श्रि (to approach)—(श्रयति, श्रयते)=श्रितः, श्रितवान्, श्रयन्, श्रयमाणः, श्रियमाणः, श्रित्वा, (आश्रित्य) श्रयितुम्, श्रयितव्यम्, श्रयणीयम्।

सृ (to move)-(सरति)-सृतः, सृतवान्, सरन्. अनुस्रियमाणः, सृत्वा, (अनुसृत्य) सर्तुम्, सर्तव्यम्, सरणीयम्।

स्तु (to praise)—(स्तौति, स्तवीति)=स्तुतः, स्तुतवान्, स्तुवन्, स्तूयमानः. स्तुत्वा, (संस्तुत्य), स्तोतुम्. स्तोतव्यम्, स्तवनीयम्।

नम् (to salute)—नमति=नतः, नतवान्, नमन्, नम्यमानः, नत्वा, (प्रणम्य) नन्तुम्, नन्तव्यम्, नम्यम्॥

६) पर्यायाः—

असुरः १०—असुरा दैत्य दैतेय दनुजेन्द्रारि दानवाः।
शुक्रशिष्याः दितिसुताः पूर्वदेवाः सुरद्विषः॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

महात्मा *a* महाशयः=उदारचित्तः, दयालुः, noble minded

त्रिविष्टप *n* heaven
परिम्लान *n* faded ; withe-
हृदयङ्गम *a* attractive [red
दानव *m* demon
अन्वयुञ्जत *A* युज् with अनु asked, questioned
अस्थि *n* bone
वज्र *n* thunderbolt
परासु *a* devoid of life
त्वष्टृ *m* divine architect
शक्रपुरोगम *a* headed by Indra
सुमनस् *m* god
रोदसी *n* sky and earth
तुमुल *a* fierce
आयोधन *n* battle
ककुभ् *f* direction, quarter
व्यतिकर *m* occurance
जिष्णु *m* Indra
रणधुरा *f* brunt of the battle
वृत्रहन् *m* Indra, the destroyer of वृत्र

---

१६. मधुकराः

मधु स्वदन्तो मधुरं स्वनन्तः
सुमात् सुमं सप्रमदं भ्रमन्तः।
मधुव्रताः पुष्परजोविकीर्णाः
सौन्दर्यसारा इव भान्ति सृष्टेः॥ १

गुञ्जन्ति गायन्ति परिभ्रमन्ति
माद्यन्ति मज्जन्ति सुमोदरेषु।
लिहन्ति सौमं मधु विद्रवन्ति
मिलन्ति खेलन्ति च मत्तचित्ताः॥ २

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

उच्चावचं पुष्परसं निपीय
निधाय चेन मधुकोशपत्रे।
तन्वन्ति तावत् स्वयमात्मतृप्तिं
घिन्वन्ति पश्चाद्भुवनं च तेन॥ ३

बालाः षडङ्घ्रीननुकृत्य नित्यं
नानाविधात् पुस्तकपुष्पवृन्दात्।
सञ्चिन्वते ज्ञानरसं रसाग्र्यं
सम्मोदयन्ते च जगत् समग्रम्॥ ४

---

१) प्रश्नाः—१. मधुव्रताः क इव भान्ति? २. ते किं कुर्वन्ति? ३. मधुव्रताः स्वयं किं लभन्ते? ४. ते पश्चात् किं कुर्वन्ति? ५. बालाः षडङ्घ्रीननुकृत्य किं कुर्वन्ति?

२) शत्रन्तैः पदैः वाक्यानि पूरयत—

१. वसन्ते चूताङ्कुरान् (सु+अद्) पिकाः मधुरं गायन्ति।
२. रामकथानादं (श्रु) कः परां मुदं न याति।
३. मधुकराः पुष्पेभ्यो मधु (लिह्) ... मधुरं गुञ्जन्ति॥

३) प्रयोगं विपरिणमयत—

१. बालाः षडङ्घ्रीननुकुर्वन्ति, पुस्तकपुष्पात् रसं सञ्चिन्वन्ति च। २. मधुकराः पुष्पेभ्यो मकरन्दं लिहन्ति, परेषां तृप्तिं तन्वन्ति च।

४) उपसर्गयोगादर्थभेदः—

वि—चिनोति, चिनुते, निश्चिनोति, परिचिनोति, विचिनोति।
सञ्चिनोति—एवमात्मनेपदेऽपि द्रष्टव्यम्।
मद्—माद्यति। उन्माद्यति, प्रमाद्यति॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

५) कृत्प्रत्ययान्ताः—

लिह् to lick—(लेढि, लीढे)। लीढः, लीढवान्, लीढ्वन्, लिढानः, लिह्यमानः, लीढ्वा, (अवलिह्य) लेढुम्, लेढव्यम्, लेढनीयम्, लेह्यम्॥

६) गृह्णन्, चिन्वन्, तन्यन्, वृण्वन्, शृण्वन्, वृणन्,—

एषां शत्रन्तानां लटि प्रथमपुरुषैकवचने रूपाणि निर्दिशत॥

७) पर्यायाः—

मधु ३—मधु क्षौद्रं माक्षिकम्।

मधुकरः ९—मधुव्रतो मधुकरो मधुलिण्मधुपालिनः।
द्विरेफपुष्पलिङ्भृङ्ग षट्पदभ्रमरालयः॥

मकरन्दः ४—मकरन्दः पुष्परसः परागः सुमनोरजः॥

मधु *n*
मकरन्द *m* } Honey
सुम *a* a flower
मधुव्रत *m* bee
पुष्परजोविकीर्णः *a* besmeared with pollen
सौन्दर्यसार *m* essence of [beauty
गुञ्जन्ति *P.* hum
मज्जन्ति *P.* dive into
सुमोदर *n* the inner part of a flower
लिहन्ति *P* lick [flower
सौम *a* pertaining to a
विद्रवन्ति *P.* go away
मिलन्ति *P.* assemble together
उच्चावच *a* various
मधुकोश *m* bee hive
तावत् *in.* firstly, before doing anything else
धिन्वन्ति *P.* please
षडङ्घ्रि *m* bee
सञ्चिन्वते *A* gather
रसाढ्य *a* the best of रस
लघुडाहति *f* the stroke of a stick.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri



१७. नगरम्

किं नाम नगरम्? यत्र सहस्रशो जनानामधिवासः, नैकविधानां गृहाणां श्रेणयः, विविधा राजकीयाः कार्यालयाः विविधविद्याग्रहणोपयुक्ता विद्यालयाः, नानाविधैः क्रय्यैर्वस्तुभिरलंकृताः पण्यवीथिकाश्च विद्यन्ते तन्नगरम्। नैकविधा देवालयाः, पुष्पोद्यानानि, प्रमदवनानि, कूपाः, तटाकानि, अन्यान्यपि जनानामुपयुक्तानि तानि वस्तूनि, नगरेषु सुलभानि। यद्यपि ग्रामवासः सुखतरस्तथापि पत्तनेषु विद्याया व्यवसायस्य

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वाणिज्यस्य च सम्पत्तावस्ति सौकर्यातिशयः। प्रधानभूताः जीविकार्जनोपायाः सर्वे नगरेष्वेव सुलभाः। अतोऽद्यत्वे जनाः प्रायेण ग्रामान् परित्यज्य नगराण्यधिवसितुमिच्छन्ति॥

नगराणि नानाविधैः सुधालिप्तैर्भवनैरुपशोभन्ते। पञ्चषाभिर्भूमिकाभिरुपनिबद्धान्युन्नतानि भवनानि मुम्बा, दिल्ली वाराणसी, कालिघट्ट, मद्रपुरी प्रभृतिषु प्रधाननगरेषूपलभ्यन्ते। अमेरिकाखण्डे केषुचिन्नगरेषु विंशत्या त्रिंशता वा भूमिकाभिरलंकृतान्यभ्रंलिहानि रम्याणि हर्म्याणि सम्मुल्लसन्ति। भारतवर्षीयेषु नगरेष्वेतादृशानि वेश्मानि दुर्लभान्येव। तत्रापि ग्रामेषु प्रायेण कुटीरकल्पान्यल्पोच्छ्रायाण्येव गृहाणि निर्मीयन्ते॥

चित्रमवलोक्यताम्—नगरस्यैका रथ्या तत्र दृश्यते। रथ्यायाः पार्श्वे केचिद्गृहाः समालोक्यन्ते। यद्यपि ते नातीवोन्नतास्तथापि सुधाधवलाः पवनप्रवेशक्षमैर्वातायनैरुपेताः शुचयः सुन्दराश्च वर्तन्ते। एतादृशेषु गृहेषु वसन्तो जनाः पुरवासमुलभैरामयैर्न परिभूयेरन्। रथ्याया परिसरे केचिद्दीपस्थाणवो दृश्यन्ते, येषु निशामुखे दीपाः प्रज्वाल्यन्ते। तेन तत्र जनानां रात्रौ सञ्चारः सुकरो भवति। अद्यत्वे नगराणि प्रायेण विद्युत्प्रदीपैरुद्द्योतन्ते॥

नगरेषु गतागतार्थं जनैर्विविधानि वाहनान्युपयुज्यन्ते। वृषभशकटमश्वशकटं च सर्वसाधारणं वाहनम्। धनिनस्तु भूयस्तया पाश्चात्यदेशीयानि यानान्युपयुञ्जते। ग्रामेषु वसतां जनानामीदृशानि सौकर्याणि दुर्लभानि॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१) प्रश्नाः—१. ग्रामापेक्षया नगरेषु कीदृशाः सौकर्यातिशयाः? २. नगरेषु कीदृशानि गृहाणि विद्यन्ते? ३. चित्रे किमवलोक्यते? ४. कीदृशानि सौकर्याणि ग्रामेषु दुर्लभानि?

२) प्रयोगं विपरिणमयत—

१) अद्यत्वे जनाः नगराण्यधिवस्तुमिच्छन्ति।

२) चित्रेऽस्मिन् नगरस्यैका रथ्या दृश्यते।

३) रथ्यायाः पार्श्वे केचिद्गृहा अवलोक्यन्ते॥

३) वसति, अधिवसति—अनयोः प्रयोगे विशेषं दर्शयत॥

४) कृत्प्रत्ययान्ताः—

लिप् to overspread—(लिम्पति) = लिप्तः, लिप्तवान्, लिम्पन्, लिप्यमानः, लिप्त्वा, (विलिप्य) लेप्तुम्, लेप्तव्यम्, लेपनीयम्।

वस् to dwell—(वसति) = उषितः, उषितवान्, वसन्, उष्यमाणः, उषित्वा, (अध्युष्य) वस्तुम्, वस्तव्यम्, वसनीयम्॥

५) अतिशयनार्थकानि विशेषरूपाणि—

वृद्धः	ज्यायान्	ज्येष्ठः
	वर्षीयान्	वर्षिष्ठः
युवा	यवीयान्	यविष्ठः
	कनीयान्	कनिष्ठः
अल्पः	अल्पीयान्	अल्पिष्ठः
	कनीयान्	कनिष्ठः

६) विंशतिः, त्रिंशत्, चत्वारिंशत्, पञ्चाशत्, षष्टिः, सप्ततिः, अशीतिः, नवतिः, शतम्—एतैः वाक्यानि रचयत॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

७) पर्यायाः—

नगरम् ५—पूः (स्त्री) पुरीनगर्यौ वा पत्तनं पुटभेदनम्।
आपणः ४—आपणस्तु निषद्या चां विपणिः पण्यवीथिका॥
सुन्दरम् १२—सुन्दरं रुचिरं सुषमं साधु शोभनम्।
कान्तं मनोरमं रुच्यं मनोज्ञं मञ्जु मञ्जुलम्॥

क्रय्य *n* merchandise
पुष्पोद्यान *n* flower garden
प्रमदवन *n* pleasure garden
श्रेणयः Rows
व्यवसाय *m* industry
वाणिज्य *n* trade
सम्पत्ति *f* accomplishment
सौकर्य *n* convenience
जीविका *f* livelihood
अद्यत्वे *in.* now-a-days
सुधालिप्त *a* whitewashed
भूमिका *f* storey, stair
अभ्रंलिह *a* touching the sky
कुटीरकल्प *a* nearly equal to a hut
वातायन *n* window
आमय *m* disease
रथ्या *f* Road
निशामुख *n* beginning of night
विद्युत्प्रदीप *m* electric light
पाश्चात्यदेशीय *a* of western countries
यान *n* Vehicle.

---

१८. आहारः

अस्त्यस्माकमुदरे विलक्षणः कश्चिदग्निः योऽन्तः स्थितः शरीरमखिलमुष्णायति। तस्य चाग्नेरिन्धनमाहारो भवति। आहार एव रक्तमांसरूपेण परिणतो देहस्य बलं जनयति॥

सोऽयमाहारः सात्त्विकः, राजसः तामस इति त्रिविधः। सात्त्विको नाम रस्यः स्निग्धो मधुरः शुचिश्च। स चायुः सत्त्वं बलं बुद्धिं सुखमारोग्यं च पुष्णाति॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

राजसो नामातिकटुरत्यम्लोऽत्युष्णस्तीक्ष्णो रूक्षो विदाही च। स च शौर्यमहङ्कारं दाढर्यं कामं क्रोधं शोकं चोत्पादयति॥

तामसस्तु यातयामो गतरसः पूतिः पर्युषितो जुगुप्सितश्च। अयमेव राक्षसाहारो नाम। अयमाहारो मनुष्याणां मदं मात्सर्यमभिमानमहङ्कारं दम्भं च तनोति॥

यथा हि दुष्टो वायुः अशुद्धं जलं च नानाविधानामामयानां प्रभवो भवति तथैव कुत्सित आहारोऽपि। तस्मात् सात्त्विक एवाहारः प्रशस्ततमः। सैनिकास्तु राजसमप्याहारं गृह्णन्तो न दुष्यन्ति। तामस आहारस्तु सर्वथैव त्याज्यः॥

भारतीया वयं शाल्यन्नमश्नीमः। यौरोपास्तु गोधूमं बाहुल्येनोपयुञ्जते। शाल्यन्नापेक्षया मुद्गो माष आढको गोधूमश्च बलकारी भवति। ऋषयः कन्दैर्मूलैः फलैः पर्णैरद्भिश्च जीवन्ति॥

अत्यधिकमत्यल्पं च न भोक्तव्यम्। अत्यल्पभोजनमग्निं ज्वलयितुं न पर्याप्नोति। अत्यधिकं भोजनमजीर्यत् अग्निं मन्दी करोति। तस्मान्मितमेव भोजनं हितकारि भवति। यावता भुक्तेन क्षुन्निवृत्तिर्जायेत तावदेव भोक्तव्यम्। तदेव मितभोजनं नाम। केचित्त्वपेक्षितादधिकं भुञ्जते। बुद्धिमन्तस्तु न भोजनार्थं जीवन्ति, किन्तु जीवनार्थं भुञ्जते॥

---

१) प्रश्नाः—१. त्रिविधा आहाराः के? २. तेषां गुणाः कीदृशाः? ३. कुतः सात्त्विक एवाहारः प्रशस्ततमः? ४. शाल्यन्नापेक्षया के बलकारिणः? ५. कस्मादत्यधिकमत्यल्पं च न भोक्तव्यम्?

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२) प्रयोगं विपरिणमयत—

१) स आयुः सत्वं बलं वृद्धिं सुखमारोग्यं च पुष्णाति।
२) अयं मनुष्याणां मदं मात्सर्यमभिमानमहङ्कारं च तनोति॥
३) केचिदपेक्षितादधिकं भुञ्जते॥

३) अतिशायनार्थकैः पदैः वाक्यानि पूरयत—

१) राजसादाहारात् सात्विक आहारः (प्रशस्तः)।
२) गुडापेक्षया शर्करा (मधुर)।
३) पक्षिणां मध्ये हंसः (चारु)॥

४) यन्, यान्, घ्नन्, बध्नन्, लिम्पन्—एषां शत्रन्तानां लटि प्रथमपुरुषैकवचने रूपाणि निर्दिशत॥

५) कृत्प्रत्ययान्ताः—

भुज् to enjoy—(भुङ्क्ते) = भुक्तः, भुक्तवान्, भुञ्जानः भुज्यमानः, भुक्त्वा, (उपभुज्य), भोक्तुम्, भोक्तव्यः, भोजनीयः, भोज्यः।

युज् to unite—(युङ्क्ते) = युक्तः, युक्तवान्, युञ्जानः युज्यमानः, युक्त्वा. (प्रयुज्य) योक्तुम्, योक्तव्यम्, योजनीयम्, योज्यम्।

त्यज् to abandon-(त्यजति)=त्यक्तः, त्यक्तवान्, त्यजन्, त्यज्यमानः, त्यक्त्वा, (परित्यज्य) त्यक्तुम्, त्यक्तव्यः त्यजनीयः, त्याज्यः।

भुज् to worship—(भजति)=भक्तः, भक्तवान्, भजन्, भज्यमानः, भुक्त्वा, (विभज्य), भुक्तुम्, भक्तव्यम्, भजनीयम्॥

६) पर्यायाः—

आहारः ३—भोजनं जग्धिराहारः।
कबलः १—ग्रासस्तु कबलः पुमान्॥
उदरम् ५—पिचण्डः कुक्षिरुदरं तुन्दं च जठरोऽस्त्रियाम्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विलक्षण *a* strange, extra-ordinary
इन्धन *n* fuel
रस्य *a* juicy, sapid
स्निग्ध *a* oily
अतिकटु *a* very pungent or acrid
अत्यम्ल *a* very sour
तीक्ष्ण *a* hot
रूक्ष *a* astringent
विद् हिन् *m* causing inflammation
यातयाम *a* stale, used
पूति *a* foul smelling
पर्युषित *a* not fresh
जुगुप्सित *a* detested
प्रभव *m* source
शाल्यन्न *n* rice
गोधूम *m* wheat
मुद्ग *m* green-gram
माष *m* pulse ; black-gram
आढक *m* dhal
कन्द *n* bulbous root
क्षुध् *f* hunger

---

१९ समुद्रः प्रवहणं च

समुद्रो नामातिविस्तीर्णोऽदृश्यमानपारः सुतरां अगाधोऽम्भसां राशिः। स च क्वचित् क्रोशत्रयमगाधो वर्तते। समुद्रेषु वात्योत्पादितास्तरङ्गाः सततमुद्द्रवन्ति। अतस्ते दुरवगाहाः॥

समुद्रेषु नैकविधानि यादांसि प्रतिवसन्ति। भूमौ निवसतां प्राणिनां मध्ये गजा एव गरिष्ठा बलिष्ठाश्च। अब्धौ तु ततोऽपि महीयांसौ बलीयांसश्च तिमिङ्गिलाख्या जलचराः सन्ति। ते तदा तदा जलस्योपरि प्लवमानाः सांयात्रिकानां द्वीपभ्रममुत्पादयन्ति। शश्वच्च वालप्रहारेण ते महानौका अपि मज्जयन्ति॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नानाविधा महान्तो मत्स्याः सागरे विद्यन्ते। धीवराः प्लवैः सागरं प्रविश्य जालैस्तान् बध्नन्ति। मूल्यवन्ति रत्नानि प्रवालानि मुक्ताफलानि च समुद्रेषु जायन्ते। अत एव तेषां रत्नाकरव्यपदेशः॥



वयं नदीर्नौकाभिस्तरामः। पारावारास्तु कल्लोलैराकुला नौभिस्तरीतुं न शक्याः। अतस्तत्र प्रवहणैः सञ्चरन्ते जनाः। प्रवहणेषु कानिचिद्वायुना नीयमानानि, कानिचिद्वाष्पशक्त्या चाल्यमानानि च। यथैव स्थले वाष्पशकटानि तथैव जले वाष्पप्रवहणान्युपयुज्यन्ते॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वायुना प्रेर्यमाणं प्रवहणं कदाचिद्वात्याभिहतं निमज्जेदपि। वाष्पप्रवहणेषु सञ्चरतां जनानां नैतादृशं महद्भयं विद्यते। वाष्पप्रवहणानि स्तम्भदीपैः निर्दिश्यमानमार्गाण्येकया होरया विंशत्यधिकान् क्रोशान् प्रयान्ति। अतो वाष्पप्रवहणेषु प्रयान्तो जनाः सुदूराण्यपि द्वीपान्तराणि कतिपयैरेव दिवसैः प्राप्तुं शक्नुवन्ति॥

---

१) प्रश्नाः—१. को नाम समुद्रः? कुतः समुद्राः दुरवगाहाः?
२. समुद्रेषु कीदृशानि यादांसि प्रतिवसन्ति? ३. कुतस्तेषां रत्नाकरव्यपदेशः? ४. तत्र कैः सञ्चरन्ते जनाः?
५. द्वीपान्तराणि अतिशीघ्रं प्राप्तुं कथं शक्नुवन्ति जनाः?
६. केषु सञ्चरतां जनानां भयं जायते? केषु न?

२) निर्दिष्टानां क्रियापदानां णिजन्तरूपैः वाक्यानि पूरयत—
१. वात्या समुद्रेषु पर्वतोन्नतांस्तरङ्गान् ... (उत्पद्यते)।
२. तिमिङ्गिलाः समुद्रेषु सञ्चरतां भयं ... (जायते)।
३. प्रवहणानि जनान् खण्डान्तराणि ... (प्राप्नोति)॥

३) अतिशयनार्थकैः पदैः वाक्यानि पूरयत—
१. जलाशयेषु समुद्रः ... (पृथु)।
२. तिमिङ्गिलेभ्यस्तिमिङ्गिलगिलाः ... (बलवत्)।
३. पर्वतेषु हिमालयः ...(स्थूल)॥

४) समानार्थकाः—सुतराम्, नितराम्, अतितराम्॥

५) उपसर्गयोगादर्थभेदः—
मज्ज्—मज्जति। उन्मज्जति, निमज्जति।
तॄ—तरति। अवतरति, वितरति, उत्तरति, निस्तरति॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

६) कृत्प्रत्ययान्ताः—

तॄ to cross-(तरति)=तीर्णः, तीर्णवान्, तरन्, तीर्यमाणः, तीर्त्वा, (अवतीर्य), तर्तुम्, तरितुम्, तरीतुम्, तर्तव्यम्, तरितव्यम्, तरीतव्यम्, तरणीयम्, तार्यम्।

कॄ to scatter—(किरति)=कीर्णः, कीर्णवान्, किरन्, कीर्यमाणः, कीर्त्वा (विकीर्य), कर्तुम्, करितुम्, करीतुम्, कर्तव्यम्, करितव्यम्, करीतव्यम्, करणीयम्, कार्यम्॥

७) पर्यायाः—

समुद्रः १५—समुद्रोऽब्धिरकूपारः पारावारः सरित्पतिः।
उदन्वानुदधिः सिन्धुः सरस्वान् सागरोऽर्णवः॥
रत्नाकरो जलनिधिः यादः पतिरपां पतिः॥

नदी १२—नदी सरित्।
तरङ्गिणी शैवलिनी तटिनी ह्रादिनी धुनी।
स्रोतस्वती द्वीपवती स्रवन्ती निम्नगापगा॥

क्रोश *m* two miles
वात्या *f* strong wind
तरङ्ग *m* Wave
यादस् *n* Water-animal
अब्धि / पारावार } *m* Ocean
तिमिङ्गिल *m* a kind of fish which swallows a तिमि
सांयात्रिक *m* merchant trading by sea
शश्वत् *in* often [tail
बालप्रहार *f* stroke of
महानौका *f* a big ship
धीवर *m* fisherman
प्लव *m* raft
प्रवाल *m* विद्रुम coral
मुक्ताफल *n* मौक्तिकं pearl
कल्लोल *m* high wave
प्रवहण *n* vessel
स्तम्भदीप *m* Light-house
होरा *f* an hour.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri



२० शकटम्

अत्रैकं शकटं व्रजति। इदं वृषभशकटम्। यदश्वैरुह्यते तदश्वशकटम्। यद्वाष्पशक्त्या गच्छति तद्वाष्पशकटम्। तस्यैव धूमशकटमिति नामान्तरम्। केचिद्देशेषु श्वानोऽपि शकटानि वहन्ति। क्वचिन्महिषा अपि शकटेषु बध्यन्ते॥

शकटेऽस्मिन् द्वौ वृषभौ नियुक्तौ। केचिच्छकटेष्वेकोऽपि वृषभो नियुज्यते। पश्य, शकटस्य द्वे चक्रे स्तः। चक्रं परितः स्थितो भागः नेमिरित्युच्यते। चक्रयोर्मध्ये मण्डलाकारेण दृश्यमानो भागश्चक्रनाभिः। नेमेश्चक्रनाभेश्चान्तराले द्वादशारः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रोताः सन्ति। प्रायेण चक्राणि द्वादशाराणि क्रियन्ते। चक्रद्वयस्य नाभिरन्ध्रयोस्तिर्यगक्षदण्डः सङ्घटितः। तस्मिन्नक्षदण्डे शकटस्य भारस्तिष्ठति॥

वृष्टेरातपस्य च वारणाय शकटं कटमयेन पटलेनाच्छाद्यते। तेन शकटं जनानां सञ्चाराय योग्यं भवति। बहवो जनाः शकटैर्गतागतं कुर्वन्ति। भारवन्ति भाण्डान्यपि शकटमारोप्य देशाद्देशं नयन्ति। अद्यत्वे तु भूयस्तया बाष्पयानैरेव गतागतं कुर्वन्ति जनाः॥

चित्रमवलोक्यताम्! तत्र शकटस्य पुरोभागे स्थितो बालः शाकटिकः। स रथ्यायां शकटं नयति। यदा स शकटं शीघ्रं नेतुमिच्छति तदा कशया वृषौ ताडयति। तदा तौ द्रुतं गच्छतः। यदा शकटं स्थापयितुमिच्छति तदा स नासारज्ज्वा वृषौ पश्चादाकर्षति। तदा तौ तिष्ठतः॥

अयं शाकटिकः पूर्वमतीव दरिद्र आसीत्। तदा स कस्यचिद्धनिनो गृहे कर्म कुर्वन् प्रत्यहं केवलमाणकचतुष्कं वेतनमलभत। अथापि स बुद्धिमान्; यतः स लब्धस्यार्धं स्वजीविकायै व्ययीकुर्वन्नपरमर्धं रक्षति स्म। तथा रक्षितं च तद्धनं बर्षद्वयेन रूप्यकशतम् अभवत्। पश्चादसौ बालस्तेन धनेनेदं शकटमिमौ वृषभौ चाक्रीणात्। सम्प्रत्ययं प्रतिदिनं द्वित्राणि रूप्यकाण्यर्जयन् सुखेन जीविकां निर्वर्तयति॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१) प्रश्नाः—१. के शकटानि वहन्ति ? २. शकटस्यावयवाः के ? ३. शकटस्य प्रयोजनं किम् ? ४. शकटस्य पुरोभागे स्थितः कः ? ५. स कथं शकटं नयति ? ६. कथं स्थापयति ? ७. इमं शाकटिकमधिकृत्य किं जानीध्वे ?

२) प्रयोगं विपरिणमयत—

१. यदश्वैरुह्यते तदश्वशकटम् ।

२. क्वचिन्महिषा अपि शकटेषु बध्यन्ते ।

३. असौ बाल इदं शकटमिमौ वृषभौ चाक्रीणात् ॥

३) शानजन्तैः पदैः वाक्यानि पूरयत—

१. बुधीचः आत्मनः शरीरं बहुमन् ... प्राणान् बिभ्रहो ।

२. आरुणिः क्लिश ... कश्चिदुपायमरीरयत् ।

३. पिकः सहकारस्य शाखायां आस् ... मधुरं कूजति ।

४. गुरोराज्ञां कृ ... शिष्याः श्रेयांसि विन्दन्ते ॥

४) कृत्प्रत्ययान्ताः—

नी to carry—(नयति, नयते)=नीतः, नीतवान्, नयन्, नीयमानः, नीत्वा, (अनुनीय), नेतुम्, नेतव्यम्, नयनीयम्, नेयम् ।

लभ् to get (लभते)=लब्धः, लब्धवान्, लभमानः, लभ्यमानः, लब्ध्वा, (उपलभ्य), लब्धुम्, लब्धव्यम्, लभनीयम्, लभ्यम् ॥

४) उपसर्गयोगादर्थभेदः—

बन्ध्—बध्नाति । अनुबध्नाति, उद्बध्नाति, निर्बध्नाति, प्रतिबध्नाति, सम्बध्नाति, आबध्नाति ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

६) पर्यायाः—

यानम् ५—सर्वं स्याद्वाहनं यानं युग्मं रत्रं च शोरणम् ।
सर्वतः ४—समन्ततस्तु परितः सर्वतो विष्वगित्यपि ॥

बाष्प *m. n* vapour, steam	तिर्यक् *in.* horizontal
नेमि *n* the circumference of a wheel	अक्षदण्ड *m* axle
अर *m* spoke	कट *m* mat
प्रोत *a* fastened	पटल *n* roof
	वेतन *n* wage,

---

२१ दैवं पुरुषकारश्च

दैवं फलति सर्वत्र न विद्या न च पौरुषम् ।
पाषाणस्य कुतो विद्या येन देवत्वमागतम् ॥ १

तथापि तावत्—

न दैवमिति सञ्चिन्त्य त्यजेदुद्योगमात्मनः ।
अनुद्योगेन कस्तैलं तिलेभ्यः प्राप्तुमर्हति ॥ २
यथा ह्येकेन चक्रेन न रथस्य गतिर्भवेत् ।
तथा पुरुषकारेण विना दैवं न सिध्यति ॥ ३
उद्यमेनैव सिध्यन्ति कार्याणि न मनोरथैः ।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखं मृगाः ॥ ४
विहाय पौरुषं यो हि दैवमेवावलम्बते ।
प्रासादसिंहवत् तस्य मूर्ध्नि तिष्ठन्ति वायसाः ॥ ५

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नात्युच्चशिखरो मेरुर्नातिनीचं रसातलम् ।
व्यवसायद्वितीयानां नाप्यपारो महोदधिः ॥ ६

उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी
दैवेन देयमिति कापुरुषा वदन्ति ।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिध्यति कोऽत्र दोषः ॥ ७

---

१) प्रश्नाः—१. दैवस्य प्रबलतां पुरुषकारस्य कर्तव्यतां च सोदाहरणं समर्थयत ? २. व्यवसायाः कस्य मूर्ध्नि तिष्ठेयुः ? ३. दोषः कदा न भवेत् ?

२) प्रयोगं विपरिणमयत—

१. मृगाः क्षुद्रस्य सिंहस्य मुखं न हि प्रविशन्ति ।
२. लक्ष्मीरुद्योगिनं पुरुषसिंहमुपैति ।
३. कापुरुषाः दैवेन देयमिति वदन्ति ॥

३) अतिशयनार्थकैः पदैः वाक्यानि पूरयत—

१. दैवं पुरुषकारात् (बलवत्) ।
२. मतिः बलात् (गुरु) ।
३. दशरथस्य पत्नीनां कौसल्या (वृद्धा) ॥

४) कृत्प्रत्ययान्ताः—

आप् to obtain—(आप्नोति) = आप्तः, आप्तवान्, आप्नुवन्, आप्यमानः, आप्त्वा, (अवाप्य), आप्तुम्, आप्तव्यम्, आपनीयम्, आप्यम् ।

स्वप् to sleep—(स्वपिति) = सुप्तः, सुप्तवान्, स्वपन्, सुप्त्वा, (सुषुप्य) स्वपितुम्, स्वप्तव्यम्, स्वपनीयम् स्वाप्यम् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

५) उपसर्गयोगादर्थभेदः—

लम्ब्—लम्बते। अवलम्बते, आलम्बते॥

६) सञ्चिन्त्य, सञ्चित्य—अनयोरर्थभेदं निर्दिशत॥

७) पर्यायाः—

भाग्यम् ६—दैवं दिष्टं भागधेयं भाग्यम् स्त्री नियतिर्विधिः।

मेरुः ५—मेरुः सुमेरुर्हेमाद्री रत्नसानुः सुरालयः।

रसातलम् ४—अधोभुवन पाताल वलिसद्म रसातलम्॥

पौरुष *n* manliness	प्रासादसिंह *m* a palatial artificial lion
पाषाण *m* stone	रसातल *n* nether world
उद्योग *m* effort	अपार *a* endless
पुरुषकार *m* manliness	कापुरुष *m* a wicked man
मनोरथ *m* ambition	

२२. त्रिशङ्कुमहाराजः

आसीत् पूर्वं सूर्यवंशे त्रिशङ्कुर्नाम महाराजः, यः स्वबाहुबलेन सर्वान् शत्रूनुन्मूल्य सागरपर्यन्तां पृथिवीं शशास। धर्मेण धरां परिपालयतः सर्वत्र विजयिनस्तस्य मनसि 'अनेन मर्त्यदेहेनैव स्वर्गारोहणं कार्यम्, इति मनोरथः समजनि। ततः स तदर्थकं यज्ञं कर्तुमुद्युक्तः कुलगुरुं तपोनिधिं वसिष्ठमुपेत्य पौरोहित्याय वव्रे। वसिष्ठस्तु तस्य मनोरथमपथे प्रवृत्तं बुद्ध्वा तदर्थनां प्रत्याचष्ट॥

तत्प्रत्याख्यानेन विद्वद्हृदयो राजा वसिष्ठस्य शतं पुत्रानुपेत्य सप्रश्रयमेकैकशस्तदेवार्थं ययाचे। तेऽपि तद्वचनं नाभ्य-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नन्दन्। तदा रोषाविष्टो राजा परुषवचनैस्तान् भृशमनिन्दत्। तदाकर्ण्य ते क्रुद्धास्तं 'चण्डालो भव' इत्यशपन्॥



ततश्चण्डालतां गतोऽपि त्रिशङ्कुः कथञ्चिदात्मनो मनोरथं साधयितुमिच्छन् वसिष्ठस्पर्धिनं महातपस्विनं विश्वामित्रं शरणमगच्छत्। विश्वामित्रस्तं वृत्तान्तमाकर्ण्य चण्डालस्यापि तस्य यज्ञं कर्तुं मतिं व्यधात्। अवदच्च—'राजन्! मा भैषीः। अहं त्वां याजयामि। स्वर्गं तव हस्तगतं जानीहि'—इति॥

ततः स यज्ञं निश्चित्य ब्राह्मणानामन्त्रयितुं सर्वतः शिष्यान् प्राहिणोत्। अकरोच्च यज्ञाय महान्तं सम्भारम्। कल्पे

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

च दिवसे ब्राह्मणैः सह विश्वामित्रः सुदुष्करं सप्ततन्तु समारभत। देवास्तु खाहाकारैराहूयमाना अपि न समागताः ॥

तदनु विश्वामित्रः क्रुद्धो यज्ञं परित्यज्य चिरतप्तस्यात्मनस्तपसो बलेन त्रिशङ्कुं स्वर्गमारोपयामास। इन्द्रादयो दिवौकसः सदेहं चण्डालं स्वर्गमारोहन्तं वीक्ष्य झटित्यधः पातयामासुः। ततस्त्रिशङ्कुः 'त्रायस्व माम्, त्रायस्व माम्' इत्याक्रोशन्नपतत्। अधः पतंश्च सः 'त्रिशङ्को तिष्ठ! तिष्ठ!!' इत्युक्तवता कोपाक्रान्तेन कौशिकेन भूम्याकाशयोर्मध्ये स्थापितः ॥

कर्तव्यमेव कर्तव्यं कर्तव्यं लोकसम्मतम्।
अकर्तव्यं तु कुर्वाणैस्त्रिशङ्कुः स्मर्यतां जनैः ॥

---

१) प्रश्नाः—१. त्रिशङ्कुः कीदृशो राजा? २. तस्य मनसि कीदृशो मनोरथः समजनि? ३. ततः स किमकरोत्? ४. कः कुतस्तस्य प्रार्थनां प्रत्याचष्ट? ५. के कुतस्तं चण्डालो भव इत्यशपत्? ६. ततः राजा किमकरोत्? ७. स किमुक्त्वा किमकरोत्? ८. के यज्ञं प्रति न समागताः? ९. तदनु विश्वामित्रः किं चकार? १०. ततः किं वृत्तम्? ११. त्रिशङ्कोः कथा किं युष्माभिर्गृह्यते?

२) अधः निर्दिष्टानां धातूनां णिजन्तरूपैः वाक्यानि पूरयत—

१. विश्वामित्रस्त्रिशङ्कुमहाराजं (यजति—लङ्)।
२. स महर्षिरात्मनस्तपोबलेन तं स्वर्गं (आरोहति—लङ्)।
३. महान्तं आरब्धं कार्यम् अन्तं (गच्छति—लङ्)।
४. चण्डालं स्वर्गमारोहन्तं देवा झटित्यधः (पतति—लङ्)।
५. विश्वामित्रः भूम्याकाशयोर्मध्ये (तिष्ठति—लङ्)॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३) कृत्प्रत्ययान्ताः—

व्यध् (to pierce)—विध्यति = विद्धः, विद्धवान्, विध्यन्, विध्यमानः, विध्वा, (प्रविध्य) वेद्धुम्, वेद्धव्यम्, वेधनीयम्, वेध्यम् ॥

क्रुध् (to be angry)—क्रुध्यति=क्रुद्धः, क्रुद्धवान्, क्रुध्यन्, क्रुध्वा, (संक्रुध्य), क्रोद्धुम्, क्रोद्धव्यम्, क्रोधनीयम्, क्रोध्यम् ॥

४) उपसर्गयोगादर्थभेदः—

ख्या—चष्टे। आचष्टे, प्रत्याचष्टे, व्याचष्टे।
स्मृ—स्मरति। विस्मरति, संस्मरति ॥

५) पर्यायाः—

आकाशः १६—द्यौर्दिवौ द्वे स्त्रियामभ्रं व्योम पुष्करमम्बरम्
नभोऽन्तरिक्षं गगनम् अनन्तं सुरवर्त्म खम्
वियद्विष्णुपदं वा तु पुंस्याकाशविहायसी

यजमानः २—यष्टा च यजमानश्च ॥

पुरोहितः ३—पुरोधास्तु पुरोहितः ॥

यज्ञः ७—यज्ञः सवोऽध्वरो यागः सप्ततन्तुर्मखः क्रतुः।

उन्मूल्य *in.* having uprooted	कल्प्त *a* appointed, proper
धरा *f* the earth	सप्ततन्तु *m* sacrifice
सप्रश्रयम् *in* respectfully	स्वाहाकार utterence of the exclamation स्वाहा
प्राहिणोत् *P.* sent	दिवौकस् *m* inhabitant of heaven
सम्भार *m* preparation	

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri



२३. सहपाठिनां संभाषणम्

कस्मिंश्चिदग्रहारे रामो भीमः श्यामश्चेति त्रयः सहपाठिनोऽवर्तन्त। तेषां रामः सुबुद्धिः, भीमो मन्दबुद्धिः, श्यामो दुष्टबुद्धिश्चासीत्। रामः स्वीयं दैनन्दिनं पाठं काले पठन्नुद्यमशाली बभूव। भीमः पठितुकामोऽप्यप्रगल्भ आसीत्। श्यामस्तु न जातु पठति; किन्तु सहाध्यायिन उपाध्यायं च निन्दन् कालं नयति। एकदा श्यामो भीमस्य गृहमगच्छत्। तत्र तयोरयं सँल्लापः प्रवृत्तः—

श्यामः—सखे भीम! अस्माकमुपाध्यायः दुष्टः। सः रामे नितरां स्निह्यति। आवां च तीव्रं दण्डयति। तत्रापि मां पदे पदे ताडयति। अतीव शोचनीयमिदम्॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

भीमः—सखे! न युक्तमुक्तं त्वया। रामः सम्यक् पाठान् पठति। उपाध्यायस्य प्रश्नानां युक्ततराण्युत्तराणि च वदति। सुलभ उपाध्यायानामुद्यमशीलेषु च्छात्रेषु पक्षपातः॥

श्यामः—किमावां न छात्रौ?

भीमः—सखे! आवामपि च्छात्रावेव। किन्तु न पाठान् पठावः। नाप्युपाध्यायस्य प्रश्नानामुत्तराणि दद्वः॥

श्यामः—उपाध्याय आवां न सम्यक् पाठयति॥

भीमः—सखे! तदप्यसङ्गतम्। एकदैवोपाध्यायो राममावां च पाठयति, न तु रामं पृथक्तया। तस्मात् त्वदुक्तमयुक्तमेव। मन्ये, पठने समादरणीयः साधीयान् कोऽप्युपायः स्यात्, येन रामः सम्यक् पठति॥

श्यामः—भद्र! मन्ये, स कामपि यक्षिणीमाराधयति, यस्याः प्रसादेन स सम्यगधीते॥

भीमः—गच्छावस्तस्यैवान्तिकम्। तमेव पृच्छावः॥

(अथ भीमः श्यामश्च, रामस्य गृहं गच्छतः)

भीमः—सखे राम! त्वया प्रत्यहं पाठाः सम्यक् पठ्यन्ते। उपाध्यायस्य प्रश्नानां सम्यगुत्तराणि च दीयन्ते। तत् कथम्? अप्यस्ति कश्चिदुपायः पठने समादरणीयः?

रामः—सौम्य! नात्र विशेषतः कश्चिदुपायोऽस्ति। अहं तावत् सर्वदोपाध्यायस्य वचनं श्रद्धया शृणोमि। श्रुतं च गृहं गत्वा रात्रौ चिन्तयामि। चिन्तितं च प्रातरुत्थायाव-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

धारयामि। यदि तत्र सन्देह उत्पद्यते तर्हि सहाध्यायिनः उपाध्यायं वा पृष्ट्वा तं विषयमवगच्छामि। तेनाहमुपाध्यायस्य प्रश्नानामुत्तराणि दातुं शक्नोमि। यद्येवं कुर्युस्तर्हि सर्वेऽपि च्छात्राः शक्ता भवेयुः। उद्यम एव विद्यार्थिनां परमो बन्धुः॥

भीमस्तन्निशम्य तदाप्रभृति तथैवाकरोत्। कतिपयैरेव दिवसैः सोऽपि राम इव बुद्धिमान् बालको बभूव। श्यामस्तु न केवलं दुष्टबुद्धिः, किन्त्वलसश्चासीत्। नासौ कदाऽप्युपाध्यायस्य वचनानि श्रद्धत्ते, न च गृहे जातु पुस्तकमप्युद्घाटयति। स च परेषां प्रतारणेऽत्यन्तं निपुणः॥

एकस्मिन् दिवसे ते त्रयोऽपि वयस्याः क्वापि रथ्यायाः परिसरे क्रीडन्तो बभूवुः। तदा श्यामो राममतिसन्धातुमिच्छन् ब्रवीति—

श्यामः—सखे राम! त्वं कर्मशूर इत्युपाध्यायो वदति। अस्तु तावत्। अपि त्वं मया चक्षुषी निमील्य क्रियमाणं किमपि कर्म चक्षुषी उन्मील्य करिष्यसि? किं ब्रवीषि?

रामः—(सामोदम्) सखे! कः सन्देहः? करिष्यामि॥

श्यामः—सत्यमेव?

रामः—सत्यमेव॥

श्यामः—सखे भीम! त्वं साक्षी॥

भीमः—आम्, अहमस्मि साक्षी॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ततः श्यामो रथ्याया रजः पुञ्जमादाय स्वचक्षुषी नीमील्य तदुपरि प्राक्षिपत्। अब्रवीच्च रामम्—'सखे! यन्मया चक्षुषी निमील्य कृतं तत् त्वया चक्षुषी उन्मील्य क्रियताम्' —इति। रामस्तद्दृष्ट्वा गृहं प्रति पलायत॥

॥ त्यज दुर्जनसंसर्गं भज साधुसमागमम्॥

---

१) प्रश्नाः—१. रामो भीमः श्यामश्च कीदृशा बभूवुः? २. कुत उपाध्यायो रामेऽस्निह्यत्? ३ कोऽसावुपायो रामेण पठने समाहृतः? ४. भीमः कथम् उत्तरदाने शक्तः अभवत्? ५. श्यामो रामं वञ्चयितुमिच्छन् किमकरोत्? ६. अनेन किं पठ्यते युष्माभिः?

२) प्रयोगं विपरिणमयत—

१. स रक्षिण्याः प्रसादेन सम्यगधीते।
२. न स उपाध्यायस्य वचनानि श्रद्धते॥

३) निर्दिष्टैर्लकारैः वाक्यानि पूरयत—

१. उद्यमिनश्छात्रा उपाध्यायस्य प्रश्नानामुत्तराणि दा...लट्
२. न वयमुन्मत्तानां वचनानि श्रत्+धा ... लट्।
३. भृत्यः सायं विद्यालयस्य द्वाराणि पिधा ... लट्॥

४) उपसर्गयोगादर्थभेदः—

दा—ददाति, दत्ते। आदत्ते, उपादत्ते एवं आददाति इत्यादि।
धा—दधाति, धत्ते। अतिसन्धत्ते, अपिधत्ते (पिधत्ते) अभिधत्ते, अवधत्ते, विधत्ते, निधत्ते, परिधत्ते, सन्धत्ते। एवम् 'अपिदधति' इत्यादि॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

५) कृत्प्रत्ययान्ताः—

दा to give—(ददाति, दत्ते) = दत्तः, दत्तवान्, ददत्, ददानः दीयमानः, दत्वा, (आदाय), दातुम्, दातव्यम् दानीयम्, देयम्।

धा (to bear)—दधाति, धत्ते = हितः, हितवान्, दधत्, धीयमानः, हित्वा, (निधाय) धातुम्, धातव्यम्, धानीयम्, धेयम्॥

६) अतिशायनाथकानि विशेषरूपाणि—

बाढः	साधीयान्	साधिष्ठः
प्रशस्यः	श्रेयान्	श्रेष्ठः
उरुः	वरीयान्	वरिष्ठः
मृदुः	म्रदीयान्	म्रदिष्ठः

७) पर्यायाः—

प्रभातम् ६-प्रत्यूषोऽहर्मुखं कल्यमुषःप्रत्युषसी अपि प्रभातं च।
दिनान्तः ४-दिनान्ते सायं सन्ध्या दिनक्षयः।
सखा ६-स्निग्धो वयस्यः सवया अथ मित्रं सखा सुहृत्॥

पृथक्ता *f* separateness
यक्षिणी *f* female यक्ष or fairy
न जातु *in* never
प्रतारण *n* deceit
वयस्य *m* friend
परिसर *m* vicinity
अतिसन्धातुम् *in.* to deceive
निमील्य *in* having shut
उन्मील्य *in* having opened
रजःपुञ्ज *m* heap of dust.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२४. गृध्रो मार्जारश्च

अज्ञातकुलशीलस्य वासो देयो न कस्यचित् ।
मार्जारस्य हि दोषेण हतो गृध्रो जरद्गवः ॥

तद्यथा—अस्ति भागीरथीतीरे गृध्रकूटनाम्नि पर्वते महान् पर्कटीवृक्षः । तस्य कोटरे जराजीर्णो गलितनखनयनो जरद्गवनामा गृध्रः प्रतिवसति । अथ कृपया तज्जीवनाय तद्वृक्षवासिनः पक्षिणः स्वाहारात् किञ्चित्किञ्चिदुद्धृत्य तस्मै ददति । तेनासौ जीवति । शावकानां च रक्षणं करोति ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अथ कदाचिद्दीर्घकर्णनामा मार्जारः पक्षिशावकान् भक्षयितुं तत्रागतः। तमायान्तं दृष्ट्वा पक्षिशावकैर्भयार्तैः कोलाहलः कृतः। तच्छ्रुत्वा जरद्गवेनोक्तम्—कोऽयमायाति? दीर्घकर्णो गृध्रमवलोक्य स्वयं सभयमाह—'हा हतोऽस्मि! अधुनाऽस्य सन्निधाने पलायितुमक्षमः। तद्यथा भवितव्यं तथा भवतु। तावद्विश्वासमुत्पाद्यास्य समीपमुपगच्छामि'॥

एवमालोच्योपसृत्याब्रवीत्—आर्य! त्वामभिवन्दे। गृध्रोऽवदत्—कस्त्वम्? सोऽवदत्—मार्जारोऽहम्। गृध्रो ब्रूते—दूरमपसर, नो चेद्धतो भवेस्त्वम्। मार्जारोऽवदत्—श्रूयतां तावदस्मद्वचनम्। ततो यद्यहं वध्यस्तदा हन्तव्यः। गृध्रो ब्रूते—ब्रूहि, किमर्थमागतोऽसि? सोऽवदत्—अहमत्र गङ्गातीरे नित्यस्नायी ब्रह्मचारी चान्द्रायणव्रतमाचरंस्तिष्ठामि। यूय धर्मज्ञानरता इति विश्वासभूमयः पक्षिणः सर्वे सर्वदा ममाग्रे प्रस्तुवन्ति। अतो भवद्भ्यो विद्यावयोवृद्धेभ्यो धर्मं श्रोतुमिहागतः। भवन्तश्चैतादृशा धर्मज्ञाः यन्मामतिथिं हन्तुमुद्यताः। मयाऽपि धर्मशास्त्राण्यधीतानि। गृहस्थधर्मश्चैषः—यदि वा धनं नास्ति तदा प्रीतिवचसाऽप्यतिथिः पूज्य एव॥

गृध्रोऽवदत्—मार्जारो हि मांसरुचिः। पक्षिशावकाश्चात्र निवसन्ति। तेनाहमेवं ब्रवीमि। तच्छ्रुत्वा मार्जारो भूमिं स्पृष्ट्वा कर्णौ स्पृशति। ब्रूते च—मया धर्मशास्त्राणि श्रुत्वा चीतरागेणेदं दुष्करं व्रतं चान्द्रायणमध्यवसितम्। परस्परं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विवदमानानामपि धर्मशास्त्राणाम् 'अहिंसा परमो धर्मः' इत्यत्रैकमत्यम्। एवं विश्वासमुत्पाद्य मार्जारस्तत्कोटरे न्यवसत्॥

ततो दिनेषु गच्छत्सु पक्षिशावकानाक्रम्य कोटरमानीय प्रत्यहं खादति। येषामपत्यानि खादितानि तैः शोकार्तैः विलपद्भिरितस्ततो जिज्ञासा समारब्धा। तत् परिज्ञाय मार्जारः कोटरान्निस्सृत्य बहिः पलायितः। पश्चात् पक्षिभिरितस्ततो निरूपयद्भिस्तत्र तरुकोटरे शावकास्थीनि प्राप्तानि। अनन्तरमनेनैव जरद्ववेनास्माकं शावकाः खादिता इति सर्वैः पक्षिभिर्निश्चित्य गृध्रो व्यापादितः॥

---

१) प्रश्नाः—१. जरद्ववः कुत्र प्रतिवसति? २. केन स जीवति? ३. दीर्घकर्णः किमर्थं तत्रागतः? ४. स जरद्ववमवलोक्य स्वयं किमाह? ५. कथं तेन विश्वासं उत्पादितः? ६. दिनेषु गच्छत्सु किमभूत्? ७. परिणामश्च कीदृश आसीत्?

२) प्रयोगं विपरिणमयत—

१. दीर्घकर्णं दृष्ट्वा पक्षिशावकैः कोलाहलः कृतः।
२. यूयं धर्मज्ञानरता इति पक्षिणो ममाग्रे प्रस्तुवन्ति।
३. मयाऽपि धर्मशास्त्राण्यधीतानि।
४. सर्वैः पक्षिभिर्मिलित्वा गृध्रो व्यापादितः॥

३) अतिशयनार्थकैः पदैः वाक्यानि पूरयत—

१. अल्पविद्याद्बिद्यः...(प्रशस्य)।
२. निःश्रेयसाय कर्ममार्गात् ज्ञानमार्गः ... (बाढ)।
३. मूर्खपुत्रात् मृतः पुत्रः ... (उरु)।
४. सर्वेषु कुसुमेषु शिरीषकुसुमं ... (मृदु)॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

४) कृत्प्रत्ययान्ताः—

पद् to move—(पद्यते, णिजन्तं पादयति)=पादितः, पादितवान्, पादयन्, पाद्यमानः, पादयित्वा, (सम्पाद्य) पादयितुम्, पादयितव्यम्, पादनीयम्, पाद्यम्।

चि to collect—(चिनोति)=चितः, चितवान्, चिन्वन्, चीयमानः चित्वा, (विचित्य) चेतुम्, चेतव्यम्, चयनीयम्, चेयम्॥

५) उपसर्गयोगादर्थभेदः—

पद्—पद्यते। णिजन्तं पादयति। आपादयति। उत्पादयति, उपपादयति, निष्पादयति, प्रतिपादयति, सम्पादयति॥

६) उपसर्गयोगादात्मनेपदम्—विवदते॥

७) भवन्तश्चैतादृशा धर्मज्ञाः—पूजायां बहुवचनम्॥

८) पर्यायाः—

मार्जारः ५—ओतुर्विडालो मार्जारः पृषदंशक आखुभुक्।

पर्कटी ३—प्लक्षो जटी पर्कटी स्यात्।

वटः ३—न्यग्रोधो बहुपाद्वटः।

अतिथिः ४—स्युरावेशिक आगन्तुः अतिथिर्ना गृहागते॥

पर्कटीवृक्ष *m* the wave-leaved fig-tree

कोटर *m. n.* the hollow of a tree

चान्द्रायणव्रत *n* a religious observance regulated by the waxing and waning of the moon

वीतराग *a* free from desire or passion

अध्यवसितम् *a* resolved

विवदमान *o* disputing

ऐकमत्यम् *n* unanimity, sameness of opinion

अपत्य *n* young one

व्यापादित *a* killed

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२५. हिमालयः

अस्त्युत्तरस्यां दिशि देवतात्मा
हिमालयो नाम नगाधिराजः ।
पूर्वापरौ तोयनिधी वगाह्य
स्थितः पृथिव्या इव मानदण्डः ॥

(श्री कालिदासविरचिते कुमारसंभवे Ist sloka)

अस्ति भारतखण्डस्योत्तरस्यां दिशि हिमालयो नाम महीधरः, यः पूर्वापरौ तोयनिधी वगाह्य स्थितो भारतवर्षस्योदीचीं सीमानमापादयति। यस्य च दैर्घ्यम् अष्टशतं क्रोशाः। विस्तारस्तु अवरतः पञ्चसप्ततिः क्रोशाः, परमतः पञ्चाशदुत्तरशतम् क्रोशाश्च भवन्ति। दैर्घ्येण वैशाल्येन औन्नत्येन च हिमालयोयं सर्वान् पर्वतानतिशेते। न केवलं भारतखण्डे, किन्तु समग्रेऽपि भूमण्डले नास्त्येतादृशोऽन्यः पर्वतः। अतोऽयं 'नगाधिराजः' इति स्थाने व्यपदिश्यते ॥

हिमालयोऽयं क्रमश उन्नतोन्नताभिस्तिसृभिः श्रेणीभिः चकास्ति। तत्र प्रथमा श्रेणिः त्रिसहस्रपदोन्नता महाद्रुमैराकीर्णा अरण्यानी भवति। अथाप्यस्या ऊर्ध्वसानुषु जनाः प्रतिवसन्ति। विविधानि धान्यानि चात्र प्ररोहन्ति। द्वितीया श्रेणिः अष्टादशसहस्रपदोन्नता वेणुतुल्यैः दीर्घैस्तृणैः हिंस्रैर्मृगैश्चाभिव्याप्ता। नात्र जना निवसन्ति।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तृतीया श्रेणिः परश्शतैरभ्रङ्कषैः शृङ्गैः संशोभते। तेषु पञ्चचत्वारिंशच्छृङ्गाण्यत्यन्तमुन्नतानि। तेषां तुङ्गतमं गौरीशङ्कराख्यं शृङ्गं द्व्युत्तरनवविंशतिसहस्रं पदान्युच्छ्रयते। नास्यां श्रेण्यां वृक्षाः प्ररोहन्ति। नापि जन्तवो जीवन्ति। किन्त्वेषा श्रेणी सर्वकालं शिलाकठिनया हिमान्या प्रावृता वर्तते। या खलु हिमानी निदाघकाले विलीयमाना वृष्टिमन्तरेणापि स्रोतस्विनीषु स्रोतांस्यभिवर्धयति। अत एवास्य पर्वतस्य हिमालयव्यपदेशः॥

भारतीयाः विदेशीयाश्च महता प्रयत्नेन गौरीशङ्करशृङ्गम् आरोढुं चिराय प्रायतन्त। तत्र भारतीयाः सुवीराः धीमन्तः विजयिनः अभूवन्। तेभ्यः राष्ट्रपतिना 'पद्मश्री,' 'पद्मभूषण' इत्यादीनि बिरुदानि दत्तानि। अहो! भारतीयानां धन्यता॥

हिमालयोऽयं पूर्वपश्चिमप्रान्तयोः क्रमेण अवनतः वर्तते। विद्यन्ते च तत्र तिब्बतदेशप्रापका दुर्गमाः पन्थानः। यद्ययं सर्वत्राप्येकरूप्येण तुङ्गोऽभविष्यत् तर्हि तद्वास्या जनास्तया दिशा भारतवर्षं प्रवेष्टं नाशक्ष्यन्॥

हिमाचलादस्माद्गङ्गाप्रभृतयो नद्यः सिन्धुप्रभृतयो नदाश्चोद्भूय भारतभूमौ प्रवहन्ति। यो हि वायुना नीयमानान् मेघान् जलकणांश्च निरुन्धन् नानाविधानां नदीनां प्रभवतामुच्छति। भारतवर्षस्य सम्पत्समृद्धौ हिमालय एव मुख्यो हेतुः। अत एवैनं देवतात्मानं राकलयन्ति भारतीयाः॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१) प्रश्नाः—१. हिमालयस्य शैलराज इति व्यपदेशः कथं सङ्गच्छते ?

२. हिमालयस्य तिस्रः श्रेणीरधिकृत्य किं ज्ञातं वै ?

३ हिमालय. पूर्वपश्चिमयोरन्तयो. कीदृशो वर्तते ?

४. भारतवर्षस्य सम्पत्समृद्धौ हिमालयः कथं मुख्यो हेतुः ?

५. भारतीयैः कथम् अयं देवतात्मा आकलितः ?

२) 'लृङ्' प्रयोगस्योदाहरणानि (Underlined)—

१. यदि हिमालयः सर्वत्रैकरूप्येण तुङ्गोऽभविष्यत् तर्हि तद्वाह्या जनास्तया दिशा भारतवर्षं न आगमिष्यत् ॥

२. यदि काले सुवृष्टिरभविष्यत् तर्हि सुभिक्षमभविष्यत् ॥

३) One word for:—

महत् अरण्यम् = अरण्यानी। महत् हिमम् = हिमानी।

४) दिशः चतस्रः (Four Directions)—

१. पूर्वा	or	प्राची	or ऐन्द्री	East.
२. दक्षिणा	or	अवाची	or याम्या	South.
३. पश्चिमा	or	प्रतीची	or वारुणी	West.
४. उत्तरा	or	उदीची	or कौबेरी	North.

५) विदिशः चतस्रः (Four Intermediate Directions)—

१. दक्षिणपूर्वा	or	आग्नेयी	South-East.
२. दक्षिणपश्चिमा	or	नैर्ऋती	North-West.
३. उत्तरपश्चिमा	or	वायवी	South-West
४. उत्तरपूर्वा	or	ऐशानी	North-East.

६) कृत्प्रत्ययान्ताः—

गाह् to dive into-(गाहते) = गाढः, गाढवान्, गाह्यमानः, गाह्यमानः, गाढ्वा, (वगाह्य) गाढुम्, गाढव्यम्, गाहनीयम्, गाह्यम्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वृ to cover—(वृणोति, वृणुते)=वृतः, वृतवान्, वृण्वन्, वृण्वानः, व्रियाणः, वृत्वा, (संवृत्य) वरितुम्, वरितव्यम्, वरणीयम्॥

७) उपसर्गयोगादर्थभेदः—

रुध्—(रुणद्धि, रुन्धे) = अनुरुणद्धि, अवरुणद्धि उपरुणद्धि, निरुणद्धि, विरुणद्धि। एवमात्मनेपदेऽपि।

कल्—कलयति, आकलयति, विकलयति, सङ्कलयति॥

८) पर्यायाः—

हिमम् ७—अवश्यायस्तु नीहारः तुषारस्तुहिनं हिमम्। प्रालेयं मिहिका...॥

संपत् ४—संपत् सम्पत्तिः श्रीश्च लक्ष्मीश्च...

महीधर *m* mountain
तोयनिधि *m* ocean
उदीची *f* northern
सीमन् *f* boundary
अवरतः *in* at least
परमतः *in* at the most
वैशाल्य *n* extensiveness
समग्र *n* entire
स्थाने *in.* rightly
श्रेणी *f* range
अरण्यानी *f* large forest
सानु *m. n.* summit
वेणुतुल्य bamboo like
परः शतं *a* more than a hundred
अभ्रंलिह *a* touching the sky
शृङ्ग *n* peak
तुङ्गतम *a* the highest
गौरीशङ्कर *n* the Mount Everest
सर्वकालम् *in* always
हिमानी *f* collection of snow
स्रोतस्विनी *f* river, stream
अवनत. *a* stopping
प्रभवता *f* the state of being the source

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२६. साधवः

उपकारिषु यः साधुः साधुत्वे तस्य को गुणः ।
अपकारिषु यः साधुः स साधुः सद्भिरुच्यते ॥ १

यथा चित्तं तथा वाचो यथा वाचस्तथा क्रियाः ।
चित्ते वाचि क्रियायां च साधूनामेकरूपता ॥ २

नालिकेरसमाकारा दृश्यन्ते भुवि सज्जनाः ।
अन्ये बदरिकाकारा बहिरेव मनोहराः ॥ ३

श्लोकः सुश्लोकतां याति यत्र तिष्ठन्ति साधवः ।
लकारो लुप्यते तत्र यत्र तिष्ठन्त्यसाधवः ॥ ४

उपेक्षन्ते न च स्नेहं न पात्रं न दशान्तरम् ।
सदा लोकहिते युक्ता रत्नदीपा इवोत्तमाः ॥ ५

परपरिवादे मूकः परनारीदर्शनेऽपि जात्यन्धः ।
परधनहरणे स जयति लोके महापुरुषः ॥ ६

प्रियप्राया वृत्तिर्विनयमधुरो वाचि नियमः
प्रकृत्या कल्याणी मतिरनवगीतः परिचयः ।
पुरो वा पश्चाद्वा तदिदमविपर्यासितरसं
चरित्रं साधूनामनुपधि विशुद्धं विजयते ॥ ७

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

(१) प्रश्नाः—१. कः साधुः सद्भिरुच्यते ? २. साधूनामेकरूपता कथम् ? ३. बहिरेव मनोहराः के ? ४. 'लकारो लुप्यते तत्र' कस्य लकारः कुत्र लुप्यते ? ५. 'रत्नदीपा इवोत्तमाः' कथम् ? ६. 'स जयति लोके महापुरुषः कः ? ७. साधूनां चरित्रं कीदृशम् ?

२) प्रयोगं विपरिणमयत—

१. अपकारिषु यः साधुः स साधुः सद्भिरुच्यते।
२. स जयति लोके महापुरुषः।
३. साधूनां यशः सर्वत्र सर्वैः गीयते॥

३) तुमुन्नन्तैः पदैः वाक्यानि पूरयत—

१. आस्तिकः धर्मं श्रु ... आचार्यमुपगच्छति।
२. साधवः प्राणव्ययेनापि परेषाम् उप+कृ ... यतन्ते।

४) 'लृङ्' रूपैः वाक्यानि पूरयत—

१ यदि जम्बुकः काकं न स्तु ..तर्हि मांसखण्डं न लभ्...।
२. यदि श्यामः सम्यक् पठ्...तर्हि उपाध्यायस्तं न ताड्...
३. यदि सूर्यो न वृत्...तर्हि जगदिदमन्धकारमयं भू...॥

५) दा, धा, मा स्था, गा पा हा—एषां कर्मणि लटि रूपाणि निर्दिशत॥

६) कृत्प्रत्ययान्ताः—

लुप् (to take away) (लुम्पति,) to be destroyed (लुप्यति) = लुप्तः, लुप्तवान्, लुम्पन्, लुप्यमानः, लुप्त्वा, (विलुप्य) लोप्तुम्, लोप्तव्यम्, लोपनीयम्, लोप्यम्,

तप् to do penance—(तपति) = तप्तः, तप्तवान्, तपन्, तप्यमानः, तप्त्वा, (सन्तप्य) तप्तुम्, तप्तव्यम्, तपनीयम्, तप्यम्॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

७) उपसर्गयोगादर्थभेदः—जि—जयति। पराजयते, विजयते॥

८) नानार्थाः—साधुवाधुषिके रम्ये सज्जने चाभिधेयवत्॥

९) पर्यायाः—

सज्जनः ६—महाकुल कुलीनार्य सभ्य सज्जन साधवः।

सदृशः ६—समानस्तु समस्तुल्यः सदृक्षः सदृशः सदृक्॥

साधु *a* well disposed
बदरिका *f* the fruit of the बदरी jujube tree
स्नेह *m* oil and affection or love
पात्र *n* reservoir, also a worthy person
दशान्तर *n* different state; a lamp
परपरिवाद *m* blame, stain
मूक *m* dumb person
जात्यन्ध *a* born blind
पङ्गु *a* lame
कल्याणी *f* agreeable, lovely
अनवगीत *a* faultless
अविपर्यासितरस *a* with sentiment unchanged
अनुपधि *a* devoid of fraud

---

२७. श्री बुद्धदेवः

आसीत् पूर्वं प्रायेण पञ्चशताधिकद्विसहस्रवत्सरेभ्यः प्रागुत्तरभारतवर्षे रोहिणीनद्यास्तीरे कपिलवस्तुनाम्नि नगरे शुद्धोदनो नाम शाक्यवंशसमुद्भवः नरपतिः। मायादेवी नाम राज्ञी तस्य जाया बभूव। तयोरात्मज एव गौतमबुद्धो नाम। गौतमबुद्धोऽयं 'सिद्धार्थ' इति 'शाक्यसिंह' इति चाभिधीयते।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

राजसूनुरसौ गुणवान् रूपवान् बलवान् धीरः शूरश्चासीत्। तस्य जननात् परं सप्तमे दिवसे मायादेवी दिवं जगाम। ततः प्रभृति शुद्धोदन एव तत्संवर्धनपरो बभूव। भविष्यच्चक्रवर्तिनमात्मनः कुमारं महताऽऽदरेण पोषयामास शुद्धोदनः॥

अथ प्राप्तवयस्कः कुमारः पित्रा नियुक्तो नानादेशीया वर्णमाला भाषाश्च पर्यशीलयत्। राजोचिताः सर्वा विद्याः कलाश्च जग्राह। धनुर्वेदे नितरां कुशलोऽभवत्। सर्वस्वामिगुणोपेतः स्वकुमारः समस्तसामन्ताभिवन्दितचरणश्चक्रवर्ती भविष्यतीति मन्यमानः शुद्धोदनश्चेतसि परमानन्दमभजत्॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अष्टादशे वर्षे तस्य निरतिशयलावण्यया यशोधराख्यया राजसुतया सह विवाहो निर्वर्तितः पित्रा। तयोरेकः सुतः समजनि राहुलो नाम। विवाहानन्तरमसौ गौतमो विभवैर्विराजमाने राजभवने दश वर्षाणि बन्धुभिः सार्धं वसति स्म। नासौ तेन निर्वृतिं प्रपेदे॥

गौतमः प्रकृत्या विरक्तचित्तः कारुण्यनिधिः परदुःखदुःखितश्चासीत्। जनानां जरामरणे विलोक्य तस्य चेतो व्याकुलतामगात्। जनैरनुभूयमानाः क्लेशास्तस्य हृदयं तुदन्ति स्म। कथमेते जनाः क्लेशान्मुक्ता भवेयुरिति चिन्तापरो जातः। ततः स तदुपायमन्विष्यन्नेकस्यां रात्रौ निद्राणेषु गृहजनेषु पितरं पुत्रं कलत्रं च वञ्चयित्वा तपोवनाभिमुखः प्रतस्थे॥

तपोवनमासाद्यासौ शिरो मुण्डयित्वा काषायांबरं धृत्वा चिरं तपस्विभिः सार्धमवसत्। नासौ तत्र जनानां क्लेशान्मुक्तेरुपायमलभत। अनन्तरं गयां प्राप्य तत्रासौ षड्वर्षाणि शिष्यैः सार्धमत्यवाहयत्। स च देशः पश्चात् बुद्धगयेत्याख्यां जगाम। बुद्धगया सम्प्रति मनोहरैर्विहारैरलङ्कृतं बौद्धानां महत् पुण्यक्षेत्रम्॥

अनन्तरं गौतमः कस्यचित् पिप्पलतरोर्मूलमासाद्य तत्र योगपीठमधिरूढस्तीव्रं तपोऽतप्यत। तत्रासौ बोधिमलभत। बोधिर्नाम निश्चिता बुद्धिः। सोऽस्य पिप्पलवृक्षः पश्चात् बोधिवृक्ष इति प्रथामवाप॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अस्य चैव वृक्षस्य कश्चित् शाखातरुः अशोकमहाराज पुत्रेण 'महिन्द' नाम्ना सिंहलद्वीपे प्राचीनतमराजधान्यां अनुराधपुरे महाविहारे सिंहलद्वीपे मतप्रचारकान् संप्रेष्य प्ररोपितः, चरित्रप्रसिद्धः भूमण्डले एव प्राचीनतमः समाख्यायते जनैः। यः ततः प्रभृति अद्य यावत् तत्रत्यैः सादरं जलसेकादिना परिपोषितो दृश्यते॥

चिरमेवं तपश्चरन् गौतमबुद्धस्तत्वप्रकाशमधिगत्य लोके नूतनं मतं प्रचारयामास। क्लेशानां प्रहाणाय जनैरनुसरणीयां सरणिं दर्शयामास। कारुण्यविवशोऽसौ 'न हिंस्यात् सर्वाणि भूतानि' इत्युपदिदेश। पशुमारणमप्यसौ नासहत। 'अहिंसा परमो धर्मः, सोऽधर्मः प्राणिनां वधः'। इत्थं बुद्धमतस्य परमः सिद्धान्तः॥

गौतमबुद्धोऽयं वैशाखे मासि पौर्णम्यां तिथौ विशाखानक्षत्रे कपिलवस्तुनगरोद्याने लब्धजन्मा स्वीयेऽशीतितमे वर्षे तस्मिन् एव मासि तस्यामेव तिथौ तस्मिन्नेव नक्षत्रे वाराणस्यां मल्लिकोद्याने निर्वाणं प्राप्तः। असौ विष्णोरवतारत्वेन पुराणेष्वाख्यातः॥

यद्यपि बौद्धग्रन्थाः प्रायेण संस्कृतभाषया लिखितास्तथापि बुद्धदेवः स्वीयं मतं सर्वजनसाधारण्या पालीभाषया प्रचारयामास। अतः पण्डिता इव पामराश्चापि तन्मतमनुसरन्ति स्म। लोके जनानां चतुर्थ्वेको भागस्तन्मतानुयायी

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

दृश्यते। बुद्धमतावलम्बिनः सम्प्रति भारतवर्षे सिंहलद्वीपे बर्माप्रभृतिषु देशेषु च प्रतिवसन्ति। बुद्धमतमिदं जनैरुत्कृष्टानां मतानामन्यतमत्वेन परिगण्यते ॥

---

१) प्रश्नाः—१. बुद्धदेवः कस्मिन् वंशे जातः? कयोः पुत्रः?
२. प्राप्तवयस्कः कुमारः किं किं परिशीलितवान्? ३. गौतम-बुद्धः प्रकृत्या कीदृश आसीत्? ४. स कुत्र कुत्र तपश्चकार?
५ कुत्रासौ बोधिमलभत? ६ बोधिवृक्षमधिकृत्य किं जानीध्वे?
७. तत्त्वप्रकाशमधिगत्य स किमकरोत्?
८. तन्मतस्य परमः सिद्धान्तः कः?
९. कुत्र कदा स जातः? कुत्र कदा च निर्वाणं प्राप्तः?
१०. तन्मतानुयायिनः सम्प्रति कुत्र भूयस्तया प्रतिवसन्ति?

२) आख्यातानां स्थाने क्तवत्वन्तानि रूपाणि निवेशयत—
१) शुद्धोदनः कुमारं महताऽऽदरेण पोषयामास।
२) स दशवर्षाणि बन्धुभिः सार्धं वसति स्म।
३) स नूतनं मतं लोके प्रचारयामास।
४) स जनैरनुसरणीयां सरणिं दर्शयामास ॥

३) सार्धम्, मित्रम्, कलत्रम्—एतैः पृथक् वाक्यानि रचयत ॥

४) पर्यायाः—
बुद्धः २२—सर्वज्ञः सुगतो बुद्धो धर्मराजस्तथागतः।
समन्तभद्रो भगवान् मारजिल्लोकजिज्जिनः ॥
षडभिज्ञो दशबलोऽद्वयवादी विनायकः।
मुनीन्द्रः श्रीघनः शास्ता मुनिः शाक्यमुनिस्तु यः-
स शाक्यसिंहः सर्वार्थसिद्धः शौद्धोदनिश्च सः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शाक्यः *m* name of the family of Buddha
संवर्धनम् *n* bringing up
नियुक्तः *a. m.* instructed
निर्वृतिः *f* satisfaction
व्याकुलता *f* perplexion
अत्यवाहयत् *p.* spent
काषाय *A* dyed of a reddish Colour
शाखातरुः *m* branch-tree
विहार *m* Buddhist Temple
गया also बुद्धगया *f a* Sacred place of pilgrimage in Bihar
पिप्पल The holy fig tree
प्रहाण *n* quitting
सरणिः *f* path, way
मारणं *n* killing
निर्वाणं *n* complete extinction of individual of worldly existence
मतं *n* Doctrine,
पामरः *m* low-man
अन्यतमम् *a. n*, anyone out of a large number

---

२८. विद्यया विन्दते अमृतम्

पुरा धारानगरे भुक्कुण्डो नाम कश्चित् कृतविद्यो धीश्रोरो बभूव। स कस्याश्चिद्रात्रौ कस्यचिद्वणिजः सदनं प्रविश्य महार्घाणि भूषणानि मुषित्वा गृहं प्रति न्यवर्तत। निभृतं स नगरमार्गे निर्गच्छन्नारक्षकैर्लक्षितो गृहीतश्च॥

अन्येद्युः प्रातरेव तं निगडितहस्तं ते राजान्तिकं निन्युः। राजा च तमवलोक्य—'कोऽयम्?' इत्यारक्षकानप्राक्षीत्। आरक्षका आहुः—'देव! कुम्भीलकोऽयमतीतायां रात्रौ मणिकारवीथ्यां कस्यचिद्वणिजो वसतिं खातपातमार्गेण प्रविश्य

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

भूषणानि चोरयित्वा बहिर्गच्छन्नस्माभिर्गृहीत आनीतश्च। श्रुत्वा देवः प्रमाणम्'—इति ॥

तेषां वचः श्रुत्वा राजा कुम्भीलकमपृच्छत्—'रे! अपि सत्यं यदेते कथयन्ति'! भुक्कुण्डस्तावदात्मनः कृत्यं निह्नोतुमशक्नुवन् क्षणं तूष्णीमास्त। भूयः सभ्रमङ्गं पृष्टः सः—'देव! प्रसीद। अहमतीव दरिद्रोऽस्मि। चौर्येणैव मया जीवनं क्रियते। क्षम्यताम्'—इत्यवदत्। तच्छ्रुत्वा कुपितो राजा वधदण्डं व्यधत्त ॥

सुधीः भुक्कुण्डः दुस्सहाम् इमां राजाज्ञां श्रुत्वा भृशं व्याकुलीभूतोऽपि स्वकवितया दण्डात् आत्मानं मोचयितुमिच्छन् कविषु राज्ञः परमं वात्सल्यं जानानः प्रत्युत्पन्नमतिः निर्भीकः प्राह—

"भट्टिर्नष्टो भारवीयोऽपि नष्टो
भिक्षुर्नष्टो भीमसेनोऽपि नष्टः।
भुक्कुण्डोऽहं भूपतिस्त्वं च राजन्
भब्भावल्यामन्तकः सन्निविष्टः ॥"—इति।

तदाकर्ण्य कविवत्सलो राजा-'भो भुक्कुण्ड! दण्डार्होऽपि त्वं सुकविरसीति मया क्षम्यसे। इतः परमीदृशं कर्म मा कार्षीः'—इत्युक्त्वा तेन मुष्टं सर्वं धनं तत्तत्स्वामिभ्यः प्रत्यर्प्य स्वदत्तेन प्रभूतेन वित्तेन तं सम्भावयामास। भुक्कुण्डोऽपि

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तदारभ्य त्यक्तचौर्यो राज्ञः प्रीतेः पात्रीभूतः सपुत्रकलत्रः सुखमुवास ॥

अहो ! पश्यत विद्याया महिमानम् । तीव्रं दण्डितोऽपि स चोरः विद्यया अमृतत्वम् अविन्दत !

'किं किं न साधयति कल्पलतेव विद्या' ॥

---

१) प्रश्नाः—१. निभृतं नगरमार्गे निर्गच्छन् क आरक्षकैर्लक्षितो गृहीतश्च ? २ किमर्थं स गृहीतः ? ३, ते तं राजान्तिकं नीत्वा किमवोचन् ? ४, राजा कुम्भीलकं किमपृच्छत् ? ५, कुम्भीलकः किमकरोत् ? ६, राजा तस्य कीदृशं दण्डं व्यधत्त ? ७. भुक्कुण्डो राजानं किं प्राह ? ८. राजा तं किमुक्त्वा विससर्ज ? ९. अनेन किं गृह्यते ?

२) निर्दिष्टैर्लकारैः वाक्यानि पूरयत—

१) भुक्कुण्डः कस्यचिद्वणिजो गृहात् भूषणानि मुषु...लङ् ।
२) भुक्कुण्डः प्रथममात्मनः कृत्यं नि + हनु ... लङ् ।
३) राजा तस्य वधदण्डं वि + धा ... लिट् ।
४) यो बाल्ये विद्यां ग्रह्...लट्, स पश्चात् सुखं वष्...लट् ॥

३) निभृतम्, प्रमाणम्, तूष्णीम्, वरम् एतैः वाक्यानि रचयत ॥

४) कृत्प्रत्ययान्ताः—

इ (गतौ) to go—(एति)=इत्वा, इतवान्, यन्, इयानः, इत्वा, (उपेत्य) एतुम्, एतव्यम्, अयनीयम्, एयम् ।

अध्ययनार्थस्य 'इ' धातोरप्येवमेव अधिपूर्वकाणि रूपाणि ।

The Pre. Part. is अधीयानः.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

(हनु) to hide (हनुते निह्नुते)=निह्नुतः, निह्नुतवान्; निह्नुवानः;—, ह्नुत्वा, निह्नुत्य, निह्नातुम्, निह्नोतव्यम् निह्नवनीयम्।

५) पर्यायाः—

विद्वन् २२

विद्वान् विपश्चित् दोषज्ञः सन् सुधीः कोविदो बुधः।
धीरो मनीषी ज्ञः प्राज्ञः संख्यावान् पण्डितः कविः॥
धीमान् सूरेः कृती कृष्टिः लब्धवर्णो विवक्षणः॥
दूरदर्शी दीर्घदर्शी.....॥

विन्दते *A* obtains
अमृतम् *n* immortality
कृतविद्य *a* educated
सदन *n* abode
निभृतं *in* quietly
आरक्षक *n* Policeman
कुम्भीलक *m* thief
मणिकारवीथी jeweller's street
खातपातमार्ग *m* excavation
निगडितहस्त *a* with arms fettered
देवः *m* प्रमाणम् *n* Your Highness is the sole judge
निह्नोतुम् *in.* to conceal
सभ्रूभङ्गम् *in* knitting eye brows
सुधी *a* intelligent
प्रत्युत्पन्नमति *a* possessed of presence of *m*ind
भृशम् *in* very much
अन्तक *m* the God of [death
मुष्ट *a* stolen
प्रभूत *a* plenty
कल्पलता *f* wish-yielding creeper.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२९. चाटुश्लोकाः

अगजाननपद्मार्कं गजाननमहर्निशम् ।
अनेकदन्तं भक्तानामेकदन्तमुपास्महे ॥ १
आदिमध्यान्तरहितं दशाहीनं पुरातनम् ।
अद्वितीयमहं वन्दे मद्वस्त्रमदृशं हरिम् ॥ २
वन्दे वाञ्छितलाभाय कर्म किं तन्न कथ्यते ।
किं दम्पतिमिति ब्रूयामुताहो दम्पती इति ॥ ३
सदा वक्रः सदा क्रूरः सदामानधनापहः ।
कन्याराशिस्थितो नित्यं जमाता दशमो ग्रहः ॥ ४
प्रातर्द्यूतप्रसङ्गेन मध्याह्ने स्त्रीप्रसङ्गतः ।
रात्रौ चौर्यप्रसङ्गेन कालो गच्छति धीमताम् ॥ ५

---

१) टिप्पणम्। चाटुश्लोकाः=रसानन्दजनकाः श्लोकाः—

१) गजाननः अपि अगजाननपद्मार्कः इति विरोधः। अगजायाः पार्वत्याः आननपद्मार्कः इति परिहारः। अनेकदन्तम् एकदन्तम् इति विरोधः। अनेकदं तम् इति पदच्छेदेन परिहारः॥

२) हरिः वस्त्रं च तुल्ये। वस्त्रस्य दशा (अन्तम्) नास्ति। विष्णोः दशा (बाल्याद्यवस्था) नास्ति॥

३) दंपतिं दंपती इति उभयथाऽपि वक्तुं न शक्यते। आद्यः व्याकरणरीत्या असाधुः। अन्त्ये अर्थः न युज्यते, यतः अर्धनारीश्वरस्वरूपम् एकम्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

४) अन्ये ग्रहाः कदाचिदेव वक्राः क्रूराः मानघनापहाश्च। जामाता तु सदा इति विशेषः॥

५) द्यूतेन स्त्रीसेवया शौर्येण च कालयापनं कुर्वन्तः न धीमन्तो भवेयुः इति विरोधः। द्यूतस्य प्रसङ्गः यस्मिन् स्त्रियाः प्रसङ्गः यस्मिन्, शौर्यस्य प्रसङ्गः यस्मिन् इति विग्रहेण क्रमशः श्रीमन्महाभारतेन, श्रीमद्रामायणेन, श्रीमद्भागवतेन च कालं यापयन्तीति परिहारः॥

२) प्रश्ना.—१. 'एकदन्तमुपास्महे' कीदृशम्? २. 'वन्दे हरिम्, कीदृशम्? ३. कर्म किं तज्ज कथ्यते कुतः? ४. 'जामाता दशमो ग्रह' कथम्? ५. 'कालो गच्छति धीमताम्' केन?

३) लिङः स्थाने तव्य प्रत्ययान्तानि रूपाणि निवेश्य वाक्यानि घटयत—१) सत्यं ब्रूयात् प्रियं ब्रूयान्न ब्रूयात् सत्यमप्रियम्।
२) न देवमिति सञ्चिन्त्य त्यजेदुद्योगमात्मनः।
३) मनोऽभिरामां शृणुयान्नित्यं हरिकथां जनः॥

४) ल्यबन्तरूपैः वाक्यानि पूरयत॥

१) केसरिणः करिणां मूर्धानम् आ + रुह्...तेषां गण्डौ भिन्दन्ति॥

२) आरुणिः केदारखण्डात् सहसा उत्+स्था...समागतः।

३) महात्मानो भुवम् अव+तृ...परहितार्थं आत्मानमर्पयन्त

४) दीर्घकर्णः पक्षिशावकान् आ+क्रम्...कोटरम् आ+नी... चखाद॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

५) उपसर्गयोगादर्थभेदः—

आस्—आस्ते-अध्यास्ते, अन्वास्ते, उपास्ते, उदास्ते ॥

६) नानार्थाः—दशाऽवस्थादीपवर्त्यो. वस्त्रमन्ते भूमिर्योषिति ॥
—इति मेदिनी कोशः

८) पर्यायाः—

वस्त्रम् ६—वस्त्रमाच्छादनं वासः चेलं वसनमंशुकम् ।
वक्रम् ११ "अरालं वृजिनं जिह्मम् ऊर्मिमत्कुञ्चितं नतम् ।
अविद्धं कुटिलं भुग्नं वेल्लितं वक्रमित्यपि ॥

चाटुश्लोक *m* humorus verse

अगजा *f* born of a mountain (पार्वती)

अनेकद *a* bestower of many thing

एकदन्त *a* one-toothed

दशाहीन *a* (1) he who has no stages of life
(2) that which has no edge

अद्वितीय *a* (I) matchless (1) without a second

वाञ्छित *a* desired object. कन्याराशिस्थित *m* This Planet of जामाता is always in the sixth sign of कन्या (daughter) in राशिचक्र i.e., He is always with कन्या, his wife.

द्यूतप्रसङ्ग *m* (1) attachment in gambling
(2) श्रीमन्महाभारत (in which story of the द्यूत is described)

स्त्रीप्रसङ्ग *m* (1) association with women
(2) श्रीमद्रामायण

चौर्यप्रसङ्ग *m* (1) attachment with theft
(2) श्रीमद्भागवत

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३०. वाराणसीक्षेत्रम्

सन्ति खलु भारतवर्षे तत्र तत्र बहूनि तीर्थक्षेत्राणि। तेषु अयोध्या, मथुरा, माया, काशी, काञ्ची, अवन्तिका, द्वारवतीत्येतानि प्रधानभूतानि। तत्रापि वाराणसी पुराणेष्वतिशयेन वर्ण्यमानमनुत्तमं पुण्यक्षेत्रम्। सैव काशीत्युच्यते। सैषा भारतवर्षस्य पूर्वोत्तरभागेऽवतिष्ठते; यस्याः परिसरे पुण्यसलिला भागीरथी प्रवहति॥

गङ्गायां स्नानेन तत्तीर्थपानेन वा जनाः पूतात्मानो मुक्तिं प्राप्नुवन्तीति वेदाः पुराणानि चोद्घोषयन्ति॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

उक्तं च 'भजगोविन्दे' श्रीशङ्करभगवत्पादैः—

भगवद्गीता किञ्चिदधीता गङ्गाजललवकणिका पीता।
सकृदपि येन मुरारिसमर्चा क्रियते तस्य यमेन न चर्चा॥

अतो भारतवर्षस्य सर्वाभ्यो दिग्भ्यः सर्वेभ्यो देशेभ्यश्च स्त्रियः पुरुषा बाला वृद्धाश्च गङ्गास्नानार्थं काशीं गच्छन्ति। गत्वा च तत्र नद्यां स्नात्वा भगवन्तं श्रीज्योतिर्लिंगमूर्तिं विश्वनाथं पश्यन्ति अर्चन्ति च॥

गङ्गायास्तीरे निबद्धाः सुन्दराः सुविशालाश्च तीर्थशिलाः सततं जनैराकीर्णा उपलभ्यन्ते। एकत्र वैष्णवाः, अन्यत्र शैवाः, अपरत्र मतान्तरीयाश्च स्वस्वचिह्नानि धरन्तः कुशहस्ताः पञ्च-पात्रपाणयो जपन्तो ध्यायन्तश्च तीर्थशिलामलङ्कुर्वन्ति। अन्यत्र केचिद्बाहवः पादाग्रेण तिष्ठन्त उद्यन्तं सूर्यमेकाग्रेण मनसा ध्यायन्ति। अपरे केचन कृतप्राणायामाः पशुपतिं ध्यायन्ति। इत्थमेषा वाराणसी सत्कर्मणामायतनं धर्माणामावासभूमिश्च दृश्यते॥

वाराणस्येषा बहुभूमिकैरत्युच्छ्रितैर्मन्दिरैः संशोभते। विशेषतश्च नद्यास्तीरे सुप्रतिष्ठिता गृहपङ्क्तिः महतीं शोभां बिभर्ति। नगरमिदं पुरा हाटकमयं बभूवेति श्रूयते। इदानीं तु केवल शिलामयं दृश्यते। गङ्गा च स्नानघट्टानामग्रतः परः सहस्रैर्बाष्पप्रवहणैः महानौकाभिश्चाभिव्याप्ता विलसति। काशी-नगरस्य सुषमा नदीगतं प्रवहणमारूढैर्निरीक्षणीया॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

काशीक्षेत्रमिदं भारतीयविद्यायाः कुलभवनमिवाभाति। यतो ह्यत्र वेदाः पुराणानि शास्त्राणि च यथापुरमद्यत्वेऽपि सश्रद्धमधीयन्ते हिन्दुमहाविश्वविद्यालये जनैः। पण्डित श्रीमदन-मोहन माळवीयमहाशयैः प्रतिष्ठापितः हिन्दु महाविश्वविद्यालयः अत्र सुतां चकास्ति। अत्रत्यं विद्यापीठमधिरूढो जनः समस्तविद्यापारगत्वेन परिगण्यते। अत्र जनानां जीवि-तान्तिमक्षणे भगवान् विश्वनाथः कर्णे तारकमन्त्रम् उपदिशति, येन ते मुक्तिभाजो भवन्ति इत्यहो वाराणसीक्षेत्रमहिमा॥

---

१) प्रश्नाः—१. भारतवर्षे प्रधानभूतानि पुण्यक्षेत्राणि कानि? २. वाराणसी कीदृशं पुण्यक्षेत्रम्? ३. के जनाः गङ्गा-स्नानार्थं काशीं गच्छन्ति? ४. गङ्गातीरगतास्तीर्थशिलाः कीदृशैर्जनैराकीर्णा उपलभ्यन्ते? ५. काशीनगरस्य शोभा कीदृशी? ६. क्षेत्रमिदं कस्याः कुलभवनम्?

२) प्रयोग विपरिणमयत—

१) नद्यास्तीरे विद्यमाना गृहपङ्क्तिर्महतीं शोभां बिभर्ति।

२) वेदाः शास्त्राणि पुराणानि च सश्रद्धमधीयन्ते जनैः।

३) निर्दिष्टैर्लकारैः वाक्यानि पूरयत—

१) वसन्ते पद्मानि परां शोभां भू ... लट्।

२) स्त्रियो भूषणैरात्मानम् अल + कृ ... लट्।

४) अनुत्तमम्, अमूल्यम्, अनर्घम्—एतैः वाक्यानि रचयत॥

५) कृत्प्रत्ययान्ताः—

ध्यै to meditate—(ध्यायति) = ध्यातः, ध्यातवान्, ध्यायन्, ध्यायमानः, ध्यात्वा, अनुध्याय, ध्यातुम्, ध्यातव्यम्, ध्यानीयम्, ध्येयम्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

भृ to bear—(बिभर्ति) = भृतः, भृतवान्, बिभ्रत्, बिभ्रमाणः, भृत्वा, (सम्भृत्य) भर्तुम्, भर्तव्यम्, भरणीयम्।

पू to purify—(पुनाति, पुनीते) = पूतः, पूतवान्, पुनन्, पुनानः, पूयमानः, पूत्वा, परिपूय, पवितुम्, पवितव्यम्, पवनीयम्, पाव्यम्॥

७) उपसर्गयोगात् परस्मैपदम्—वहू (वहति, वहते) प्रवहति॥

८) पर्यायाः—

गङ्गा ८—गङ्गा विष्णुपदी, जह्नुतनया, सुरनिम्नगा। भागीरथी, त्रिपथगा, त्रिस्रोताः, भीष्मसूरपि॥

शोभा ४—सुषमा परमा शोभा; शोभा कान्तिर्युतिश्छविः। परमा शोभा = सुषमा इत्यर्थः (Exquiste beauty)

मोक्षः ८—मुक्तिः कैवल्यनिर्वाणश्रेयो नैश्रेयसामृतम्। मोक्षोऽपवर्गः।

अज्ञानम् ३—अयाज्ञानम् अविद्याऽहंपतिः स्त्रियाम्॥

अयोध्या *f* the modern Oudh

मथुरा *f* the birth place of Lord Krishna

माया *f* Name of Gaya

काशी *f* Benares

द्वारवती *f* Dwaraka

अवन्तिका *f* the modern उज्जयिनी

काञ्ची *f* Name of ancient city in South India

अनुत्तम *a* peerless; having no superior

मुरारि *m* Lord Vishnu

समर्चा *f* worship

तीर्थशिला *f* step of bathing ghat.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्राणायाम *m* controlling the breath
पशुपति *m* Lord Siva
आयतन *n* abode
हाटक *n* gold
उच्छ्रित *a* huge
यथापुरं *ind.* as before
कुलभवन *n* family house.

३१. श्रीशङ्कराचार्यः

जगद्गुरुः श्रीशङ्कराचार्यः केरलेषु चूर्णीनद्यास्तटे

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विद्यमानं कालटिनामकं जनपदं स्वजन्मना व्यभूषयत। तस्य पिता परमभागवतः शिवगुरुः, माता च धर्मशीला आर्याम्बा। सोऽयमाचार्यः अष्टाशीत्युत्तरसप्तशततमे क्रिस्तब्दे नन्दनवत्सरे वैशाखमासे शुक्लपञ्चम्यां तिथौ पुनर्वसुनक्षत्रेऽभिजिन्मुहूर्ते भुवमवातरत् ॥

स यदा पञ्चहायनोऽभूत् तदा तस्य पिता शिवगुरुर्दैवदुर्विपाकात् कालधर्मं गतः। आर्याम्बा च पत्युर्वियोगेन खिन्नाऽपि सुतस्य भविष्यमनुध्यायन्ती तस्थौ। बालकस्य च विद्याग्रहणे निरतिशयं पाटवं वीक्ष्य सा तस्मिन्नेव वत्सरे बन्धुभिस्तस्योपनयनं कारयामास। अनुपदमेव गुरुकुलमुपनीतः स बालको द्वित्रैरेव वर्षैः सर्वान् वेदान् वेदाङ्गानि विविधाः भाषाश्चाध्यगीष्ट ॥

अधीत्य च सर्वाणि शास्त्राण्यष्टहायनः कुमारो जगदिदं मृगतृष्णिकायास्तुल्यमाकलयन् सन्यासग्रहणे मतिं बबन्ध। तदेकपुत्रा माता च तस्येच्छां नान्वमन्यत। अथापि स एकस्मिन्नहनि आत्मानं नक्रगृहीतम् अभिनयन्, संन्यासस्वीकरणे नक्राद्विमुक्तिं बोधयन् कथञ्चित् तां सान्त्वयन्ननुततस्तयाऽनुमतो गृहात् प्रस्थितः संन्यासस्य दातारं गुरुमन्विष्यन् वाराणसीमगच्छत्। तत्र च गोविन्दाचार्यं नाम महासंयमिनं शरणमुपेत्य तस्मात् संन्यासमधिगत्य तस्यैव सविधे वेदान्तमध्यैत ॥

गोविन्दाचार्यस्तं कथित् कालमध्यापयन् तस्य प्रतिभाशक्त्या विस्मितस्तं साक्षाच्चराचरगुरोः शङ्करस्यावतारममन्यत;

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

आदिशच्चैनं पाखण्डैरभिभूयमानस्य सनातनस्य सद्धर्मस्य परिपालनाय।

शिरसा वहन् गुरोराज्ञां श्रीशङ्कराचार्यः सर्वत्र पुण्यक्षेत्रेषु सञ्चरन्नुपनिषद्भिरुपदिश्यमानमद्वैतं लोके प्रचारयामास। आवर्जयामास मधुरमधुरया वाग्धोरण्या जनतायाश्चेतांसि। खण्डयामास नास्तिकानां मतानि। स्थापयामास सर्वत्रास्तिकानां सम्मतं सद्धर्मम्। रचयामास हृद्यया शैल्या सूत्रभाष्यादिकान् परः शतान् ग्रन्थान् विविधानि स्तोत्ररत्नानि च। अध्यापयामास च नानादिग्भ्यः समागतान् परःसहस्रान् शिष्यान्। तेषु प्रधानभूताः—पद्मपादाचार्यः, सुरेश्वराचार्यः, हस्तामलकाचार्यः, तोटकाचार्यः इति चत्वारः शिष्याः॥

तदनु श्रीशङ्कराचार्यो महता यत्नेनोज्जीवितस्य सद्धर्मस्य स्थिरप्रतिष्ठार्थं बदर्यां जगन्नाथे काञ्च्यां द्वारकायां च मठान् प्रतिष्ठाप्य तत्र धर्मप्रवचनाय तान् शिष्यान् न्ययुङ्क। स्वयं च महीशूरदेशान्तर्गते शृङ्गगिरौ प्रतिष्ठापितं मठमधिष्ठाय पाठप्रवचनादिकं कुर्वन्नासाञ्चक्रे। यद्यप्ययं योगीश्वरो विष्णुशिवयोरभेदमातिष्ठत, तथाप्यस्य भगवति शिवे महती भक्तिरासीत्। अत एव तदनुगामिनो जनाः प्रायेण शिवभक्ताः एवोपलभ्यन्ते॥

श्रीशङ्कराचार्योऽयमल्पीयसैव कालेन आसेतुहिमाचलं स्वीयं नित्यशुद्धं यशो विस्तार्य द्वात्रिंशे वयसि केदारनाथक्षेत्रे समाधिमास्थाय परं धाम प्रपेदे। तेन प्रतिष्ठापितो मतधर्मश्चाद्य

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

यावत् समुल्लसति सर्वत्र भारते वर्षे। तत्राप्ययं दक्षिणापथे सविशेषः प्रचरति ; यत्र हि परमकारुणिकाः श्रीकाञ्चीकामकोटि-पीठाधिपतयः श्रीशृङ्गगिरि शारदापीठाधिपतयश्च धर्मसंस्थाप-नार्थाय देशाद्देशं व्रजन्तः शिष्यानुपदिशन्तः अधर्ममुच्चाटय-न्तश्चाद्वैतमतं श्रद्धया परिपालयन्तः प्रचारयन्तश्च चकासति॥

---

१) प्रश्नाः—१. श्रीशङ्कराचार्यस्य शैशवं संन्यसनं चाधिकृत्य किं जानीध्वे? २. स कस्य सविधे वेदान्तमध्यैत? ३. गुरुस्तं कस्मिन् कर्मणि न्ययुङ्क्त? ४. गुरोराज्ञां शिरसा वहन्नाचार्यः किं चकार? ५. तस्य प्रधानभूताः शिष्याः के? ६. सद्धर्मस्य स्थिरप्रतिष्ठार्थं स किमकरोत्? स कदा कुत्र परं धाम प्रपेदे? तेन प्रतिष्ठापितो मतधर्मः कथम्भूतो वर्तते?

२) निर्दिष्टैर्लकारैः वाक्यानि पूरयत—

१) विरक्त चित्तो नरः संन्यासग्रहणे मतिं बन्धू ... लट्।
२) स द्वित्रैरेव वर्षैर्वेदान् वेदाङ्गानि च अधि+इ ... लङ्।
३) केदारनाथक्षेत्रे स परं धाम प्र+पद् ... लङ्।
३) तदेकपुत्रा जनयित्री तस्येच्छां न अनु+मन् ... लिट्॥

३) उपसर्गयोगादात्मनेपदम्—

स्था—तिष्ठति। अतिष्ठते, संतिष्ठते, अवतिष्ठते, प्रतिष्ठते, वितिष्ठते, उपतिष्ठते॥

४) उप+गत्वा, उप+इत्वा, अधि+इत्वा, अधि+स्थित्वा, आ+स्थित्वा, आ+कृष्ट्वा, सं+गृहीत्वा, अव+आप्त्वा

—एषां ल्यबन्तरूपाणि लिखत॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

५) जनानां समूहः = जनता। ग्रामाणां समूहः = ग्रामता।
बन्धूनां समूहः = बन्धुता। एवं सहायता, गजता।

६) उदयते, आस्ते, ईक्षते, ईहते-एषां लिटि रूपाणि निर्दिश्यत॥

७) पर्यायाः—

नित्यः ५—शाश्वतस्तु ध्रुवो नित्य सदातन सनातनाः।

तीक्ष्णम् ३—तिग्मं तीक्ष्ण खरम्।

मृगतृष्णा २—मृगतृष्णा मरीचिका॥

परमभागवत *n* great devotee

अभिजिन्मुहूर्त *m* the 8th मुहूर्त of the day comprising 24 minutes before and 24 minutes after noon

पञ्चहायन *a* five years of age

कालधर्म *m* death

भविक *n* prosperity, welfare

निरतिशय *a* unsurpassed, matchless

पाटव *n* cleverness, skill

मृगतृष्णिका *f* mirage

प्रतिभा *f* vivid imagination

पाखण्ड, पाषण्ड *n* heretic

वाग्धोरणी *f* continuous flow of words

जनता *f* mankind

महीशूदेश *m* Mysore State

शृङ्गगिरि *m* Sringeri Town

अतिष्ठत् *A* aoknowledged

परंधामन् *n* the higher or superior abode.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३२. सुभाषितावलिः—प्रथमं दशकम्

भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती ।
तस्माद्धि काव्यं मधुरं तस्मादपि सुभाषितम् ॥ १

द्राक्षा म्लानमुखी जाता शर्करा चाश्मतां गता ।
सुभाषितरसस्याग्रे सुधा भीता दिवं गता ॥ २

किं कुलेन विशालेन शीलमेवात्र कारणम् ।
भवन्ति नितरां स्फीताः सुक्षेत्रे कण्टकिद्रुमाः ॥ ३

सर्वत्र गुणवान् देशे चकास्ति प्रथतेतराम् ।
मणिर्मूर्ध्नि गले बाहौ पादपीठेऽपि शोभते ॥ ४

गुणैरुत्तुङ्गतां याति नोच्चैरासनसंस्थितः ।
प्रासादशिखरस्थोऽपि काकः किं गरुडायते ॥ ५

गुणेषु क्रियतां यत्नः किमाटोपैः प्रयोजनम् ।
विक्रीयन्ते न घण्टाभिर्गावः क्षीरविवर्जिताः ॥ ६

गुणानामन्तरं प्रायस्तज्ज्ञो जानाति नेतरः ।
मालतीमल्लिकामोदं घ्राणं वेत्ति न लोचनम् ॥ ७

निर्गुणेष्वपि सत्त्वेषु दयां कुर्वन्ति साधवः ।
न हि संहरते ज्योत्स्नां चन्द्रश्चण्डालवेश्मनः ॥ ८

बलवानपि निस्तेजाः कस्य नाभिभवास्पदम् ।
निश्शङ्कं दीयते लोकैः पश्य भस्मचये पदम् ॥ ९

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

न प्रयत्नशतेनापि दुर्जनः सुजनो भवेत् ।
किं मर्दितोऽपि कस्तूर्या लशुनो याति सौरभम् ॥ १०

---

१) प्रश्नाः—१. काव्यं कस्मात् मधुरम् ? २. सुभाषितरसस्यात्रे द्राक्षा शर्करा सुधा च किं कुर्वन् ? ३. 'भवन्ति नितरां स्फीताः' के ? कुत्र ? ४. 'चकास्ति प्रथनेतराम्' कः कुत्र ? ५. 'गुणैरुच्चैरुच्चतां याति नोच्चैरासनसंस्थितः' कोऽत्र दृष्टान्तः ? ६. 'विक्रीयन्ते न घण्टाभिः' काः ? ७. 'तज्ज्ञो जानाति नेतरः' किम् ? ८. 'न हि संहरते ज्योत्स्नां चन्द्रश्चण्डालवेश्मनः, किमत्र दार्ष्टान्तिकम् ? ९. 'कस्य नाभिभवास्पदम् काः ? १०. 'न सुजनो भवेत् कः ? कथम् अपि ? अत्र दृष्टान्तः कः ?

२) प्रयोगं विपरिणमयत—

१) गुणानामन्तरं प्रायस्तज्ज्ञो जानाति नेतरः ।
२) निर्गुणेष्वपि सत्वेषु दयां कुर्वन्ति साधवः ॥

३) उपसर्गयोगादात्मनेपदम्—

क्री–क्रीणाति, क्रीणीते । विक्रीणीते, परिक्रीणीते, अवक्रीणीते

४) नामधातुः—गरुड इव आचरति=गरुडायते। एवं काकायते पिकायते. शुकायते, सिंहायते. इत्यादिकम् ॥

५) कृत्प्रत्ययान्ताः—

या to go—(याति)=यातः, यातवान्, यान्, यायमानः यात्वा, अनुयाय. यातुम्. यातव्यम. यानीयम् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

६) पर्यायाः—

बृहत् ६—विशङ्कटं पृथु बृहत् विशालं पृथुलं महत्।
कारणम् ३—हेतुर्ना* कारणं बीजम्। (*ना=पुंलिङ्गः)
निदानम् २—निदानं त्वादिकारणम्॥

सुभाषितावलि *N. f. A.*, collection of wise sayings

1 गीर्वाण *m* Devas
भारती *f* language

2 म्लानमुखी *f* which has the appearance of faded leaves
अश्मता *f* the state of being a stone
सुधा *f* Nectar. This is said to exist in heaven now-a-days

3 कण्टकिद्रुम *m* tree with thorns
स्फीत *a* grown largely

4 चकास्ति *P* shines
प्रथतेतराम् *A.* becomes highly famous
मूर्धन् *m* head
गल *n* Neck
पादपीठ Foot-stool

5 उत्तुङ्गता *f* Height
गरुडायते *A.* acts like गरुड

6 अहंकार *m* self-conceit
न *in.* विक्रीयन्ते *A.* are not sold
अन्तर *n* difference
आमोद *m* fragrance

8 सत्त्व *m* a thing or a living being
ज्योत्स्ना *f* Moon-light
वेश्मन् *n* house

9 अभिभावस्पद *n* an object to contemptuous treatment
भस्मचय *N. m* heap of ash

10 मर्दित *a* Rubbed
कस्तूरी *f* Musk
लशुन *m. n.* Garlic
सौरभ *n* fragrance

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सुभाषितावलिः—द्वितीयं दशकम्

खलः करोति दुर्वृत्तं नूनं फलति साधुषु ।
दशाननोऽहरत् सीतां बन्धनं तु महोदधेः ॥ १

निन्दां यः कुरुतेऽन्येषां तेन स्वं दूषयत्यसौ ।
खे भूतिं यस्त्यजेदुच्चैर्मूर्ध्नि तस्यैव सा पतेत् ॥ २

अहो दुर्जनसंसर्गान्मानहानिः पदे पदे ।
पावको लोहसङ्गेन मुद्गरैरभिहन्यते ॥ ३

सज्जनस्य संसर्गः कस्य नोन्नतिकारकः ।
रथ्याम्बु जाह्नवीसङ्गात् त्रिदशैरभिवन्द्यते ॥ ४

स्थिरा शैली गुणवता खलबुद्ध्या न बाध्यते ।
रत्नदीपस्य हि शिखा वात्ययाऽपि न शाम्यते ॥ ५

उपकर्तुं यथा स्वल्पः समर्थो न तथा महान् ।
प्रायः कूपस्तृषां हन्ति सततं न तु वारिधिः ॥ ६

विद्वानेव विजानाति विद्वज्जनपरिश्रमम् ।
न हि वन्ध्या विजानाति गुर्वीं प्रसववेदनाम् ॥ ७

यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम् ।
लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति ॥ ८

यस्य नास्ति विवेकस्तु केवलं यो बहुश्रुतः ।
न स जानाति शास्त्रार्थान् दर्वी पाकरसानिव ॥ ९

लक्ष्मीवन्तो न जानन्ति प्रायेण परवेदनाम् ।
शेषे भारभरक्लान्ते शेषो नारायणः सुखम् ॥ १०

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१) प्रश्नाः—१. नूनं फलति साधुषु किम्? कः सीतामहरत्? तेन कस्य किं जातम्? २. तेन स्वं दूषयत्यसौ' केन? 'मूर्ध्नि तस्यैव सा पतेत्' का? कस्य? ३. 'मुद्गरैरभिहन्यते' का? ४. 'त्रिदशैरभिबन्धते' किम्? ५. 'खलबुद्ध्या न बाध्यते' का? ६. समर्थो न तथा महान्' किं कर्तुम्? ७. 'विद्वानेव विजानाति' किम्? ८. शास्त्रं तस्य करोति किम्' कस्य? ९. 'न स जानाति शास्त्रार्थान्' कः? १०. 'शेते नारायणः सुखम्' कुत्र? तेन किं ज्ञायते?

२) प्रयोगं विपरिणमयत—

१) खे भूतिं यस्त्यजेदुच्चैर्मूर्ध्नि तस्यैव सा पतेत्।
२) पावको लोहसङ्गेन मुद्गरैरभिहन्यते।
३) रथ्याम्बु जाह्नवीसङ्गात् त्रिदशैरभिवन्द्यते॥

३) शतृप्रत्ययान्तैः पदैः वाक्यानि पूरयत—

१) परवेदनां (न ज्ञा)...नारायणो धाराभरक्रान्ते शेषे शेते।
२) दुर्जनः सह संसर्गं (कृ) ...जनो मानहानिं प्राप्नोति।
३) कूपो जनानां तृषां (नि+हन्)...वारिधिमतिशेते॥

४) कृत्प्रत्ययान्ताः—

शी to sleep (शेते)=शयितः, शयितवान्, शयानः, अतिशय्यमानः, शयित्वा, अतिशय्य, शयितुम् शयितव्यम्, शयनीयम्।

डी to fly—(डयते)=डयितः डयितवान्, डयमानः—डयित्वा, उड्डीय, डयितुम्, डयितव्यम्, डयनीयम्॥

५) पर्यायाः—गर्वः ३—गर्वोऽभिमानोऽहङ्कारः।

मानः २—मानश्चित्तसमुन्नतिः।

अवमानः ९—अनादरः परिभवः परीभावः तिरस्क्रिया। रीढावमाननावज्ञावहेलनमसूक्षणम्॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

1 दुर्वृत्त *v* wicked, ill-mannered
2 भूति *f* Ashes
3 पावक *m* Fire
मुद्गर *m* hammer
4 रथ्याम्बु *n* the water of a road
त्रिदश *m* God
5 शैली *f* conduct
शिखा *N. f.* flame
वात्या *N. f.* whirl wind
6 स्वल्प *a* insignificant
तृषा *f* thirst
7 वन्ध्या *f* barren woman
गुर्वी *a. f.* great
8 दर्पण *m* mirror
9 बहुश्रुत *a* very learned
दर्वी *f* ladle, spoon
10 लक्ष्मीवत् *a* possessed of Lakshmi; also wealth.

सुभाषितावळिः—तृतीयं दशकम्

गुणवन्तः क्लिश्यन्ते प्रायेण भवन्ति निर्गुणाः सुखिनः।
बन्धनमायान्ति शुकाः यथेष्टसञ्चारिणः काकाः॥ १
अतिपरिचयादवज्ञा भवति विशिष्टेऽपि वस्तुनि प्रायः।
लोकः प्रयागवासी कूपस्नानं सदाऽऽचरति॥ २
साम्नैव यत्र सिद्धिर्न तत्र दण्डो बुधेन विनियोज्यः।
पित्ते यदि शर्करया शाम्यति कोऽर्थः पटोलेन॥ ३
नीचो वदति न कुरुते न वदति सुजनः करोत्येव।
शरदि न वर्षति गर्जति वर्षासु निस्स्वनो मेघः॥ ४
सुजनो न याति वैरं परहितनिरतो विनाशकालेऽपि।
छेदेऽपि चन्दनतरुः सुरभयति मुखं कुठारस्य॥ ५

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वनेऽपि सिंहा गजमांसभक्षिणो
बुभुक्षिता नैव तृणं चरन्ति।
एवं कुलीना व्यसनाभिभूताः
न नीचकर्माणि समाश्रयन्ति॥ ६

वरं दरिद्रः श्रुतिशास्त्रपारगो
न चापि मूर्खो बहुवित्तसंयुतः।
सुलोचना जीर्णपटाऽपि शोभते
न नेत्रहीना कनकैरलङ्कृता॥ ७

बोधितोऽपि बहुसूक्तिविस्तरैः
किं खलो जगति सज्जनो भवेत्।
स्नापितोऽपि बहुशो नदीजलै-
र्गर्दभः किमु हयो भवेत् क्वचित्?॥ ८

सम्पूर्णकुम्भो न करोति शब्द-
मर्धो घटो घोषमुपैति नित्यम्।
विद्वान् कुलीनो न करोति गर्व-
मल्पो जनो जल्पति साट्टहासम्॥ ९

क्षारं जलं वारिमुचः पिबन्ति
तदेव कृत्वा मधुरं वमन्ति।
सन्तस्तथा दुर्जनदुर्वचांसि
पीत्वा च सूक्तानि समुद्गिरन्ति॥ १०

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

६) प्रश्नाः—१. गुणवन्तो निर्गुणाश्च कीदृशा वर्तन्ते? २. अति-परिचय दवज्ञा' इमामुक्तिं दृष्टान्तेन समर्थयत? ३. न तत्र दण्डो बुधेन विनियोज्यः' कुत्र? ४. नीचसुजनयोः स्वभावः कीदृशः? ५. 'सुरभयति मुखं कुशरस्य' कः? ६. 'न नीच-कर्मणि समाश्रयन्ति' के? ७ 'वरं दरिद्रः श्रुतिशास्त्रतत्परो न चापि मूर्खो बहुरत्नसंयुतः' कोऽत्र दृष्टान्तः? ८. स्नापि-तोऽपि बहुशो नदीजलैः गर्दभः किमु हयो भवेत् क्वचित्' इमं दृष्टान्तिकं योजयत। ९. कुलीनस्य दरिद्रस्य च को विशेषः? १०. 'पीत्वा च सूक्तानि समुद्विरन्ति' के? के इव?

२) प्रयोगं विपरिणमयत—

१) प्रयागवासी लोकः सदा कुरस्नानमाचरति।
२) कुलीनाः दरिद्रतयाभिभूताः नीचकर्मणि न समाश्रयन्ति।
३) संन्तो दुर्जनानां दुर्वचांसि पीत्वा सूक्तानि समुद्विरन्ति॥

३) यथानुक्रमं कृत्याप्रत्ययान्तानि रूपाणि निर्देश्य वाक्यानि घटयत—

१) नीचो वदति न कुरुते न वदति सुजनः करोत्येव।
२) खलः परेषां निन्दां कुरुते तेनात्मानं दूषयति च।
३) जनाः काशीं गच्छन्ति गङ्गायां स्नान्ति विश्वनाथमर्चन्ति च।
४) रामः पितुराज्ञां शिरसोवाह वनं च जगाम॥

४) 'लोट्' रूपैः वाक्यानि पूरयित्वा श्लोकं पठत—

तृष्णां छिद्...भजू...क्षमां हन्...मदं मा धा...पापे मनः
सत्यं ब्रू...मनुया...साधुपदवीं सेवू...विद्वज्जनान्।
मान्यान् मान्...विद्विषोऽप्यनुनो...प्रच्छाद्...स्वान् गुणान्
कीर्तिं पाल्...दुःखिते कु...दयामेतत्सतां लक्षणम्॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

५) नामधातुः—सुरभिं करोति = सुरभयति। एवं मलिनयति, उष्णयति, शीतयति, दीर्घयति—इत्यादिकं भवति॥

६) पर्यायाः—

चन्दनः ४—गन्धसारो मलयजो भद्रश्रीश्चन्दनोऽस्त्रियाम्।

मेघः २५—अभ्रं मेघो वारिवाहः स्तनयित्नुर्बलाहकः।
धराधरो जलधरः तडित्वान् वारिदोऽम्बुदः।
घनजीमूतमुदिर जलमुग्धूमयोनयः।

---

1 बन्धन *n* bondage
2 अवज्ञा *f* disrespect
3 सामन् *n* pacific measure
सिद्धि *f* complete attainment
पित्त *n* bile
शर्करा *f* candied sugar
पटोल *m* a species of cucumber
4 शरद् *f* the autumn
निःस्वन *a* noiseless
5 चन्दनतरु *m* sandal tree
सुरभयति *P.* makes odorous
6 कुलीन *a* Born of a noble family
व्यसन *n* distress
7 सुलोचना *f* beautiful eyed
कनक *n* gold ornament
8 गर्दभ *m* ass
हय *m* horse
9 सम्पूर्णकुम्भ *m* full pot
घोष *m* loud noise
साट्टहासं *in.* with a loud laughter
10 क्षार *a* saline
वारिमुच् *m* cloud
सूक्त *n* good speech.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पर्यायपदानां वर्णानुक्रमणिका

पर्यायसंख्या	नामानि	पृष्ठम्	पर्यायसंख्या	नामानि	पृष्ठम्
4	अगस्त्यः	19	12	नदी	62
3	अज्ञानम्	102	6	नयनम्	3
4	अतिथिः	80	5	नित्यः	107
9	अवमानः	112	2	निदानम्	110
10	असुरः	49	27	पक्षी	23
16	आकाशः	71	17	पद्मम्	16
4	आपणः	56	6	पर्णम्	11
3	आहारः	58	3	पर्कटी	80
5	इन्द्राणी	19	2	पुरोहितः	71
5	उदरम्	58	5	पुष्पम्	19
4	उष्ट्रः	46	6	प्रभातम्	76
5	कदली	39	2	प्राणाः	13
1	कवलः	58	22	बुद्धः	91
3	कारणम्	110	14	बुद्धिः	35
8	गङ्गा	102	6	बृहत्	110
3	गर्भः	112	6	भाग्यम्	68
5	गुरुः	29	4	मकरन्दः	52
4	चन्दनः	116	1	मत्सरः	32
3	तीक्ष्णम्	107	3	मधु	52
4	दिनान्तः	76	9	मधुकरः	52
8	दैवज्ञः	26	2	मानः	112
5	नगरम्	56	5	मार्जारः	80

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पर्यायसंख्या	नामानि	पृष्ठम्	पर्यायसंख्या	नामानि	पृष्ठम्
2	मृगतृष्णा	107	22	विद्वान्	95
15	मेघः	116	5	शिष्यः	29
5	मेरुः	68	4	शोणा	102
8	मोक्षः	102	6	सखा	76
2	यजमानः	71	6	सज्जनः	87
7	यशः	29	6	सदृशः	87
7	यज्ञः	71	26	सर्पः	19
5	यानम्	66	15	समुद्रः	62
4	रसातलम्	68	12	सुन्दरभू	56
1	राजहंसः	43	4	संवत्	84
3	लोभः	32	6	संवत्सरः	11
6	लोभी	32	4	सर्वतः	66
11	वक्रम्	98	6	सिंहः	7
3	वटः	80	4	हंसः	43
6	वस्त्रम्	98	7	हिमम्	84
9	वानरः	26			

आहत्य पर्यायपदानि—75

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कृत्प्रत्ययान्तानां धातूनां वर्णानुक्रमणिका

धातुः	पृष्ठम्	धातुः	पृष्ठम्	धातुः	पृष्ठम्
अश्	43	ध्यै	101	लभ्	65
आप्	67	नम्	49	लिप्	55
इ	94	नी	65	लिह्	52
कृ	13	पच्	39	लुप्	86
कृष्	26	पद्	81	वस्	55
कॄ	62	पा	11	वह्	46
क्षिप्	19	पिष्	26	विश्	22
क्षुध्	71	पू	102	वृ	84
गाह्	83	प्री	32	व्यध्	71
ग्रह्	11	बन्ध्	29	शप्	19
चक्ष्	42	बुध्	22	शी	112
चि	80	भज्	58	श्रि	49
जि	3	भुज्	58	श्रु	3
ज्ञा	3	भृ	102	सच्	16
डी	112	मन्	19	सृ	49
तप्	86	मुच्	16	स्तृ	49
तुष्	32	मृ	13	स्वप्	67
तॄ	62	या	109	हन्	19
त्यज्	58	युज्	58	हनु	95
दा	76	रुध्	29	क्षिप्	19
धा	76	रुह्	46	ज्ञा	3

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

उपसर्गयोगेन भिन्नार्थकानां धातूनाम् अनुक्रमणिका॥

धातुः	पृष्ठम्	उपसर्गाः
अय्	16	उत्, परा
आप्	49	अव, सम्, प्र, वि
आस्	98	अधि, अनु, उप, उत्
इ	29	अति, अधि, अनु, उप, अभि, अव, प्रति, वि, अप, सम्
ईक्ष्	39	अप, अव, उप, परि, प्र, प्रति, वि, सम्
कल्	84	आ, वि, सम्
कम्पू	31	अनु
ग्रह्	7	अनु, नि, परि, प्रति, वि, सम्
चक्ष्	71	आ, प्रत्या, व्या
चर्	42	प्र, वि, सम्
चि	51	निस्, परि, वि, सम्
जि	87	परा. वि
ज्ञा	29	आ, वि, अनु
तृ	61	अव, वि, उत्, निस्
दा	75	आ, उप
धा	75	अति, सम्, अपि, (पि) अभि. अव, नि, परि, सम्
पद्	16	आ, उत्, उप, निर्, प्र, प्रति, वि, विप्रति, सम्
पाद्	82	आ, उत्, उप, निस्, प्रति, सम्, आ
बन्धू	65	अनु, उत्, निर्, प्रति, सं, आ
भा	13	प्रति, वि, अनु
मज्ज्	61	उत्, प्र

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

धातुः	पृष्ठम्	उपसर्गाः
मद्	51	उत्, प्र
मा	10	अनु, निर्, परि, प्र
युज्	10	अनु, अभि, उत्, उप, नि, प्र, वि, विनि, सम्
रुध्	84	अनु, अव, उप, नि, वि
लभ्	42	आ, उप, उपा, विप्र
लम्ब्	68	अव, आ, वि
वह्	13	आ, उत्, निर्, प्र, वि
विश	23	आ, उप, निर्, प्र, सम्
वृ	23	आ, अप, अपा, वि, सम्
शी	7	अति, अनु, आ, वि, सम्
श्वस्	49	आ, निस्, वि
सद्	31	आ, उत्, उप, नि, प्र, वि, प्रत्या
सृ	49	अनु, आ, उप, निः, परि, प्र
स्मृ	71	वि, सम्

उपसर्गयोगात् आत्मनेपदि धातूनाम् अनुक्रमणिका ॥

क्री	109	वि, परि, अव
क्रम्	26	उप, प्र
वद्	80	वि
स्था	29	सम्
स्था	106	आ, सम्, अव, प्र, वि, उप

उपसर्गयोगात् परस्मैपदि धातूनाम् अनुक्रमणिका ॥

वह्	102	प्र

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Sanskrit Participles with English equivalents and Examples

---

1. Past Passive Participle	कर्मणिक्त प्रत्ययः	Ex. जितः
2. Past Active Participle	क्तवतु प्रत्ययः	... जितवान्
3 Present Active Participle	शतृ प्रत्ययः	... जयन्
4. Present Passive Participle	शानच् प्रत्ययः	... जीयमानः
5. Indeclinable Past Participle (without Preposition)	क्त्वा प्रत्ययः	... जित्वा
6. Indeclinable Past Participle (with Preposition)	ल्यप् प्रत्ययः	... विजित्य
7. Infinitive of Purpose	तुमुन् प्रत्ययः	.... जेतुम्
8. Potential Passive Participle	1 तव्य प्रत्ययः 2 य प्रत्ययः 3 अनीय प्रत्ययः	जेतुम् जेयम् जयनीयम्

Note:—(1) Words having 1 to 4 and 8th Participles are Adjectives (विशेषण शब्दः)

(2) Words having 5th, 6th and 7th Participles are indeclinables (अव्ययाः)

शुभं भूयात्। समस्तसम्मङ्गळानि सन्तु॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

SANSKRIT STUDY MADE EASY SERIES No. 4
Approved by The Text Book Committee

॥ संस्कृततृतीयादर्शः ॥

(SAMSKRITA TRITEEYADARSA)

READER III

PUBLISHED BY
R. S. VADHYAR & SONS,
BOOK-SELLERS & PUBLISHERS.
KALPATHI : : PALGHAT-678,003.
S. INDIA

1977

Rs. 3/-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

SANSKRIT STUDY MADE EASY SERIES

A Reformed Series of Four Illustrated Sanskrit Readers.

Infant Reader	संस्कृत बालादर्शः	33rd Edn.	2	00
Reader I	संस्कृत प्रथमादर्शः	19th Edn.	2	25
Reader II	संस्कृत द्वितीयादर्शः	11th Edn.	2	50
Reader III	संस्कृत तृतीयादर्शः	8th Edn.	3	00

Easy Texts on Sanskrit Grammar. संस्कृतव्याकरण ग्रन्थाः

शब्दमञ्जरी-तिङन्त-अव्यय-समासप्रकरण-शब्दार्थकोश सहिता.

The addition of an Interesting chapter on समासप्रकरण with Examples in श्लोकाs & वाक्याs is a Special Feature to this enlarged 15th Edition. 3 00

धातुरूपमञ्जरी-Deals with 495 most common roots with Sans. & Eng. meanings etc., 5th Edition. 4 00

संस्कृत व्याकरण प्रवेशिका—The First Book of its kind containing 47 Lessons dealing on Nouns, Gender, Verbs, Tenses, Parsing Analysis, etc., 2nd Edn. 2 00

Easy Texts on Sanskrit Poetry लघु काव्य ग्रन्थाः

श्रीरामोदन्तम्-with instructive Notes in Sans. &English 0 75

श्रीकृष्णविलासकाव्यम्— Canto 2. Do. 0 50

महात्मविजयः—with English Translation & Notes. 2 00

Sanskrit Copy Books—संस्कृत प्रतिलेखावलिः

These are suitably graded with selected **Maxims and Quotations.** In No. 1 Copy Book Diagram to correctly write the entire Sanskrit Alphabet is given.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof: Marrozi, HONOLULU, U S.A. writes:—

.....The Students here are making **good use of** the Copy Books and are **very appreciative of them**

No. 1	Bold	Hand	स्थूललिपिः	50 P.
No. 2	Medium	Hand	मध्यमलिपिः	50 P.
No. 3	Small	Hand	सूक्ष्मलिपिः	50 P.

Useful Text Books for College Students

Text in Sanskrit with English Translation, Exhaustive Notes, Model Questions etc.,
By T. K. RAMACHANDRA IYAR, M. A., B. O. L.,

BOOKS ON SANSKRIT PROSE

वालरामायणम्-वाल-अयोध्या-आरण्य काण्डाः—Part I A Simple Prose Version of Valmiki Ramayana retaining the Idioms of the original.	3	50
Do किष्किन्धा-सुन्दर-युद्धकाण्डाः Part II	5	00
चन्द्रापीडचरितम्-The Story of Bana Bhatta's Kadambari Concisely written in his own words	5	00
English Translation & Notes on Harsha Charita Sangraha-Uchvasas 4 & 5 (Without Text)	4	00
A Short History of Sanskrit Literature (covering the whole range of vedic, Sutra and classical Periods)	8	00
वैदिकसाहित्यचरित्रम्—In Sanskrit By P.P.S. Sastry	6	00

Excercises in Sanskrit Translation—with guidelines for Translation from Sans. to Eng. & vice versa In Press.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

USEFUL TEXT BOOKS FOR COLLEGE STUDENTS

Text in Sanskrit with English Translation, Exhaustive Note, Model Questions etc.,

By T. K. RAMACHANDRA IYER, M. A., B.O.L.,

BOOKS ON SANSKRIT POETRY

रघुवंशमहाकाव्यम्—		
(दिलीपस्य वसिष्ठाश्रमगमनं नाम प्रथमः सर्गः)	4	00
Do दिलीपस्य नन्दिनी वरप्रदानं नाम द्वितीयः सर्गः	2	00
Do रघुदिग्विजयो नाम चतुर्थः सर्गः	4	00
Do दण्डकाप्रत्यागमनं नाम त्रयोदशः सर्गः	4	00
नलोपाख्यानम् (श्रीमन्महाभारते वनपर्वणि अध्यायाः ५०—५४ (Damayanti Swayamvaram)	3	00
शिशुपालवधे मन्त्रवर्णनं नाम द्वितीयः सर्गः	3	50

BOOKS ON SANSKRIT DRAMA

दूतवाक्यम् of Bhasa	4	00
कर्णभारम् Do	4	00

ALANKARA

कुवलयानन्दः—श्रीमदप्पय्यदीक्षित विरचितः (वृत्तिरहितः) 50 selected Alankaras with the commentary "Samanvaya" in Sanskrit & English	5	00

For further particulars, please apply to:—

R. S. VADHYAR & SONS,
Book-Sellers & Publishers,
KALPATHI :: PALGHAT-678003.
S. INDIA

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

॥ संस्कृततृतीयादर्शः ॥

(SAMSKRITA TRITEEYADARSA)

READER III

BY

Vidyasagar K. L. V. SASTRI,

Mahopadhyaya, Siromani, Sahityanipuna, Vidyalankara etc.,

Retired Senior Sanskrit Pandit

THE PRESIDENCY COLLEGE, MADRAS

Revised Eighth Edition.

ALL RIGHTS RESERVED.

PUBLISHED BY

R. S. VADHYAR & SONS,

Book-Sellers & Publishers

KALPATHI :: PALGHAT-678003

S. INDIA

1977

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

॥ भारतदेशीयगीतम् ॥

जन गण मन अधिनायक जय हे
भारत-भाग्यविधाता।
पंजाब सिन्धु गुजरात मराठा
द्राविड उत्कल वंगा॥
विन्ध्य हिमाचल यमुना गंगा
उच्छल जलधि तरंगा।
तव शुभ नामे जागे
तव शुभ आशिष मागे
गाहे तव जय गाथा॥
जनगण मंगलदायक जय हे!
भारत-भाग्य विधाता।
जय हे! जय हे! जय हे!
जय! जय! जय! जय हे॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

INDIAN NATIONAL ANTHEM

Thou art the ruler of the minds
of all People,

Thou Dispenser of India's Destiny.

Thy name rouses the hearts of the Punjab,
Sind, Gujarat and Maratha,
of Dravid, Orissa and Bengal.

It echoes in the hills of the Vindhyas and
Himalayas,
mingles in the music of Jamuna and
Ganges,
and is chanted by the waves of the
Indian Sea.

They pray for Thy Blessings
and sing Thy Praise,

The Saving of all People waits in Thy
hands.
Thou Dispenser of India's Destiny,
Victory! Victory! Victory to Thee!

This Stanza composed by Sree Rabindranath Tagore has been adopted by the Indian Constitution as the National anthem of India, on 24th January, 1950.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अनुक्रमणिका—CONTENTS

पाठः			पृष्ठम्
	भारतदेशीयगीतम्		ii
	Do. English Translation		iii
१.	सरस्वती प्रार्थना	(पद्यपाठः)	१
२.	सगरमहाराजः		६
३.	राजर्षिः भगीरथः		११
४.	हरिणाः		१६
५.	बिडालः क्रोष्टा च	(पद्यपाठः)	१९
६.	श्रीकण्ठः शितिकण्ठश्च		२२
७	काष्ठविक्रेता कुठारश्च		२७
८.	अपरिचित सौहार्दे दोषः		३०
९	महाकवि कालिदासस्य सूक्तयः	(पद्यपाठः)	३५
१०.	पत्रिकालेखनम्		३८
११.	अयः		४३
१२.	मैत्री	(पद्यपाठः)	४६
१३.	गुरुभक्तिमहिमा		४९
१४.	कालिदासस्य गुरुः—प्रथमो भागः		५४
१५.	,, —द्वितीयो भागः		५९

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पाठः			पृष्ठम्
१६.	क्षेत्रकर्षणम्		६३
१७.	धनप्रशंसा	(पद्यपाठः)	६६
१८.	कविकौशलम्		६९
१९.	पातिव्रत्यवैभवम्		७२
२०.	अशोक महाराजः		७७
२१.	गुरुभक्तकेसरी एकलव्यः		८१
२२.	महाकवि भवभूतेः सूक्तयः	(पद्यपाठः)	७५
२३.	जीर्णधनश्रेष्ठिनोः कथा		८८
२४.	आस्तिकनास्तिकयोः संभाषणम्		९२
२५.	राजा कविश्च	(पद्यपाठः)	९९
२६.	शरणागतरक्षणम्		१०२
२७.	भारतवर्षम्		१०७
२८.	पद्यमाला—प्रथमा पत्रिका		११३
२९.	,, द्वितीया पत्रिका		११५
३०.	,, तृतीया पत्रिका		११७
३१.	,, चतुर्थी पत्रिका		११९
३२.	,, पञ्चमी पत्रिका		१२२
३३.	,, षष्ठी पत्रिका		१२४
३४.	कृत्प्रत्ययान्तानाम् अनुक्रमणिका		१२७
३५.	पर्यायपदानाम् अनुक्रमणिका		१२८

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Sanskrit Study Made Easy Series

A Reformed Series of Four Illustrated Sanskrit Readers.
With Grammatical Conversational Exercises,
Glossary etc.,
For a Pleasant & Quick Study of Sanskrit

Most widely used throughout India and Foreign Countries
Viz : Ceylon, Siam, Bangkok, Germany, Italy, Australia,
California, San Francisco etc.,

AND SELECTED BY THE EMBASSY OF INDIA

and The Ministry of Education and Scientific Research of Govt. of India for Presentation to Foreign Students of Sanskrit.

PRINTED AT
BHARATHI VIJAYAM PRESS,
MADRAS-5

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीरामजयम् ॥

॥ विद्यया विन्दते अमृतम् ॥

॥ संस्कृततृतीयादर्शः ॥

१. सरस्वती प्रार्थना

शारदा शारदाम्भोजवदना वदनाम्बुजे ।
सर्वदा सर्वदाऽस्माकं सन्निधिं सन्निधिं क्रियात् ॥ १

सुरासुरासेवितपादपङ्कजा करे विराजत्कमनीयपुस्तका ।
विरिञ्चिपत्नी कमलासनस्थिता सरस्वती नृत्यतु वाचि मे सदा ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

माणिक्यवीणामुपलालयन्तीं
मदालसां मञ्जुलवाग्विलासाम् ।
माहेन्द्रनीलद्युतिकोमलाङ्गीं
मातङ्गकन्यां मनसा स्मरामि ॥ ३

श्रीमच्चन्दनचर्चितोज्ज्वलवपुः शुक्लाम्बरा मल्लिका-
मालालालितकुन्तला प्रविलसन्मुक्तावलीशोभिता ।
सर्वज्ञाननिधानपुस्तकधरा रुद्राक्षमालाङ्किता
वाग्देवी वदनाम्बुजे वसतु मे त्रैलोक्यमाता शुभा ॥ ४

या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता
या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना ।
या ब्रह्माच्युतशङ्करप्रभृतिभिर्देवैः सदा पूजिता
सा मां पातु सरस्वती भगवती निश्शेषजाड्यापहा ॥ ५

दोर्भिर्युक्ता चतुर्भिः स्फटिकमणिमयीमक्षमालां दधाना
हस्तेनैकेन पद्मं सितमपि च शुकं पुस्तकं चापरेण ।
भासा कुन्देन्दुशङ्खस्फाटिकमणिनिभा भासमानाऽसमाना
सा मे वाग्देवतेयं निवसतु वदने सर्वदा सुप्रसन्ना ॥ ६

---

१) प्रश्नाः—१. सरस्वत्याः वदनं पादपङ्कजं च कीदृशे ?
२. सरस्वत्याः स्वरूपं महिमानं च स्ववाक्यैः संक्षिप्य वर्णयत ३. सा चतुर्भिर्दोर्भिः कानि वस्तूनि धरति ?

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२) प्रयोगं विपरिणमयत—

१. विरिञ्चिपत्नी सरस्वती सदा मे वाचि नृत्यतु।

२. त्रैलोक्यमाता वाग्देवी मम वदनाम्बुजे वसतु।

३. निःशेषजाडयापहा भगवती सरस्वती मां पातु।

३) निर्दिष्टानां धातूनां शत्रन्तैः शानजन्तैर्वा (Present Participles) रूपैः वाक्यानि पूरयत—

१. सरस्वती माणिक्यवीणां (वाद्)...गायति।

२. वाग्देवता मे निःशेषं जाडयं (अपहन्)...वाचि नृत्यतु।

३. अनुपमया भासा (भास्)...सरस्वती मे जिह्वायां वसतु॥

४) तत्पुरुषसमासः—

विग्रहवाक्यम्		समासः
१. मदेन अलसा	=	मदालसा।
२. विरिञ्चेः पत्नी।	=	विरिञ्चिपत्नी।
३. वाचः देवता	=	वाग्देवता॥

५) कृत् प्रत्ययान्ताः (Verbal Derivatives)—

स्मृ to remember = (स्मरति) स्मृतः, स्मृतवान्, स्मरन्, स्मर्यमाणः, स्मृत्वा, विस्मृत्य, स्मर्तुम्, स्मरणीयम्, स्मर्तव्यम्॥

६) पर्यायाः—

सरस्वती ७—ब्राह्मी गीर्भारती वाणी शारदा वाक् सरस्वती।

वचः ६—व्याहार उक्तिर्लपितं भाषितं वचनं वचः।

वीणा ३—विपञ्ची वल्लकी वीणा॥

शारदा *f* the goddess of learning

शारद *a* autumnal

अम्भोज, अम्बुज } *n* a lotus

सर्वदा *in.* always

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सर्वदा *a. f.* bestower of all desired objects

सन्निधि *m.* a great treasure

सन्निधि *m.* presence

आसेवित *p p p.* attended on all sides

पादपङ्कज *n* the lotus-feet

विरिञ्चि } *m* ब्रह्मन्
विरिञ्च }

माणिक्यवीणा *f.* a ruby-[lute

उपलालयन्ती *pr. a. p.* playing on

मञ्जुल *a.* agreeable

माहेन्द्रनील *n* an emerald

द्युति *f.* lustre

चन्दनचर्चित *a.* besmeared with sandal paste

कुन्तल *m.* hair of head

तुषार *m.* snow

जाड्यापहा *a. f.* she who wards off dullness

सित *a.* white

भासमाना *a. f.* shining

असमाना *a. f.* matchless.

ABBREVIATIONS USED

N. Noun विशेष्यम्

a. Adjective विशेषणम् (can be used in 3 genders)

m. Masculine पुंलिङ्गम्

f. Feminine स्त्रीलिङ्गम्

n. Neuter नपुंसकलिङ्गम्

P. Parasmaipadi परस्मैपदी

A. Atmanepadi आत्मनेपदी

U. Ubhayapadi उभयपदी

in. Indeclinable अव्ययम्

ppp. Past Passive Participle क्तप्रत्ययान्तः

p. a. p. Past Active-Participle क्तवतुप्रत्ययान्तः

pr. a. p. Present Active Participle शतृप्रत्ययान्तः or शानच् प्रत्ययान्तः

pr. p. p. Present Passive Potential कर्मणि शानच् प्रत्ययान्तः

pt. p. Potential participle कृत्यप्रत्ययान्तः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

कृदन्ताः- Verbal Derivatives-(Ex: Root - कृ to do)

Name of Participle	Root with affix	Derivative	Meaning
1. Past Passive	(कृ + त)	कृतः	has been done
2. Past Active	(कृ + तवत्)	कृतवान्	has done
3. Present Active	(कृ + अत्)	कुर्वन्	Is doing
4. Present Passive	(कृ + यमानः)	क्रियमाणः	Is being done
5. Indeclinable Past (without Preposition)	(कृ + त्वा)	कृत्वा	having done
6. Do (with Preposition)	(उप + कृ + य)	उपकृत्य	having helped
7. Infenitive of Purpose	(कृ + तुं)	कर्तुं	to do
8. Potential	{कृ + तव्यः / अनीय or य}	{कर्तव्यम् / करणीयम् or कार्यम्}	has to do

Note:—1 to 4 and 8 are declinables and can be used in all 3 Genders.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

२. सगरमहाराजः

अयोध्याधिपतिः शूरः पूर्वमासीन्नराधिपः।
सगरो नाम धर्मात्मा प्रजाकामः स चाप्रजाः॥
—श्रीमद्वाल्मीकिरामायणे बालकाण्डे सर्गः ३८—१

आसीदयोध्यायां सूर्यवंशीयः धर्मात्मा शूरः सगरो नाम महाराजः, यः खलु सागराम्बरां विश्वम्भरां प्रीत्या शासत् प्रजानामनुरागस्य पात्रतामगमत्। तस्य केशिनी सुमतिश्चेति द्वे भार्ये अभूताम्। तयोः केशिन्यामसमञ्जाख्य एकः पुत्रः समजनि। सुमतिस्त्वेकं गर्भपिण्डमसोष्ट। विदारिते च तस्मिन् पिण्डे षष्टिसहस्राणि पुत्रास्ततो विनिस्सृताः। ते सर्वे शस्त्रविद्यायामश्वारोहणे त्रय्यामान्वीक्षिक्यां वार्तायां दण्डनीतौ च परं प्रावीण्यमुपगताः। कालेन रूपयौवनशालिनः समवर्धन्त॥

तत्र यः केशिन्यास्तनयोऽसमञ्जः स दुर्मतिर्दुराचारः प्रजानामहितश्च सन्नसमञ्जसः एवासीत्। अतः स पित्रा राज्यान्निष्कासितः। अंशुमान् नाम तस्यात्मजस्तु साधुवृत्तः सुधांशुरिव प्रमोदं जनयन् जनतायाः प्रीतिपात्रमभूत॥

धीरैः शूरैश्च बहुसङ्ख्यैः पुत्रैः परिवृतः स राजा परमानन्दमविन्दत। एकदा स महाराजो महता विभवेन शतं यज्ञान् कर्तुमुपाक्रमत। निर्वर्तितास्तेन निर्विघ्नमेकोनशतं यागाः। आरब्धे च शततमे मखे 'सगरोऽयं शतमखो भूत्वा स्वकीय

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पदमपहरिष्यति' इति भिया वासवः सद्य एव रक्षोरूपेणागत्य यज्ञियमश्वं हठादाकृष्य रसातलमनैषीत् ॥

तेन पर्याकुलः सगरस्तद्गवेषणाय षष्टिसहस्राणि पुत्रानादिक्षत्। ते च भुवं परिभ्रम्य तुरगमलभमानाः पातालं प्रविविक्षवः क्षितिमखानिषुः। सगरतनयैः खातानि गर्तान्येव सम्प्रति सागरत्वेन प्रथन्ते ॥

तेनैव मार्गेण सगरपुत्राः पातालं प्रविश्य तत्र घोरे तपसि वर्तमानस्य महर्षेः कपिलस्यान्तिके चरन्तं स्वीयं यज्ञाश्वमद्राक्षुः। दृष्ट्वा चायमेवास्माकमश्वस्य हर्तेति भाषमाणास्ते खनित्राणि लाङ्गलानि च दधतस्तमभ्यधावन्। तदवलोक्य क्रुद्धो महर्षिस्तान् शापाग्निना भस्मसादकार्षीत् ॥

ततः स्वतनयांश्चिरमनागतान् वीक्ष्य विषण्णो नरपतिस्तेषामन्वेषणाय नप्तारमंशुमन्तं प्राहिणोत्। स च भुवं परिभ्रम्य पातालं प्रविष्टः पथि गच्छन् यदृच्छया सगरतनयानां मातुलं खगेन्द्रमद्राक्षीत्। अप्राक्षीच्च तं तेषां वृत्तान्तम्। कपिलेन भस्मीकृतान् सगरसुतान् यज्ञियमश्वं च खगेन्द्रस्तस्मै दर्शयामास ॥

तदवलोक्य शोकाकुलं पितृव्याणां तर्पणाय सलिलमन्वेष्टुं प्रवृत्तमंशुमन्तं सुपर्णोऽभ्यधात्-'वत्स! कपिलरूपेणावतीर्णस्य भगवत एवायं व्यापारः। नात्र शोकः कार्यः। अपि चैतेषां

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

लौकिकेनाम्भसा तर्पणं न युक्तम्। या खलु हिमवतो ज्येष्ठा पुत्री गङ्गा नाम तस्याः क्षितिमानीतायाः सलिलेन तर्पणीया एते महात्मानः। अतस्तुरङ्गममानीय निवर्तस्व' इति॥

तन्निशम्यांशुमांस्तुरगमानीय सगरायार्पयित्वा पितृव्याणां वृत्तान्तं खगेश्वरस्य वचनं च तस्मै व्यजिज्ञपत्। सगरश्च तच्छ्रुत्वा शोकापन्नोऽप्यारब्धं यज्ञं परिसमाप्य गङ्गाया आनयने परं यत्नमाधात्। परं तु स भग्नोद्यमः परितप्यमानः कालेन दिवमरुक्षत्।

तदनु तद्वंशीयाः परमसाहसिका दिलीपादयो राजानः सुरधुनीं भुवमवतारयितुं यावज्जीवं प्रायतिषत। तेऽपि विफलोद्यमा अभूवन्॥

---

१) प्रश्नाः—१. सगरात्मजानामुत्पत्तिं वर्णयत। २. कस्य यज्ञियमश्वं कः किं निमित्तं रसातलमनैषीत्? ३. सगरात्मजास्तदन्वेषणाय किमकुर्वन्? ४. कः कस्य हेतोस्तान् भस्मसादकार्षीत्? ५. अंशुमान् कः? ६. तेन कथं यज्ञियोऽश्वः प्रत्यानीतः? ७. गङ्गायाः आनयनार्थं के यत्नमादधुः? ८. तेषां यत्नः कीदृशोऽभूत्?

२) असोष्ट, अजनि, अनैषीत्, अदिक्षत्, अद्राक्षुः, अप्राक्षीत्, अभ्यधात्, आरुक्षत्—एषां लटि लङि च रूपाणि निर्दिशत॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३) शत्रन्तैः रूपैः वाक्यानि पूरयत—

१. गुरवः शिष्यान् धर्मम् (अनुशास्)...सन्मार्गं नयन्ति।

२. बालिकाः पुस्तकानि (धा)...पाठालयं व्रजन्ति।

३. राजानः पुरा धरां (भृ)...प्रजा आनन्दयामासुः।

४. बालाः श्वभ्यो (भी)...सुदूरं पलायन्ते।

५. पक्षिणस्तण्डुलकणान् (दा)... स्वशावकान् पोषयन्ति॥

४) तत्पुरुषसमासः—

विग्रहवाक्यम्		समासः
१. शोकम् आपन्नः	=	शोकापन्नः।
२. शोकेन आकुलः	=	शोकाकुलः।
३. सगरस्य पुत्राः	=	सगरपुत्राः।
४. नगरे वासः	=	नगरवासः॥

५) पर्यायाः—

गरुडः १—गरुत्मान् गरुडस्तार्क्ष्यो वैनतेयः खगेश्वरः।
नागान्तको विष्णुरथः सुपर्णः पन्नगाशनः॥

६) कृत्प्रत्ययान्ताः—

१. शास् to Command = (शास्ति) शिष्टः, शिष्टवान्, शासत्, शिष्यमाणः, शिष्ट्वा, शासित्वा, आशास्य, शासितुम्, शासनीयम्, शासितव्यम्, शिष्यम्।

२. खन् to dig = (खनति) खातः, खातवान्, खनन्, खन्यमानः, खात्वा, खनित्वा, निखाय, खनितुम्, खननीयम्, खनितव्यम्, खेयम्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३. दिश् to grant = (दिशति) दिष्टः, दिष्टवान्, दिशन्, दिश्यमानः, दिष्ट्वा, आदिश्य, देष्टुम्, देशनीयम्, देष्टव्यम्, देश्यम् ॥

विश्वम्भरा *f* the earth
विदारित *ppp.* split open
शस्त्रविद्या *f* Science of arms
अश्वारोहण *n* horse-riding
त्रयी *f* the three Vedas —ऋक्, यजुस्, सामन्
अन्वीक्षिकी *f* तर्कशास्त्र Metaphysics
वार्ता *f* business, trade
दण्डनीति *f* administration of justice
प्रावीण्य *n* proficiency
असमञ्जस *a* unfit
निष्कासित *ppp.* expelled
साधुवृत्त *a* well conducted and also of round shape
पर्याकुल *a* perturbed
प्रविविक्षु *a* desirous of [entering
खात *ppp.* dug
गर्त *n* a pit
खनित्र *n* a spade
लाङ्गल *a* plough
खगेन्द्र *m* गरुड

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३. राजर्षिः भगीरथः

भगीरथस्तु राजर्षिः धार्मिको रघुनन्दन।
मन्त्रिष्वाधाय तद्राज्यं गङ्गावतरणे रतः॥
—श्रीमद्वाल्मीकिरामायणे बालकाण्डे सर्गः ४२—११

अथ गच्छति काले तस्मिन्नेव सूर्यवंशे भगीरथो नाम राजर्षिः जज्ञे। स च स्ववंशीयानां सगरात्मजानां वृत्तान्तेन नितान्तं सन्तप्तो राज्यधुरां सचिवेषु निक्षिप्य स्वयं गङ्गानयनाय चिरमूर्ध्वबाहुर्मासाहारश्च भूत्वा घोरं तपोऽतप्यत॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वर्षसहस्रान्ते च प्रीतो भगवान् पद्मयोनिस्तस्य पुरस्तादाविर्भूय—'राजन्! इक्ष्वाकुकुलभूषामणे! साहसिन्! प्रीतोऽस्मि। वरं वृणीष्व'—इत्यवोचत्। भगीरथश्च प्राञ्जलिर्भगवन्तमुपस्थाय—'भोः! करुणानिधे! परमेष्ठिन्! चिरात् खलु भस्मीभूता मे प्रपितामहा निरुदकाः क्लिश्यन्ते। तेषां च तर्पणाय यथा भगवतीं व्योमगङ्गां भुवमानेतुं प्रभवेयं तथा मामनुगृहाण'—इति प्रार्थयत॥

तच्छ्रुत्वा प्रीतः पद्मयोनिः—राजन्! फलिष्यति ते मनोरथः। किन्तु सुदुस्सहेन वेगेनावतरन्ती सा भुवं प्लावयिष्यति। तस्याश्च धारणाय न कश्चित् पशुपतेरन्यः क्षमते। तस्मात् तं शरणं व्रज'—इत्यावेद्यान्तर्हितः॥

ततो भगीरथः पशुपतेस्तोषणार्थं निराहारो भूत्वा अङ्गुष्ठाग्रेण तिष्ठन् तीव्रं तपस्तेपे। संवत्सरान्ते च तस्य तपसा प्रीतः शङ्करः प्रादुर्भूय—'राजन्! अलं तपसा शिरसा धारयिष्यामि शैलराजसुतामहम्'—इत्युक्त्वा तिरोदधे॥

इत्थं लब्धवरो भगीरथः पुष्करसरितं स्तुतिभिरुपातिष्ठत। तत्क्षणमेव मुखरयन्ती दिगन्तानि महती सरिदाकाशात् पशुपतेः शिरसि पपात। महावेगा सा तरसैव शिरसा गृहीत्वा परमेश्वरं रसातलं नेतुमुदयुङ्क्त। पशूनां पतिः कपर्दी क्रुद्धस्तां जटया बबन्ध। तथा बद्धा सा तत्रैव निश्चलाऽभूत्॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ततः पश्चाज्ज्यग्रमानसो भगीरथः पुनरपि तीव्रेण तपसा शङ्करमाराधयामास। तेन प्रीतो भगवान् जटाबद्धां गङ्गां शनैर्बिन्दुसरः प्रति विससर्ज। विसृष्टायास्तस्याः सप्तधा भिन्नायाः काचिदेका शाखा महारथं भगीरथमनुगच्छन्ती प्रोवाह। महता वेगेन प्रवहन्ती सा जह्नुमहर्षेःदीर्घसत्रमुपासीनस्य यज्ञवाटं प्लावयामास। स च कुपितस्तां चुलुकी चकार॥

अनन्तरं भगीरथो भग्नमनोरथोऽप्यारब्धस्य कर्मणः परित्यागमयुक्तमाकलयन् भूयोऽपि शान्तो दान्तश्च भूत्वा देवान् दध्यौ। तेन प्रीताः सुमनसो देवाः सद्यः समेत्य जह्नुमहर्षिमसान्त्वयन्। गङ्गां च जह्नुमहर्षेः पुत्रीस्थाने पर्यकल्पयन्। स तां श्रोत्राभ्यामुत्ससर्ज। अत एव गङ्गा 'जाह्नवी' इति व्यपदिश्यते॥

अथ गङ्गयाऽनुगतो भगीरथः पातालं प्रविश्य तत्र भस्मचयरूपेणावस्थितान् सगरात्मजान् गङ्गासलिलेन तर्पयित्वा दिवमारोपयन्। कृतार्थं चात्मानं मेने। तदनु गङ्गाऽपि 'भागीरथी' इति प्रथामवाप॥

भर्तृहरिः पुरुषश्रेष्ठानां धैर्यशीलादीन् गुणान् नीतिशतके इत्थं वर्णयति—

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्ननिहता विरमन्ति मध्याः।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारब्धमुत्तमजना न परित्यजन्ति।

(वसन्ततिलकावृत्त श्लोकः)

---

१) प्रश्नाः—१. भगीरथः कः? २. स गङ्गां भुवमानेतुं किमकरोत्? ३. स पद्मयोनिं कं वरं प्रार्थयत? ४. पद्मयोनिः किम् आवेदयत्? ५. कथं पशुपतिस्तेन तोषितः? ६. स तं किमब्रवीत्? ७. गङ्गा कुत्र कुतः केन निरुद्धाऽभूत्? ८. गङ्गायाः जाह्नवी इति, भागिरथी इति व्यपदेशौ कथं सिद्धौ? ९. अस्मिन् पाठे उपदेशं वर्णयत।

२) तत्पुरुषसमासः—

विग्रहवाक्यम	समासः	विग्रहवाक्यम्	समासः
१. जटायां बद्धा=जटाबद्धा।		३. भस्मनां चयः=भस्मचयः।	
१. पशूनां पतिः=पशुपतिः।		४. शैलानां राजा=शैलराजः।	

३) कर्मधारयसमासः—

विग्रहवाक्यम्		समासः
१. शुभ्रं च तत् वस्त्रं च	=	शुभ्रवस्त्रम्।
२. कृष्णश्चासौ सर्पश्च	=	कृष्णसर्पः।
३. कृष्णा चासौ मृगी च	=	कृष्णमृगी।
४. शाप एव अग्निः	=	शापाग्निः॥

४) जाह्नवी, भागीरथी—अनयोः विग्रहवाक्यं वदत॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

५) कृत्प्रत्ययान्ताः—

जन् (जा) to be born = (जायते) जातः, जातवान्, जायमानः, जनित्वा, संजन्य, जनितुम्, जननीयम्, जनितव्यम् ॥

६) पर्यायाः—

वंशः ९—सन्ततिर्गोत्रजनन कुलान्यभिजनान्वयौ
वंशोऽन्ववायः सन्तानः ॥

मनोरथः ११-इच्छा काङ्क्षा स्पृहेहा तृड्वाञ्छा लिप्सा मनोरथः॥
कामोऽभिलाषस्तर्षश्च सोऽस्यर्थे लालसा द्वयोः ॥

राज्यधुरा *f* the yoke of Government

ऊर्ध्वबाहु *a* raising the arms upwards

निरुदक *a* without libations of water

प्लावियिष्यति *P.* will wash

शैलराजसुता *f* गङ्गा [away

तिरोदधे *A.* disappeared

पुष्करसरित् *f* the celestial river

मुखरयन्ती *f* filling with noise

यज्ञवाट *m* यागशाला

महारथ *m* a great warrior

—It is thus defined:

एको दश सहस्राणि
योधयेद्यस्तु धन्विनाम्।
शस्त्रशास्त्रप्रवीणश्च
विज्ञेयः स महारथः॥

प्रोवाह *U.* flowed

चुलुकीचकार *U.* sipped

भस्मचय *m* a heap of ashes.

वृत्त—is a Stanza, the Metre of which is regulated by the number and position of Syllables in each पाद.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri



४. हरिणाः

हरिणाः केचिदश्वा इव प्रांशवः केचिदजा इव ह्रस्वाश्च। तेऽत्यन्तं भीरवः। तृणेऽपि चलति ते साध्वसेन सम्भ्रान्ताः पलायन्ते। हरिणाः प्रायेण शान्तेषु शाद्वलेषु च प्रदेशेषु निवसन्ति। ऋषय इमानाश्रमेष्वपत्यनिर्विशेषं पोषयन्ति॥

हरिणानां चरणाः कृशा असुन्दराश्च। अथापि ते शीघ्रतरं धावितुं शक्नुवन्ति। तेषां लोचने कर्णान्तविस्तृते।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

हरिणीनां शृङ्गाणि न विद्यन्ते। हरिणानां शृङ्गाणि तु बहुशाखानि मनोहराणि च। इत्थं हरिणाश्चारुरूपा मृगाः। ते कदाचिदात्मसौन्दर्येण दृप्ता भवन्ति। तथा हि—

एणः कश्चित् कदाचिज्जलं पिबन्नात्मनः प्रतिबिम्बं जले ददर्श। दृष्ट्वा च मनस्यचिन्तयत्—'अहो! कियच्चारवो मे शृङ्गशाखाः! कियत् रुचिरे मे नयने! कियत् कोमलानि मेऽङ्गानि! यदि मे चरणा अपि पीवराः सुन्दराश्चाभविष्यंस्तर्हि न मां कोऽपि रूपेण जगत्यजेष्यत्। धिग्विधातारं यो मे चरणानसुन्दरान् व्यधित'—इति॥

इत्थं विचिन्तयति तस्मिन्नकस्मात् कस्याप्यतिमहतः शबरसैन्यस्य कोलाहलध्वनिरश्रूयत। श्रुत्वा च तं हरिणः सहसा पलायत। पलायमानं तं दृष्ट्वा द्वित्राः शबरा अन्वधावन्। द्रुतं धावन् हरिणः सुदूरमतिचक्राम। किन्त्वतिद्रुतं पलायमानस्य तस्य बहुशाखं शृङ्गं कस्यचित् तरोरधश्शाखायां लग्नमभूत्। स च तस्मादात्मानं मोचयितुं नाशकत्। पश्चाद्धावन्तः शबरास्तं शाखाबद्धमवलोक्य सामोदमुपजग्मुः॥

तान् दृष्ट्वा हरिणः सुतरामुद्विग्नो मनस्येवमचिन्तयत्—'अहो! बत! विधातुरविमृश्यकारिता यो मे शृङ्गं बहुशाखमस्राक्षीत्। हन्त! यन्मया सुन्दरत्वेन गृहीतं तदिदानीमसुन्दरं जातम्। यदि शृङ्गाणि नाभविष्यंस्तर्ह्यसुन्दरा अपि

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मे चरणाः सम्प्रति मामरक्षिष्यन्'—इति। इत्थमालोचयन्नेव स हरिणः शबरैर्गृहीतो व्यापादितश्च ॥

तस्मात् यत् कार्यकारि तदेव सौन्दर्यमस्माभिरभिलषणीयम्। कार्यविघातकं तु सौन्दर्यमस्माकं विनाशायैव भवति॥

---

१) प्रश्नाः—१. हरिणाः कीदृशा मृगाः? २. केन ते दृष्टा भवन्ति? ३. जलं पिबन्नेणः स्वस्य प्रतिबिम्बं जले दृष्ट्वा किमचिन्तयत्? ४. तथा चिन्तयति तस्मिन् किं सम्भूतम्?
५. शबरान् दृष्ट्वा हरिणः किमचिन्तयत्?
६. ततः किं जातम्?

२. क्तप्रत्ययान्तैः पदैः वाक्यानि पूरयत—
१. भगवती वाग्देवता मयि (प्रसाद्)...भवतु।
२. सगरेण यथाविधि शततमो यागः (समारभ्)...।
३. हनूमताऽशोकवने सर्वे पादपाः (भञ्ज्)...।
४. आकाशात् पतिता गङ्गा सप्तधा (भिद्)...प्राबहत्॥

३) नञ् बहुव्रीहिः—

विग्रहवाक्यम्	समासः
१. न विद्यते तटं येषां ते =	अतटाः।
२. न विद्यते पुत्रः यस्य सः =	अपुत्रः।
३. न विद्यते पापं यस्य सः =	अपापः॥

४) पर्यायाः—
हरिणः ५—मृगे कुरङ्गवातायु हरिणाजिनयोनयः।
सुन्दरं १२—सुन्दरं रुचिरं चारु सुषमं साधु शोभनम्।
कान्तं मनोरमं रुच्यमनोज्ञं मञ्जु मञ्जुलम्॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

हरिण, एण *m* a deer
साध्वस *n* fear
सम्भ्रान्त *a* perplexed
शाद्वल *a* grassy
दृप्त *a* puffed up, proud
शबर *m* hunter
लग्न *a* held fast
उद्विग्न *a* being trembled
अविमृश्यकारिता *N. f.* the state of doing things inconsiderately
व्यापादित *ppp.* was slain
कार्यकारिन् *a* efficacious

---

५. बिडालः क्रोष्टा च

कश्चिद्बिडालः क्रोष्टा च मैत्रीं कृत्वा परस्परम् ।
एकदा पर्वसमये सेतुस्नानाय जग्मतुः ॥ १

वनमार्गेण गच्छन्तौ घर्मतप्तकलेवरौ ।
क्वचिच्छायामुपाश्रित्य सुस्थौ सँल्लेपतुर्मिथः ॥ २

क्रोष्टा बिडालमब्रूत सखे ! वनमिदं खलु ।
यदि व्याधः समागच्छेत् त्वयाऽत्मा रक्ष्यते कथम् ॥ ३

कांस्कानुपायाञ्जानीषे ? का विद्याः शिक्षितास्त्वया ? ।
इति पृष्टो बिडालस्तं क्रोष्टारं प्रत्यवोचत ॥ ४

युक्तिरेका मयाऽधीता न त्वन्या ज्ञायते मया ।
वृक्षमारुह्य जीवेयं यदि व्याधः समापतेत् ॥ ५

तस्य तद्वचनं श्रुत्वा विहसञ्जम्बुकोऽवदत् ।
सखे ! त्वामनुशोचामि तपस्वी त्वं विपत्स्यसे ॥ ६

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मया पश्य विदग्धेन युक्तयः शिक्षिताः शतम् ।
येन केनाप्युपायेन रक्ष्येतात्मा मया द्रुतम् ॥ ७
द्वित्रानुपायानधुना शिक्षये त्वां यदीच्छसि ।
ज्ञातव्या बहवो विद्याः किञ्चिज्ज्ञत्वं भयावहम् ॥ ८
इति ब्रुवाणे गोमायौ स्नेहार्द्रं सरसं वचः ।
अकस्मादागतस्तत्र धनुरादाय लुब्धकः ॥ ९

तं विलोक्य स मार्जारो व्याधेनालक्षितो द्रुतम् ।
भूरुहाग्रं समारुह्य विटपान्तर्न्यलीयत ॥ १०
लुब्धको जम्बुकं दृष्ट्वा तस्यान्तिकमभिद्रुतः ।
इतिकर्तव्यतामूढः क्रोष्टा व्यामोहमव्रजत् ॥ ११

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शते युक्तिषु का योज्या कतमा श्रेयसी भवेत् ।
किं नु धावामि किं युध्ये जङ्गम्ये किमुत्प्लवे ॥ १२
किं शये मृतवद् भूमौ किं नु वृक्षं समाश्रये ।
इत्थं विकल्पयन् क्रोष्टा तस्थौ तत्रैव मोहितः ॥ १३
लुब्धको द्रुतमभ्येत्य धनुषाऽऽहत्य जम्बुकम् ।
गृहीत्वा हर्षभरितो न्यवर्तत गृहं प्रति ॥ १४
बालाः पश्यत बह्वीभिर्विद्याभिः किं प्रयोजनम् ।
सङ्गता कार्यकाले या सैव विद्या प्रकीर्तिता । १५

---

१) प्रश्नाः—१. कौ कदा सेतुस्नानाय जग्मतुः? २. कुत्र सुस्थौ तौ मिथः सँल्लेपतुः? ३ क्रोष्टा बिडालं किमब्रूत? ४. बिडालः क्रोष्टारं किं प्रत्यवोचत? ५. तस्य तद्वचनं श्रुत्वा विहसन् जम्बुकः किमवदन्? ६. कदा कस्तत्र समागतः? ७. तं विलोक्य बिडालो जम्बुकश्च किमकुरुताम्? ८. जम्बुकस्य विकल्पाः कीदृशाः? ९. अनया कथया किं गृह्यते युष्माभिः?

२) प्रयोगं विपरिणमयत—

१. कश्चित् बिडालः क्रोष्टा च सेतुस्नानाय जग्मतुः।
२ यदि व्याधः समागच्छेत् त्वया कथमात्मा रक्ष्येत।
३ युक्तिरेका मयाऽधीता न त्वन्या ज्ञायते मया॥

३) सहपूर्वपदो बहुव्रीहिः—

१. रसेन	सह	वर्तत	इति =	सरसम्।
२. आदरेण	सह	वर्तत	इति =	सादरः।
३. पुत्रेण	सह	वर्तत	इति =	सपुत्रः।
४. भार्यया	सह	वर्तत	इति =	सभार्यः।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

४) पर्यायाः—

व्याधः ४—व्याधो मृगवधाजीवो मृगयुर्लुब्धकोऽपि सः॥

बिडालः *m* a cat
पर्वसमय *N. m* the day of new or full moon
कलेबर *n* body
सुस्थ *a*, sitting happily
व्याध, लुब्धक *m* a hunter
तपस्विन् *m* helpless
विदग्ध *a* clever
भूरुहाग्र *n* top of a tree
विटपान्त· *in.* inside a bough
इतिकर्तव्यतामूढ *a* not knowing what to do
व्यामोह *m* confusion
कतमा *a. f.* which of these
विकल्पयन् *pr. a. p.* allowing options

---

६. श्रीकण्ठः शितिकण्ठश्च

आस्तां कस्मिंश्चिदग्रहारे 'श्रीकण्ठः' इति 'शितिकण्ठः' इति च द्वौ सहाध्यायिनौ सखायौ। तयोः श्रीकण्ठो जन्मना धनिकः। शितिकण्ठस्त्वकिञ्चनः। श्रीकण्ठो रमणीयं सौधमधिवसति। प्रत्यहमश्वशकटेन पाठालयं गच्छति। शितिकण्ठस्तु उपनगरं पित्रा सहैकस्मिन् कुटीरे निवसति। तस्य माता बाल्य एव दिवं गता। स एक एव पुत्रः। अतो गृहकार्यमपि सर्वं तेनैव कर्तव्यमासीत्। अथापि स स्वकीयान् पाठान् पठन् यथाकालं विद्यालयं गत्वा सश्रद्धं विद्यामभ्यास्थत्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

एकस्मिन्नहनि मध्याह्ने विश्रान्तिवेलायां श्रीकण्ठः शितिकण्ठश्च पाठालये किमपि संभाषमाणावास्ताम्। तत्प्रसङ्गाच्च श्रीकण्ठः शितिकण्ठमाह—'सखे! त्वमतीव दुर्गतोऽसि। भृशं त्वामनुशोचामि, किं न त्वं धनिको भवितुमिच्छसि? अहं तावत् सुखी वर्ते। मम गृहे द्वौ भृत्यौ स्तः। यद्यदाज्ञापयामि तत् सर्वं तौ कुरुतः। न किञ्चिदपि गृहे मे कर्तव्यमस्ति। त्वद्गृहे तु सर्वं कर्म त्वयैव क्रियते। नैकोऽपि भृत्यस्तवास्ति'—इति॥



शितिकण्ठः—सखे! इदं तावदज्ञानेनोदीरितं त्वया। ममापि सन्त्यष्टौ भृत्याः। ते मद्वचनमनुवर्तन्ते॥

श्रीकण्ठः—सौम्य! त्वं सत्यवादीति सर्वे त्वां स्तुवन्ति। तस्यैव हेतोरुपाध्यायोऽपि त्वयि नितरां स्निह्यति। कथं त्वमद्य मिथ्यवादी संवृत्तः?

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शितिकण्ठः—सखे! नैव मया मिथ्योक्तम्। सत्यं सन्त्येव ममाष्टौ भृत्याः॥

श्रीकण्ठः—भद्र! त्वमकिञ्चन इति सर्वो जानाति। एकमपि भृत्यं भृतिदानेन नियोक्तुं न शक्तस्त्वम्। कथङ्कारमष्टौ भृत्यान् नियोक्ष्यसे? कथमिदं ते वचः श्रद्धातव्यम्?

इदमनयोः संभाषणमुपाध्यायो भित्यन्तरितः शृण्वन्नासीत्। सोऽपि शितिकण्ठस्य वचनमसत्यं मन्यमानः सहसा सविधमागत्य कुपित इव शितिकण्ठमब्रवीत्—'अरे! तवाष्टौ भृत्याः सन्तीत्यविश्वसनीयमिदं वचः। किमित्येवं मिथ्या भाषसे? किं न जानासि विनोदार्थमप्यसत्यं न वक्तव्यमिति?

शितिकण्ठः स्मयमानः प्राह—'प्रसीदत्वाचार्यः। नैव मिथ्या भाषितं मया। सत्यमेव सन्ति ममाष्टौ भृत्याः। श्रीकण्ठस्य भृत्याः कदाचित् कार्यान्तरेण यत्र कुत्रापि गच्छेयुः। कदाचिदालस्येन कर्मापि न कुर्युः। मम भृत्यास्तु न तादृशाः। सततं ते ममाज्ञामनुपालयन्ति। न च ते मां विहाय क्षणमप्यन्यतो गच्छन्ति। तेभ्यो मया काकिण्यपि न वेतनं दीयते॥

उपाध्यायः—वत्स! हृदयङ्गम उपन्यासः। ब्रूहि तावत् के ते तव भृत्याः?

श्रीकण्ठः—साधु सखे! तेषां नामानि ब्रूष्व॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शितिकण्ठः—आचार्य! सत्यमुक्तं मया। मम सन्त्यष्टौ भृत्याः। ते च नामतः—मम द्वौ पादौ, द्वौ हस्तौ, द्वे नेत्रे, द्वे श्रोत्रे च। अष्टावेते भृत्याः सविनयं मदुक्तमनुतिष्ठन्ति। यदाऽहं कुत्रचिज्जिगमिषामि तदा मम पादावाज्ञापयामि—'तत्र मां नयतम्' इति। तौ च सत्वरमेव मां नयतः। एवं यदा किंचिद्वस्तु जिघृक्षे तदा मम हस्तौ, यदा किंचिद्दिदृक्षे तदा नेत्रे, यदा किमपि शुश्रूषे तदा श्रोत्रे चादिशामि। सत्वरमेतैस्तत्तत् कार्यं क्रियते। नापेक्ष्यते द्विरुक्तिः। यद्यत् श्रीकण्ठस्य भृत्याः कुर्वन्ति तत् सर्वमेते कर्तुं प्रभवन्ति॥

श्रुत्वेदं वचनमुपाध्यायश्चमत्कृतः परं प्रसन्नः प्रत्यवोचत्—'वत्स! साधूक्तं त्वया। ईदृशा एव भृत्याः प्रशस्यन्ते। यावदिमानेव भृत्यानादरिष्यसे तावत् त्वं श्रेयोऽवाप्स्यसि'—इति॥

---

१) प्रश्नाः — १. श्रीकण्ठः शितिकण्ठश्च कीदृशौ बालौ? २. कस्तयोः जीविकायाः प्रकारः? ३. तयोः कुत्र कीदृशं संभाषणं प्रवृत्तम्? ४. कुपित उपाध्यायः शितिकण्ठं किमवोचत्? ५. शितिकण्ठस्याष्टौ भृत्याः के? ६. प्रसन्नः गुरुः किमवदत्?

२) शत्रन्तैः शानज्नन्तैर्वा रूपैः वाक्यानि पूरयत—

१. ते बालाः (संभाष्)...(हस्)...च पथि गच्छन्ति।
२. एते मृगा उन्नमितैककर्णा गानं (श्रु)—आसते।
३. स्त्रियः पतीनां वचनानि (कृ)...तान् प्रीणयन्ति।
४. पक्षिणो धान्यकणान् (ग्रह)...स्वनीडं गच्छन्ति॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३) तत्पुरुषसमासः—

विग्रहवाक्यम्		समासः
१. अह्नः मध्यम्	=	मध्याह्नः।
२. रात्रेः मध्यम्	=	मध्यरात्रः।
३. कायस्य पूर्वम्	=	पूर्वकायः॥

४) अव्ययीभावसमासः—

१. कालमनतिक्रम्य	=	यथाकालम्।
२. दिने दिने	=	प्रतिदिनम्।
३. अहनि अहनि	=	प्रत्यहम्।
४. नगरस्य समीपे	=	उपनगरम्॥

५) नियुज्, श्रु, ब्रू—एषां तुमुन् प्रत्ययान्तैः वाक्यानि रचयत॥

६) पर्यायाः—

धनिकः ४—इभ्य आढ्यो धनी स्वामी।

भृत्यः ११—भृत्य दासेय दासेर दास गोप्यक चेटकाः।
नियोज्य किङ्कर प्रैष्य भुजिष्य परिचारकाः।

मङ्गलं ११—श्वःश्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम्।
भावुकं भविकं भव्यं कुशलं क्षेममस्त्रियाम्॥

सौध *m. n.* mansion	श्रद्धातव्य *pt. p.* can be trusted
कुटीर *n a* hut	अविश्वसनीय *a* untrustworthy
स्वकीय *a* one's own	वेतन *n* wages
विश्रान्तिवेला *f* interval	विनोदार्थम् *in.* in fun
दुर्गत *a* miserable	हृदयङ्गम *a* attractive
उदीरित *ppp.* uttered	चमत्कृत *a* astonished
भृतिदान *n* payment of wages	श्रेयम् *n* prosperity

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

७. काष्ठविक्रेता कुठारश्च

कस्मिंश्चिद्ग्रामे कुठारैकजीवनः कश्चित् काष्ठविक्रेताऽवर्तत। स प्रत्यहं कुठारच्छिन्नानि काष्ठानि विक्रीय तद्धनेन जीविकामकरोत्। एकदा काष्ठानि छिन्दतस्तस्य कुठारो हस्तात् स्रस्तः सहसा नद्यां पपात। स तत्रावतीर्य तं ग्रहीतुं नाशक्नोत्। अधिकूलं स्थितः उच्चैःकारं चक्रन्द॥

तस्य करुणं क्रन्दनं श्रुत्वा भगवान् वरुणस्तस्य पुरस्तादाविर्भूय तं शोककारणमपृच्छत्। स च यथावृत्तमात्मनः कुठारस्य वृत्तान्तं विज्ञापयामास॥

तदाकर्ण्य वरुणो जले निमज्य राजतमेकं कुठारमानीय तमप्राक्षीत्—'किमयं ते कुठारः?—इति। स प्रत्यवोचत्—

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

'नायं मदीयः'—इति। ततो वरुणः पुनरपि निमज्य सौवर्णमेकं कुठारमानीय तस्मा अदर्शयत्। 'नायमपि मदीयः' इति तेनाभ्यधायि॥

तच्छ्रुत्वा भगवान् भूयोऽपि जले निममज्जतदीयमायसं कुठारमाहृत्य तस्मै ददौ। तल्लाभेन परं प्रमोदमुपगतः स काष्ठविक्रेता कृतज्ञतामाविष्कुर्वन् वरुणं बहुधा तुष्टाव। वरुणोऽपि तस्य सत्यवचसा प्रीतः सौवर्णराजतावुभावपि कुठारौ तस्मै दत्त्वा तिरोदधे॥

उदन्तमेनं तस्य प्रातिवेशिकः कश्चिदाकर्ण्य स्वयमपि हैमं कुठारं लब्धुमिच्छन् गृहादेकमायसं कुठारं गृहीत्वा तस्या एव नद्यास्तीरं जगाम। गत्वा च तत्र स्वीयं कुठारं नद्यां प्रक्षिप्योच्चैश्चुक्रोश॥

तन्निशम्य तत्राविर्भूतो वरुणः तस्य शोकहेतुं विज्ञाय नद्यां पतितः सद्य एव हैमं कुठारमानीय—'अप्ययं भवदीयः कुठारः?' इत्यप्राक्षीत्। बलवता लोभेनाकृष्टः स पुरुषः—'आम्, अयमेव मदीयः, मदीय एवायम्' इति ब्रुवन् तस्य हस्तात् तं बलादाकृष्टुमयतिष्ट॥

भगवान् वरुणस्तं लोभाविष्टमनृतभाषिणं विनिन्दन् झटिति कुठारेण सह नद्यां निममज्ज। हैमं कुठारं लिप्समानस्य तस्य आयसः कुठारोऽपि नष्टः॥

अतोऽत्याशया मिथ्या वदतो जनस्य स्थितोऽप्यर्थो विनश्यति॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१) प्रश्नाः—१. कः किं निमित्तं नद्यास्तीरे स्थित उच्चैःकारं चक्रन्द? २. वरुणस्तस्य पुरस्तादाविर्भूय किमपृच्छत्? ३. अनन्तरं किमभूत्? ४. उदन्तमेनमाकर्ण्य प्रातिवेशिकः किं चकार? ५. स कीदृशं फलमलभत? ६. अस्मिन् पाठे उपदेशः कः?

२) कुठारच्छिन्नानि, यथावृत्तम्, तल्लाभेन, लोभाविष्टः, शोकहेतुः, एतेषां विग्रहवाक्यानि निर्दिशत॥

३) अव्ययीभावसमासः—

१. कूले इति	=	अधिकूलम्।
२. काश्याम् इति	=	अधिकाशि।
३. ग्रामस्य समीपे	=	उपग्रामम्।

४) 'सन्' प्रत्ययान्ताः—

१. लब्धुमिच्छति	=	लिप्सते।
२. आप्तुमिच्छति	=	ईप्सति।
३. दातुमिच्छति	=	दित्सति—ते॥

५) कृत्प्रत्ययान्तः—

१. छिद् to cut = (छिनत्ति) छिन्नः, छिन्नवान्, छिन्दन्, छिद्यमानः, छित्वा, विच्छिद्य, छेत्तुम्, छेत्तव्यम्।

२. भिद् to break = (भिनत्ति) भिन्नः, भिन्नवान्, भिन्दन्, भिद्यमानः, भित्वा, विभिद्य, भेत्तुम्, भेत्तव्यम्॥

६) पर्यायाः—

कुठारः ४—द्वयोः कुठारः स्वधितिः परशुश्च परश्वधः।
वरुणः ५—प्रचेता वरुणः पाशी यादसाम्पतिरप्यतिः॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

स्रस्त *ppp.* slipped
अधिकूलम् *in.* on the bank
उच्चैःकारम् *in.* with a loud noise
प्रातिवेशिक *m* a neighbour
आविर्भूत *ppp.* appeared
भवदीय *a* yours
लोभाविष्ट *a* avaricious.

---

८. अपरिचितसौहार्दे दोषः

भक्ष्यभक्षकयोः प्रीतिर्विपत्तेरेव कारणम्।
शृगालात् पाशबद्धोऽसौ मृगः काकेन रक्षितः॥

अस्ति मगधदेशे चम्पकवती नामारण्यानी। तस्यां चिरान्महता स्नेहेन मृगकाकौ निवसतः। स च मृगः स्वेच्छया भ्राम्यन् हृष्टपुष्टाङ्गः केनचिज्जम्बुकेनावलोकितः। तं दृष्ट्वा जम्बुकोऽचिन्तयत्—'आः! कथमेतन्मांसं सुललितं भक्षयामि। भवतु, विश्वासं तावदुत्पादयामि'–इत्यालोच्योपगम्याब्रवीत्—"मित्र! कुशलं ते?' मृगेणोक्तम्-'कस्त्वम्?' स ब्रूते-'क्षुद्रबुद्धिनामा जम्बुकोऽहम्। अत्रारण्ये बन्धुहीनो मृतवन्निवसामि। इदानीं त्वां मित्रमासाद्य पुनः सबन्धुर्जीवलोकं प्रविष्टोऽस्मि। अधुना तवानुचरेण मया सर्वथा भवितव्यम्। मृगेणोक्तम्—'एवमस्तु'॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ततः पश्चादस्तं गते सवितरि तौ मृगस्य वासभूमिं गतौ। तत्र चम्पकवृक्षशाखायां सुबुद्धिनामा काको मृगस्य चिरमित्रं निवसति। तौ दृष्ट्वा काकोऽवदत्—'सखे! चित्राङ्ग!

कोऽयं द्वितीयः?'। मृगो ब्रूते—'जम्बुकोऽयम्। अस्मत्सख्यमिच्छन्नागतः'। काको ब्रूते—'मित्र! अकस्मादागन्तुना सह मैत्री न युक्ता'॥

तच्छ्रुत्वा जम्बुकः सकोपमाह—'मृगस्य प्रथमदर्शनदिने भवानप्यागन्तुरेवाभूत्। तत् कथं भवता सहैतस्य स्नेहानुवृत्तिरुत्तरोत्तरं वर्धते। यथायं मृगो मम बन्धुस्तथा

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

भवानपि। मृगोऽब्रवीत्—'किमनेनोत्तरेण? सर्वैरेकत्र विश्रम्भालापैः सुखिभिः स्थीयताम्'। काकेनोक्तम्-'एवमस्तु'॥

अथ प्रातः सर्वे यथाभिमतदेशं गताः। एकदा निभृतं शृगालो ब्रूते—'सखे! चित्राङ्ग! अस्मिन् वनैकदेशे सस्यपूर्णं क्षेत्रमस्ति। तदहं त्वां नीत्वा दर्शयामि'। तथा कृते सति स मृगः प्रत्यहं तत्र गत्वा सस्यं खादति। अथ क्षेत्रपतिना तत् दृष्ट्वा पाशो नियोजितः। अनन्तरं पुनरागतो मृगः पाशैर्बद्धोऽचिन्तयत्—'को मामितः कालपाशादिव व्याधपाशात् त्रातुं मित्रादन्यः समर्थः'। तत्रान्तरे जम्बुकस्तत्रागत्योपस्थितोऽचिन्तयत्—'फलितः तावदस्माकं कपटप्रबन्धेन मनोरथः। एतस्योत्कृत्यमानस्य मांसासृग्लिप्तान्यस्थीनि मयाऽवश्यं प्राप्तव्यानि। तानि च बाहुल्येन भोजनानि भविष्यन्ति॥

मृगो जम्बुकमागतं दृष्ट्वोल्लसितो ब्रूते-'सखे! छिन्धि तावन्मम बन्धनम्। सत्वरं त्रायस्व माम्'। जम्बुको मुहुर्मुहुः पाशं विलोक्याचिन्तयत्—'दृढस्तावदयं बन्धः'। ब्रते च—"सखे! स्नायुनिर्मिता एते पाशाः। तदद्य भट्टारकवारे कथमेतान् दन्तैः स्पृशामि। मित्र! यदि चित्ते नान्यथा मन्यसे तदा प्रभाते यत् त्वया वक्तव्यं तन्मया कर्तव्यम्"—इत्युक्त्वा तत्समीपे क्वचिदात्मानमाच्छाद्य स्थितः॥

अनन्तरं स काकः प्रदोषकाले मृगमानागतमवलोक्येतस्ततोऽन्विष्य गतस्तथाविधं दृष्ट्वोवाच—'सखे! किमेतत्?

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१) प्रश्नाः—१. गोधूमादयः शालयश्च कुत्र समृद्धतया प्ररोहन्ति? २. क्षेत्रकर्षणाय कानि साधनान्युपयुज्यन्ते? ३. कीदृशे क्षेत्रे बीजान्युप्यन्ते? ४. देवमातृकायां. नदीमातृकायां च भूमौ कियद्वारं कृषिः सम्पाद्यते? ५. गौरी हरं किमाह?

२) व्रीह्यादयः, त्रिचतुरैः, धनपतिः, गोरक्षणम्, गौरीवचः—एषां विग्रहवाक्यानि लिखत ॥

३) अव्ययीभावः—

१. मक्षिकाणामभावः	=	निर्मक्षिकम्।
२. भिक्षाणामभावः	=	दुर्भिक्षम्।
३. भिक्षाणां समृद्धिः	=	सुभिक्षम्।
४. संशयस्याभावः	=	असंशयम् ॥

४) मयट् प्रत्ययान्ताः—

१. जलेन प्रचुरः	=	जलमयः।
२. सुवर्णस्य विकारः	=	सुवर्णमयः।
३. चिदेव	=	चिन्मयः ॥

५) सकृत्, द्विः, त्रिः, चतुः, पञ्चकृत्वः—एतैः वाक्यानि रचयत,

६) कृत्प्रत्ययान्ताः—

१. वप् to sow = (वपति) उप्तः, उप्तवान्, वपन्, उप्यमानः, उप्त्वा, निरुप्य, वप्तुम्, वपनीयम्, वप्तव्यम्।

२. लू to cut = (लुनाति) लूनः, लूनवान्, लुनन्, लूयमानः, लूत्वा, विलूय, लवितुम्, लवनीयम्, लवितव्यम् ॥

७) पर्यायाः—

कृषीवलः ४—क्षेत्राजीवः कर्षकश्च कृषकश्च कृषीवलः।

वृषभः २—उक्षा भद्रो बलीवर्द ऋषभो वृषभो वृषः।
अनड्वान् सौरभेयो गौः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

८) अर्थभेदः—व्रीह्युद्भवोचितं क्षेत्रं व्रैहेयं (Corn field)
शाल्युद्भवोचितं क्षेत्रं शालेयम् (Paddy field).

सानु *m. n.* the summit
निम्नप्रदेश *m* low land
लाङ्गल, हल *n* a plough
धुर *f* a yoke
शर्करिल *a* stony
निष्कुट *m* a pleasure grove near a house
उत्कर्षण *n* ploughing
निशिताग्र *a* sharp edged
लोहफाल *m. n.* an iron ploughshare
पद्धति *f* a line
लवित्र *n* a sickle
देवमातृका *a. f.* Having the god of rain as foster-mother; ie., watered only by the clouds
बल *m* बलराम
प्रतेश *m* यम
शक्त *a* able
कृषि *f* Agriculture.

---

*गौः वृषभपर्यायः पुंलिङ्गः, धेनुपर्यायः स्त्रीलिङ्गः ॥

---

१७. धनप्रशंसा

यस्यास्ति वित्तं स नरः कुलीनः स पण्डितः स श्रुतवान् गुणज्ञः ।
स एव वक्ता स च दर्शनीयः सर्वे गुणाः काञ्चनमाश्रयन्ते ॥ १

त्यजन्ति मित्राणि धनैर्विहीनं पुत्राश्च दाराश्च सुहृज्जनाश्च ।
तमर्थवन्तं पुनराश्रयन्ति धनं हि लोके पुरुषस्य बन्धुः ॥ २

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

बुभुक्षितैर्व्याकरणं न भुज्यते पिपासितैः काव्यरसो न पीयते।
न छन्दसा केन चिदुद्धृतं कुलं हिरण्यमेवार्जय निष्फला गुणाः॥

दुन्दुभिस्तु सुतरामचेतनस्तन्मुखादपि धनं धनं धनम्।
इत्थमेव निनदः प्रवर्तते किं पुनर्यदि जनः सचेतनः॥ ४

धनैर्निष्कुलीनाः कुलीना भवन्ति धनैरापदं मानवा निस्तरन्ति।
धनेभ्यःपरो बान्धवो नास्ति लोके धनान्यर्जयध्वंधनान्यर्जयध्वम्

---

१) प्रश्नाः—१. यस्यास्ति वित्तं स नरः कीदृशो भवति? २. "धनं हि लोके पुरुषस्य बन्धुः" कुतः? ३. "हिरण्यमेवार्जय निष्फला गुणाः" कस्मादिदमुच्यते? ४. "इत्थमेव निनदः प्रवर्तते" कीदृशो निनदः? ५. "धनान्यर्जयध्वं धनान्यर्जयध्वम्" कुत एवमुद्घुष्यते?

२) सुहृज्जनाः, अचेतनः, सचेतनः—एषां विग्रहवाक्यानि लिखत।

३) सन्प्रत्ययान्ताः—

१. कर्तुमिच्छति	=	चिकीर्षति—ते।
२. भोक्तुमिच्छति	=	बुभुक्षते।
३. नेतुमिच्छति	=	निनीषति—ते।

४) एकपदीकुरुत—दोषं जानातीति। कुले भवः। द्रष्टुं योग्यः।

५) प्रयोगं विपरिणमयत—

१. सर्वे गुणाः काञ्चनमाश्रयन्ति।
२. त्यजन्ति मित्राणि धनैर्विहीनं दाराश्च पुत्राश्च सुहृज्जनाश्च

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३. बुभुक्षितैर्व्याकरणं न भुज्यते पिपासितैः काव्यरसो न पीयते ।

४. धनेभ्यः परो बान्धवो नास्ति लोके धनान्यर्जयध्वं धनान्यर्जयध्वम् ॥

६) वक्ता, गन्ता, द्रष्टा, प्रष्टा, श्रोता–एषां स्त्रीलिङ्गरूपैः वाक्यानि रचयत ॥

७) कृत्प्रत्ययान्ताः—

हा to give up = (जहाति) हीनः हीनवान्, जहत्, हीयमानः हित्वा, विहाय, हातुम्, हानीयम्, हातव्यम्, हेयम् ॥

८) पर्यायाः—

धनम् १३—द्रव्यं वित्तं स्वापतेयं रिक्थमृक्थं धनं वसु ।
हिरण्यं द्रविणं द्युम्नमर्थरैविभवा अपि ॥

बन्धुः ६—सगोत्र बान्धव ज्ञाति बन्धुस्व स्वजनाः सभाः ॥

प्रशंसा *f* praise
श्रुतवत् *a. m.* possessed of high learning
दर्शनीय *a* worthy of being seen
अर्थवत् *a* wealthy
छन्दस् *n* the Vedas
दुन्दुभि *m* a large drum
अचेतन *a* lifeless
धनं धनं धनम् *n* wealth wealth wealth, and also the sound produced by a drum
निनद *m* sound
सचेतन *a* sentiment
निस्तरन्ति *P.* they cross.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१८. कविकौशलम्

एकदा गुर्जरदेशीयः कश्चित् कविः कविवत्सलं काशिराजं द्रष्टुकामः काशीदेशमगच्छत्। गत्वा च तत्र राजभवनं प्रविशन् स द्वारे द्वाःस्थेन न्यरुध्यत। सप्रश्रयमनुनीयमानः स द्वास्थः 'यदि त्वमन्तः प्रवेष्टुमिच्छसि तर्हि यत्किञ्चिद्देहि। अन्यथा दुर्लभस्ते प्रवेशः'—इत्यवोचत्॥

तच्छ्रुत्वा कविः—'भद्र! अधुना मम हस्ते वराटिकाऽपि न विद्यते। किन्तु राज्ञः सकाशान्मया सम्भावना लभ्येत। तत्र यल्लप्स्यते तस्यार्धं ते दास्यामि'—इति प्रत्यवोचत्। तद्वचः श्रुत्वा हृष्टो द्वारपालकस्तं प्रावेशयत्॥

ततः कोष्ठान्तरं प्रविशन् स भूयोऽन्येन द्वारपालकेन न्यरुध्यत। तस्मा अपि राज्ञः सकाशाल्लप्स्यमानस्यार्धं प्रतिज्ञाय स कविस्तेनाप्यनुमतः कथञ्चित् राज्ञः सविधं प्रापत्। प्राप्य च सरसैः श्लोकैः राजानं तुष्टाव। तेन प्रीतो नरपतिस्तं सत्कृत्य तस्मै वारणमेकं दापयितुं मन्त्रिणमादिक्षत्। तस्य वचनं श्रुत्वा कविराह—राजन्! अहं लब्धवारण एवास्मि। अतोऽद्य तल्लाभेन न मे प्रयोजनम्। तस्मादन्यदेव याचिष्ये। दानेन मत्प्रार्थनां सफलयितुमर्हसि'—इति। राजोवाच—विद्वन्! किं तेऽभीष्टम्? कथय। यदि शक्यं तर्हि तत् साधयितुं यतिष्ये—इति॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कविरब्रवीत्—'राजन्! यदि मां सम्भावयितुमिच्छसि तर्हि शतं प्रहारान् मे पारितोषिकत्वेन विधेहि। न ते दातुमशक्यं मया किञ्चित् प्रार्थितम्'—इति। राजा कवेराकूतमज्ञात्वा प्राह—'महाकवे! त्यज्यतां प्रहारकथा। रत्नं हिरण्यं वा यथाभिमतं याचस्व। तत् ते वितरिष्यामि'—इति। कविः प्रत्यवोचत्—'राजन्! यदि त्वं कवीनां मनोरथस्य पूरकस्तर्हि प्रहारशतेन मां सम्भावय। नो चेद्गमिष्यामि। स्वस्त्यस्तु ते'—इति॥

ततो गत्यन्तरमपश्यन् विषण्णवदनो राजा तदभीष्टस्य पूरणाय वेत्रहस्तं किङ्करमाज्ञापयामास। स च किङ्करो यदा तं प्रहर्तुमुद्युक्तोऽभूत् तदा कविः प्राह—'महाभाग! क्षणं प्रतीक्षस्व। अस्याः सम्भावनायाः अंशहरौ द्वौ दौवारिकावासाते। राज्ञः सकाशाल्लभ्यमानस्यैकमर्धमेकस्मै, अपरमर्धमपरस्मै च मया प्रतिज्ञातम्। अन्यथा मेऽन्तःप्रवेशो राजदर्शनं च नाभविष्यताम्। तस्मादेते शतं प्रहाराः समं विभज्य तयोः पृष्ठे पात्यन्ताम्, येनाहं कृतप्रतिज्ञः सत्यवचनो भवेयम्' इति॥

तदनुरोधेन राज्ञः पुरोभागमानीतयोः प्रतीहारयोः पृष्ठभागे प्रत्येकं पञ्चाशत् प्रहाराः प्रदत्ताः। अनेन कवेः कौशलेन राजा मन्त्रिणश्चात्यन्तं चमत्कृतास्तं नितरां बहुमानयन्॥

---

१) प्रश्नाः—१. गुर्जर देशीयः कविः राजभवनं प्रविशन् किन्निमित्तं केन न्यरुध्यत? २. कुतः पश्चात् तस्य प्रवेशोऽन्वमन्यत? ३. राजा मन्त्रिणं किमादिक्षत्? ४. तस्य वचनं श्रुत्वा

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कविः किमाह? ५. कवेराकूतमज्ञात्वा राजा किं प्राह?
६. कविः किं प्रत्यवोचत्? ७. ततः किं सम्भूतम्?

२) कविवत्सलः, दुर्लभः, राजभवनम्, सरसाः, कृतप्रतिज्ञः, सत्यवचनः—एषां विग्रहवाक्यानि लिखत ॥

१. वेत्रं हस्ते यस्य सः = वेत्रहस्तः।
२. चक्रं पाणौ यस्य सः = चक्रपाणिः।

४) अव्ययीभावः—

१. एकमेकं प्रति = प्रत्येकम्। ३. क्षणे क्षणे = प्रतिक्षणम्।
२. अर्थमर्थं प्रति = प्रत्यर्थम्। ४. पदे पदे = प्रतिपदम् ॥

५) पर्यायाः—

द्वारपालः ५—प्रतीहारो द्वारपालः द्वाःस्थ द्वाःस्थित दशंकाः।
मन्त्री ३—मन्त्री धीसचिवोऽमात्यः।
राजा ७—राजा राट् पार्थिवक्ष्माभृन्नृपभूप महीक्षितः ॥

अनुनीयमान *pr. pp.* being prevailed upon
सविध *n* vicinity
सरस *a* charming
आकूत *n* intention,
स्वस्ति *in.* hail, may it be well with
वारण *m* an elephant
लब्धवारण *a. m.* he who has obtained an elephant and also obstruction
अंशहर *a.* a co-heir

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२९. पातिव्रत्यवैभम्

पुरा पाटलिपुत्रे यज्ञसोमः कीर्तिसोमश्चेति द्वौ भ्रातरावास्ताम्। तयोः प्रभूतं पित्र्यं वित्तमभूत्। तौ तद्विभज्य पृथग्गृहिणावभूताम्। तयोः कीर्तिसोमः स्वीयं भागं वाणिज्येन कौसीद्येन चावर्धयत्। यज्ञसोमस्तु भुञ्जानो ददानश्च स्वीयमंशं कियतैव कालेन व्ययीकृत्य रिक्तीभूतो बन्धूनामवधीरणायाः पात्रमभूत्॥

बन्धुजनैरवमन्यमानः सोऽत्यन्तं खिन्नः स्वभार्यामवोचत्—'प्रिये! सम्प्रति निर्धनीभूतयोरावयोः वरमन्यदेशगमनम्, न त्विह बन्धूनां मध्ये जीवनम्। अतोऽद्यैव देशान्तरं गच्छावः—इति। भार्याऽब्रवीत्—'नाथ! पाथेयेन विना कथं वा देशान्तरं गमिष्यावः। न किमप्यस्ति गृहे। अतस्ते भ्रातरं गत्वा यत् किञ्चिद्धनं याचस्व'—इति॥

तदनुरोधेन यज्ञसोमः कीर्तिसोमस्यान्तिकं प्राप्य तस्मै स्वीयं सङ्कल्पमावेद्य यावत् तं पाथेयमयाचत तावत् तस्य भार्या श्रुततद्वचना ससम्भ्रममागत्य—'अये! नाथ! एतादृशा दरिद्राः प्रत्यहमस्माकं गृहद्वारमाश्रयिष्यन्ति। तेभ्यः कियत् कुतो वा दास्यामः। स्वीयं वित्तं क्षपितवतेऽस्मै दुर्भगाय त्वया वराटिकाऽपि न दातव्या। यदि दास्यसि मम जीवितेन शपे'—इत्यब्रवीत्। कीर्तिसोमः भ्रातृस्नेहान्वितोऽपि भार्याभीतः किमप्यदत्त्वा तं प्राहिणोत्॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

यज्ञसोमो गृहं गत्वा वृत्तान्तमिमं भार्यायै निवेद्य देवैकशरणः सद्य एव तया सह देशान्तरं प्रति प्रातिष्ठत। गच्छन्तौ च तौ मार्गवशात् किमपि घोरमरण्यं प्रापतुः। शिलाकण्टकाकीर्णे वनवर्त्मनि क्लेशेन व्रजतोस्तयोः यज्ञसोमः केनचिन्महाकायेनाजगरेण न्यगीर्यत॥

तदवेक्ष्य सा सती सोरस्ताडमुच्चैः क्रन्दती क्षितौ पपात। तां तथा विलपन्तीमवलोक्याजगरः सञ्जातकरुणो मानुषभाषयाऽभाषत—'शोभने! किमर्थमेवं विलपसि?—इति।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

साऽवोचत्—'महासत्त्व! कथं न विलपिष्यामि। मम हि भिक्षाभाजनं भवताऽपहृतम्। कथङ्कारमशरणा प्राणान् धारयिष्यामि'—इति॥

तदाकर्ण्याजगरः सपदि स्वजठरात् किञ्चित् सुवर्णपात्रमुद्गीर्य तस्यै दत्त्वाऽब्रवीत्—'महाभागे! गृह्यतामिदं ते भिक्षापात्रम्'—इति। सा तदादाय प्रत्यवोचत्—'महात्मन्! किमनेन मे प्रयोजनम्? को वा स्त्रियै मह्यमस्मिन् भिक्षां प्रदास्यति?'—इति ब्रुवती भूयोऽप्युच्चैरक्रन्दत्। ततः सोऽजगरस्तां सान्त्वयन्नाह—साध्वि! त्वमिदं पात्रं गृहीत्वा भिक्षार्थं व्रज। यस्ते भिक्षां न दास्यति तस्य शिरः सहस्रधा विशरिष्यते। सत्यमेतद्वचो मम। माऽस्तु तेऽत्र संशयः'—इति॥

तदाकर्ण्य सा—'भो! महासत्त्व! यदि ते वचः सत्यं तर्हि त्वमिदानीं मे भर्तृभिक्षां देहि'—इत्युक्त्वा पात्रमदर्शयत्। अजगरोऽपि स्वनाशभयात् यज्ञसोमं जीवन्तमेवोद्गीर्य तस्यै प्रायच्छत्॥

अथ सोऽजगरः—'भो! महाभागौ! अहं काञ्चनवेगाख्यो विद्याधरः कस्यचिद्दृषेः शापेनाजगरत्वमापन्नः। स च शापो मे साध्वीसंवादपर्यन्तोऽभूत्। इदानीमनुगृहीतोऽस्मि तत्रभवत्या'—इति वदन् निजं रूपं प्रतिपद्य तत् सुवर्णपात्रं रत्नैरपूर्य ताभ्यां दत्त्वा स्वाभीष्टदेशं गतः। तौ दम्पती च

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

महता हर्षेण तद्रत्नपात्रमादाय स्वदेशमागत्य बन्धूनां प्रीतेः पात्रीभूतौ चिरं न्यवसताम् ॥

---

१) प्रश्नाः—१. यज्ञसोमः कीर्तिसोमश्च वित्तं कथं व्ययीचक्रतुः? २. यज्ञसोमः किं निमित्तं विदेशं प्रस्थितः? ३. कीर्तिसोमस्य जाया भर्तारं किमब्रवीत्? ४. यज्ञसोमः कुत्र केन न्यगीर्यत? ५. कथं तस्य भार्या भर्तारमजगरात् प्रत्यलभत?

२) रिक्तीभूतः, भ्रातृस्नेहान्वितः, भार्याभीतः, दैवैकशरणः, महासत्वः, काञ्चनवेगाख्यः—एषां विग्रहवाक्यानि लिखत ॥

३) शानच् प्रत्ययान्तैः रूपैः वाक्यानि पूरयत—

१. सज्जनः धनं याचकेभ्यो (दा)...(भुञ्ज्...च व्ययीकरोति)
२. रामायणम् (अधि+इ)...परां श्रियमधिगच्छति।
३. शास्त्रस्य तत्वं (ज्ञा)...जनो न नीचकर्माणि करोति।
४. सीतां (वि+चि)...मारुतिः सागरं सन्ततार।
५. सिंहासनम् (अधि+आस्)...राजा प्रजाः पालयति ॥

४) एकपदीकुरुत—पितुः आगतम्ः स्वस्य इदम्, परस्य इदम्, अन्यस्य इदम्, जाया च पतिश्च, माता च पिता च ॥

५) कृत्प्रत्ययान्ताः—

१. भी to fear = (बिभेति) भीतः, भीतवान्. बिभ्यत्, भीत्वा, सम्भीय, भेतुम्. भयनीयम्, भेतव्यम्।
२. भिद् to break = (भिनत्ति) भिन्नः, भिन्नवान्, भिन्दन्, भिद्यमानः, भित्त्वा, निर्भिद्य, भेत्तुम्, भेदनीयम्. भेतव्यम्, भेद्यम् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

६) पर्यायाः—

वार्ता ४—वार्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्यात्।
गृहं १६—गृहं गेहोदवसित वेश्म सद्म निकेतनम्।
निशान्तपस्त्य सदनं भवनागारमन्दिरम्।
गृहाः पुंसि च भूम्न्येव निकाय्यनिलयालयाः।
(गृहा = पुंलिङ्गे नित्यबहुवचनम्) ॥
शिरः ५-उत्तमाङ्गाशिरः शीर्षं मूर्धा ना मस्तकोऽस्त्रियाम्।
(ना = पुंलिङ्गः, आस्त्रियां = पुंसि नपुंसके च)।

वैभव *n* glory
पित्र्य *a* ancestral
वाणिज्य *n* trade
कौसीद्य *n* usury, taking interest
रिक्तीभूत *a* he who bas become emptied
पाथेय *n* provision for journey
क्षपितवत् *p a. p* destroyed, completely spent
शपे *A* I say on oath
अजगर *m* a huge serpent who is said to swallow goats
न्यगीर्यत *A.* was devoured
जठर *n* the stomach
उद्गीर्य *in.* having vomitted
विशरिष्यते *A.* will be shattered

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२०. अशोकमहाराजः

क्रिस्तोः पूर्वं द्विसप्तत्युत्तरद्विशततमवर्षादारभ्य द्वात्रिंशदुत्तरद्विशततमवर्षपर्यन्तम् अशोको नाम बुद्धमतावलम्बी महाराजो भारतवर्षस्याधिपत्यमवहत्; यः खलु चन्द्रगुप्तमौर्यस्य पौत्रो बिन्दुसारस्य पुत्रश्चासीत्। स एवाशोकवर्धन इत्यपि समाख्यायते। स चेक्ष्वाकुवंशीयः श्रीराम इव प्रजानामैहिकमामुष्मिकं च योगक्षेमं व्यचिन्तयत्॥

प्रथमं तावदशोकः समरप्रियोऽवर्तत। महदपि स्वीयं राज्यं कलिङ्गदेशस्य विजयेन महत्तरं कर्तुं मतिं बबन्ध। सन्नद्धसहायश्च राज्यावाप्तेः परं द्वादशे वर्षे कालिङ्गानभ्ययुङ्क्त। प्रवृत्तश्च तत्र कालिङ्गाशोकसैन्योस्त्रिवार्षिको दारुणः सङ्ग्रामः। तृतीयस्याब्दस्यान्ते जयलक्ष्मीरशोकमसिश्रियत्॥

जितराज्यस्त्वशोकः सशोको जातः। भयानके तस्मिन् सङ्ग्रामे सहस्रशः प्रतिपक्षीयान् विशसितान् दृष्टवतस्तस्य मनसि महान् शोकः समजनि। अतः सद्य एवायं भूयः समरोद्यमाद्विरराम। पश्चात्तापाभिभूतश्च संन्यासमङ्गीकृत्य बुद्धमहर्षेः शान्तान् शुद्धांश्चोपदेशान् अन्ववर्तत। अहिंसामेव परमं धर्ममाकलयन् मृगयाविनोदमप्यहासीत्। आकीटादामर्त्यं सर्वानपि जीवराशीन् स्वीयप्रजात्वेनागणयत्॥

सोऽयं राजर्षिः प्रजानां परितोषणे कृतमतिः परस्परं विवदमानानां विविधानां मतानां सामरस्यमुपपादयन्

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मतभेदमूलकं जनानां मिथो वैरस्यं च परिहरन् प्रजासु मिथः सोदरस्नेहमुदपादयत्। स्वयं बौद्धमतमवलम्बमानोऽप्ययं मतान्तराय नाद्रुह्यत्। प्रत्युत स्वस्वधर्मात् प्रमाद्यतो जनान-दण्डयत्। सर्वमतस्थानपि समदृष्ट्याऽपश्यत्॥

अपि चायमशोकमहाराजः स्वीयानां प्रजानामाचारस्य प्रत्यवेक्षणाय तासां लोकयात्रासरणेः परिष्करणाय च स्व-साम्राज्ये समन्तादधिकृतान् पुरुषान् न्ययोजयत्। असंस्कृतानां वन्यवर्गाणां शिक्षणाय सर्वत्रोपदेशकान् न्ययुङ्क्त। किञ्चायं भूतदया, शान्तिः, कायचित्तयोः शुद्धिः, मातापित्रादीनां गुरु-जनानामादरणम् इत्यादीन् विषयानधिकृत्य चतुर्दश नियमान् निरमासीत्। तांश्च शिलालेखेष्वर्पयित्वा प्रजानामवधारणाय भारतवर्षे समन्तात् प्रतिष्ठापयामास। येषु खलु केचन शिला-लेखाः सम्प्रत्युपलभ्यमानास्तस्य चरितं तदीयं राज्यभारप्रकारं च बोधयन्ति॥

महाराजोऽयं स्वयमेवात्मानं प्रियदर्शिनमाह। तदनु-रोधेन च प्रजानां प्रियमाचरन् मनुष्याणामिव मृगाणामपि तत्र तत्र चिकित्सालयानकल्पयत्। पथिकानां विश्रमाय बहुत्र पथिकाश्रमान् निरमापदत्। सर्वत्र पथि कूपतटाकादीनखान-यत्। सञ्चारसौकर्याय पथापेक्षं रथ्या अकारयत्। रथ्याना-मुभयोः पार्श्वयोश्छायावृक्षानवर्धयत्। आबालवृद्धं प्रजाः सर्वाः परमानन्दमन्वभूवन्॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अशोकस्त्वेतावतोऽप्युपकारानपर्याप्तान् मन्यमानः स्वयमतृप्त एवासीत्। दुर्लभा एवैतादृशाः प्रजाहितैषिणो राजानः। सर्वथैवायं महाराजः सर्वदा सर्वेषां राज्ञामनुकरणीयः सर्वेषां जनानामनुस्मरणीयश्च भवति॥

---

१) प्रश्नाः—१. अशोकः कदा भारतवर्षस्याधिपत्यमवहत्? २. स प्रथमं कीदृश आसीत्, जितराज्यः कीदृशो जातः? ३. स प्रजानां परितोषणे कृतमतिः किं व्यधात्? ४. अशोकीयान् शिलालेखानधिकृत्य किं जानीध्वे? ५. राजाऽसौ आत्मानं प्रियदर्शिनं ब्रुवन् किं चकार?

२) अव्ययीभावः—
१. कीटानवधीकृत्य = आकीटम्।
२. मर्त्यानभिव्याप्य = आमर्त्यम्।
३. बालानवधीकृत्य वृद्धानभिव्याप्य = आबालवृद्धम्॥

३) एकपदीकृत-अधिपतेः भावः, इक्ष्वाकुवंशे भवः. इह भवम्, अमुष्मिन् भवम्, परत्र भवम्, अतिशयेन महत्।

४) मध्यमपदलोपी तत्पुरुषः—
१. फलप्रधानाः वृक्षाः = फलवृक्षाः।
२. पुष्पयुक्ता लताः = पुष्पलताः।

५) कृत्प्रत्ययान्ताः—
१. नह् to tie = (नह्यति) नद्धः, नद्धवान्, नह्यन्, नह्यमानः, नध्वा, संनह्य, नद्धुम्. नहनीयम्, नद्धव्यम्।
२. शस् to hurt = (शसति) शस्तः-शसितः, शस्तवान्-शसितवान्, शसन्, शस्यमानः, शस्त्वा-शसित्वा, विशस्य, शसितुम्, शसनीयम्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३. शंस् to praise = (शंसति) शस्तः-शंसितः, शस्तवान्, शंसितवान्. शंसिन्, शस्यमानः, शस्त्वा-शंसित्वा, प्रशस्य, शंसितुम्, शंसनीयम् ॥

६) पर्यायाः—

सोदर्यः ४—समानोदर्य सोदर्य सगर्भ्य सहजाः समाः।

पान्थः ५—अध्वनीनोऽध्वगोऽध्वन्यः पान्थः पथिक इत्यपि।

सैन्यम् ११—ध्वजिनी वाहिनी सेना पृतनाऽनीकिनी चमूः।
वरूथिनी बलं सैन्यं चक्रं चानीकमस्त्रियाम् ॥

सन्नद्धसहाय *a* equipped with help

दारुण *a* terrible

भयानक *a* frightful

प्रतिपक्षीय *a* belonging to the opponent party

विशसित *ppp* slain

आ in कीटात् *m* from the insects

आमर्त्यम् *in.* up to the mankind

विवदमान *a* quarrelling, disagreeing

सामरस्य *n* harmony

वैरस्य *n* hostitliy

प्रमाद्यत् *pr. a. p.* neglecting

असंस्कृत *a* not refined

शिक्षण *n* teaching

आदरण *n* honouring

शिलालेख *m* an inscription

अवधारण *n* affirmation

प्रियदर्शिन् *m* causing pleasure

चिकित्सालय *m* hospital

पथिकाश्रम *m. n.* rest house

अपर्याप्त *a* insufficient

अनुकरणी *a. m.* worthy of being imitated

अनुस्मरणीय *a. m,* worthy of being remembered.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मृगेनोक्तम्—'सुहृद्वाक्यावधीरणस्य फलमेतत्'। काको ब्रूते—'स वञ्चकः क्वास्ते?' मृगेणोक्तम्—'मांसार्थी तिष्ठत्यत्रैवान्तर्हितः। काको ब्रूते—'उक्तमेव मया पूर्वम्'। ततः काको दीर्घं निश्वस्य निजगाद—'अरे! वञ्चक! किमिदं त्वया पापकर्मणा कृतम्! अथवा स्थितिरियं दुर्जनानाम्'॥

अथ प्रभाते क्षेत्रपतिः लगुडहस्तस्तं प्रदेशमागच्छन् काकेनावलोकितः। तमालोक्य काकेनोक्तम्—'सखे! मृग! त्वमात्मानं मृतवत् संदर्श्य वातेनोदरं पूरयित्वा पादान् स्तब्धीकृत्य तिष्ठ। यदाऽहं शब्दं करोमि तदा त्वमुत्थाय सत्वरं पलायिष्यसे'। मृगस्तथैव काकवचनेन स्थितः। ततः क्षेत्रपतिना हर्षोत्फुल्ललोचनेन तथाविधो मृग आलोकितः। 'आः! स्वयं मृतोऽसि! इत्युक्त्वा मृगं बन्धान्मोचयित्वा पाशान् ग्रहीतुं सयत्नो बभूव। ततः काकशब्दं श्रुत्वा मृगः सत्वरमुत्थाय पलायितः। तमुद्दिश्य तेन क्षेत्रपतिना क्षिप्तेन लगुडेन शृगालो हतः। पश्यत! वञ्चकस्य आपतितं फलम्॥

उक्तं च सुभाषितरत्नाकरे—

त्रिभिर्वर्षैस्त्रिभिर्मासैस्त्रिभिः पक्षैस्त्रिभिर्दिनैः।
अत्युत्कटैः पुण्यपापैरिहैव फलमश्नुते॥

---

१) प्रश्नाः—१. मृगकाकौ कुत्र न्यवसताम्? २. मृगः केनावलोकितः? ३. तं दृष्ट्वा जम्बुकः किमचिन्तयत्? ४. ततः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

किमकरोत्? ५. किमुक्तं मृगेण? ६. मृगस्य चिरमित्रं काकः कुत्र निवसति? ७. तौ दृष्ट्वा काकः किमवदत्? ८. जम्बुकः कुपितः किमाह? ९. जम्बुकस्य क्षुद्रबुद्धिता काकस्य सुबुद्धिता च कथं व्यक्तीभवतः? १०. अनया कथया किं गृह्यते युष्माभिः?

२) मगधदेशः, स्वेच्छया, बन्धुहीनः, सबन्धुः, सुहृद्वाक्यम्, अस्मत्सख्यम्—एषां विग्रहवाक्यानि निर्दिशत॥

३) द्वन्द्वसमासः—

१. मृगश्च काकश्च = मृगकाकौ ।
२. सीता च रामश्च = सीतारामौ ।
३. पुण्यानि च पापानि च = पुण्यपापानि॥

४) तव्यप्रत्ययान्तैः रूपैः वाक्यानि पूरयत—

१. अधुना तवानुचरेण मया (भू)...।
२, प्राज्ञैः सर्वदा सद्भिः सह सङ्गः (कृ)...॥
३. सर्वैरस्माभिः खविस्रम्भालापैः कालो (नी) .....॥

५) कृत्प्रत्ययान्ताः—

१. दृश् (णिच्) to show=(दर्शयति) दर्शितः, दर्शितवान्, दर्शयित्वा, संदर्श्य, दर्शयितुम्, दर्शनीयम्, दर्शयितव्यम्।

२. पृ to fill=(पूरयति) पूर्णः, पूरितः, पूरितवान्, पूरयित्वा, सम्पूर्य, पूरयितुम्, पूरणीयम्, पूरयितव्यम्॥

६) पर्यायाः—

वनं ६—अटव्यरण्यं विपिनं गहनं काननं वनम्।
इदानीं ५—एतर्हि सम्प्रतीदानीमधुना सांप्रतं तथा॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

भक्ष्य *a* eatable
भक्षक *a* one who eats
सुललित *a* very nice, fine
क्षुद्रबुद्धि *a* low.minded
अनुचर *a. m.* a follower
चिरमित्र *n* an old friend
चित्राङ्ग *a.* m. striped
आगन्तु *N. m.* a stranger
विस्रम्भालाप *m* friendly conversation
निभृतम् *in.* privately
पाश *m* a net, snare
कपटप्रबन्ध *m* fraudulent scheme
उत्कृत्यमान *pr. pp,* torn
असृज् *n.* blood [out
उल्लसित *m. a.* delighted
स्नायुनिर्मित *a* made of muscle (शिरा)
भट्टारकवार *m* Sunday
वञ्चक *a* deceitful, a cheat *m* jackal
लगुडहस्त *a* with a club
वात *m* wind [in hand
स्तब्धीकृत्य *in* making motionless
पक्ष *m* शुक्ल or कृष्णपक्ष
अत्युत्कट *a* excessive.

---

९. महाकवि कालिदासस्य सूक्तयः

पुराणमित्येव न साधु सर्वं न चापि काव्यं नवमित्यवद्यम् ।
सन्तः परीक्ष्यान्यतरद्भजन्ते मूढः परप्रत्ययनेयबुद्धिः ॥ १

लब्धास्पदोऽस्मीति विवादभीरोस्तितिक्षमाणस्य परेण निन्दाम् ।
यस्यागमः केवलजीविकायै तं ज्ञानपण्यं वणिजं वदन्ति ॥ २

ज्वलति चलितेन्धनोऽग्निर्विप्रकृतः पन्नगः फणं कुरुते ।
प्रायः स्वं महिमानं क्षोभात् प्रतिपद्यते हि जनः ॥ ३

(मालविकाग्निमित्रनाटकात्)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

यदेवोपनतं दुःखात् सुखं तद्रसवत्तरम् ।
निर्वाणाय तरुच्छाया तप्तस्य हि विशेषतः ॥ ४
सर्वस्तरतु दुर्गाणि सर्वो भद्राणि पश्यतु ।
सर्वः कामानवाप्नोतु सर्वः सर्वत्र नन्दतु ॥

(विक्रमोर्वशीय नाटकात्)

भवन्ति नम्रास्तरवः फलोद्गमनवाम्बुभिर्दूरविलम्बिनो घनाः ।
अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभाव एवैष परोपकारिणाम् ॥

स्त्रीणामशिक्षितपटुत्वममानुषीषु
सन्दृश्यते किमुत याः प्रतिबोधवत्यः ।
प्रागन्तरिक्षगमनात् स्वमपत्यजात-
मन्यैर्द्विजैः परभृताः खलु पोषयन्ति ॥ ७

सतीमपि ज्ञातिकुलैकसंश्रयां जनोऽन्यथा भर्तृमतीं विशङ्कते ।
अतः समीपे परिणेतुरिष्यते प्रियाऽप्रिया वा प्रमदा स्वबन्धुभिः ॥

शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृताऽपि रोषणतया मा स्म प्रतीपं गमः ।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥ ९

(अभिज्ञानशाकुन्तल नाटकात्)

---

१) प्रश्नाः—१. "सन्तः परीक्ष्यान्यतरद्भजन्ते" कयोरन्यतरत्? २. "तं ज्ञानपण्यं वणिजं वदन्ति" कम्? ३. 'प्रायः स्वं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

महिमानं क्षोभात् प्रतिपद्यते हि जनः" किमत्रोदाहरणम्? ४. कीदृशं सुखं रसवत्तरं भवति? तत्र दृष्टान्तः कः? ५. सर्वेषां प्रार्थनीयं किम्? सर्वः किं किं करोतु? ६. "स्वभाव एवैष परोपकारिणाम्" कः? ७. स्त्रीणामशिक्षितपटुत्वे किञ्चिदुदाहरणं दर्शयत। ८. "अतः समीपे परिणेतुरिष्यते" का? कैः? ९. "यान्त्येवं गृहिणीपदं युवतयः" कथम्? १०. वामाः कीदृश्यः?

२) नवमश्लोकगतानि वाक्यानि प्रयोगान्तरतया विपरिणमयत॥

३) लब्धास्पदः, विवादभीरुः ज्ञानपण्यः, फलोद्गमैः, अनुद्धताः, सत्पुरुषाः—एषां विग्रहवाक्यानि निर्दिशत॥

४) सन्नन्ताः—

श्रोतुमिच्छति = शुश्रूषते। जेतुमिच्छति = जिगीषति।
ज्ञातुमिच्छति = जिज्ञासते। पातुमिच्छति = पिपासति।
द्रष्टुमिच्छति = दिदृक्षते। भवितुमिच्छति = बुभूषति॥

५) कृत्प्रत्यान्ताः—

वद् to speak = (वदति) उदितः, उदितवान्, उदित्वा, अनूद्य, वदितुम्, वदनीयम्, वदितव्यम्॥

६) जुगुप्सते, तितिक्षते, मीमांसते, चिकित्सति, विचिकित्सति—एतैः वाक्यानि रचयत॥

७) पर्यायाः—

सर्व १२—समग्रं सकलं सर्वं समस्तं निखिलाखिले।
समं कृत्स्नमशेषं च विश्वं पूर्णमनूनकम्॥

पतिव्रता ५—पुरन्ध्री सुचरित्रा तु सती साध्वी पतिव्रता॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सूक्ति *f a* good speech
पुराण *a* old
नव *a* new
अवद्य *a* to be condemned
विप्रकृत *ppp.* hurt, offended
आगम *m* learning
ज्ञानपण्य *a* dealing in knowledge
द्विज *m* a bird; also ब्राह्मण, दन्त
परभृत *m* कोकिल
सती *f* a chaste woman
प्रमदा *f* a young woman
सपत्नीजन *m* co-wives
प्रतीप *a* against
दक्षिण *f* generous
वामा *a* acting contrary
आधि *m* mental agony

---

१०. पत्रिकालेखनम्

पिता—सत्यमूर्ते! चिरादिव चिन्तयन् दृश्यसे। किं कर्तुमुद्यतोऽसि?

सत्यमूर्तिः—तात! मद्रपुरस्थाय मम सहाध्यायिने सत्यकीर्तये पत्रिकां लिखामि।

पिता—चिरात् खलु चिन्तयसि। अपि समापितो लेखः?

सत्यमूर्तिः—तात। न समापितः।

पिता—आनय लेखम्, पश्यामि तावत्। (दृष्ट्वा) अरे! किमिदम्? नैकमप्यक्षरमत्र लिखितम्!

सत्यमूर्तिः—तात! पत्रिका कथं लेखनीयेति न ज्ञायते।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पिता—भद्र! यदि सत्यकीर्तिस्तव सम्मुखेऽवर्तिष्यत तर्हि त्वं त्वदाशयं तस्मै विना क्लेशमवदिष्यः। किं न?

सत्यमूर्तिः—आं तात! भाषणं सुकरम्, लेखनं दुष्करम्।

पिता—अस्तु, को वा विषयः पत्रिकायां लेखनीयः? अहं त्वां लेखनप्रकारं शिक्षयामि।

सत्यमूर्तिः—परीक्षायाः फलमधिकृत्य काऽपि पत्रिका प्रेषणीयेति तेनाहमुक्तः। 'तथा करिष्यामि' इति मया तस्मै प्रतिश्रुतम्। अयमेव विषयः पत्रिकायां लेखनीयः।

पिता—तेन सह साक्षात् सम्भाषणे यानि वाक्यान्यवदिष्यः तत्र तान्येव लिख।

सत्यमूर्तिः—केन प्रकारेण लेखस्योपक्रमः कर्तव्यः?

पिता—समीचीनस्ते प्रश्नः। कथयामि तावत्। सर्वोऽपि लेखः स्वस्तिशब्देनारब्धव्यः। ततः पत्रिकालेखनस्थानं दिनं च विलिख्य अमुकनामकः अमुकनामानं प्रणिपत्य विज्ञापयतीति लेखनीयम्।

सत्यमूर्तिः—यदि कश्चिल्लेखः कनीयसे भ्रात्रे कनीयस्यै स्वस्रे वा प्रेष्यते कथं तत्र लेखनीयम्? न हि तत्र प्रणिपातो युज्यते।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पिता—जात! साधु पृष्टम्। तत्र तावत् आयुष्मन्तं भ्रातरं आशीर्वचनपूर्वकं निवेदयतीति न्यसनीयम्। पुत्रादिभ्यः पत्रिकालेखनेऽप्ययमेव क्रमः। गुरुजनेभ्यः प्रेष्यमाणे लेखे तु विनयप्रकर्षं द्योतयितुं साष्टाङ्गपातं प्रणिपत्य सविनयं विज्ञापयतीति निवेशनीयम्।

सत्यमूर्तिः—(सद्य एव लेखं लिखित्वा) तात! लिखितो लेखः। निरूपयतु भवान्॥

लेखः

॥ श्रीरामजयम् ॥

कल्पात्ती—पालघाट्

श्रीमुख संवत्सरे चैत्रशुक्लपञ्चमी

१९३२ एप्रिल् २०.

आयुष्मन्! स्वस्ति!

प्रियसुहृदं सत्यकीर्तिशर्माणं सत्यमूर्तिः प्रणिपत्य विज्ञापयति। भोः! प्रियसुहृत्! सर्वे वयं कुशलिनः। शुश्रूषामहे च भवद्वृत्तं कुशलम्॥

अस्माकं परीक्षायाः फलमद्य विद्यालये प्रकाशितं मया दृष्टम्। भवान् प्रथमत्वेनोत्तीर्णः। अहं तु द्वितीयत्वेन। भवतः संसर्गेणैव मया द्वितीयं स्थानमधिगतम्। तेन भवते बहु धार्याम्यहम्। सम्प्रति भवतो विरहेण नितरां दूयते मे हृदयम्। अतोऽविलम्बितेन प्रत्युत्तरेण मां प्रीणयितुमर्हति भवान्॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अपरं च, भवतो व्यवसायं विनयमुत्साहं परोपकारितां सत्यशीलतां मितभाषितां सामयिकतां च बह्वभिनन्दन्ति मे पितृपादाः। तत्तदवसरे मामुपदिशन्तस्ते भवन्तमेव निदर्शनतया दर्शयन्ति। यथापूर्वमागामिन्यपि वर्षेऽध्ययनार्थं भवतः धनसाहाय्यं ते करिष्यन्ति। अतः पुनरध्ययनारम्भकालेऽवश्यमेव भवता समागन्तव्यम्। वर्धतां नौ सौहार्दम्॥

इति भवदीयं मित्रम्,
सत्यमूर्तिः॥

श्रीयुत सत्यकीर्तिः,
नं ६४ संस्कृत कलाशाला वीथी
मैलापूर्, मद्रास्-६०० ००४.

---

१) प्रश्नाः—१. कथं लेखस्योपक्रमः कर्तव्यः? २. कनीयसे भ्रात्रे लिख्यमानायां पत्रिकायामादरणीयो विशेषः कः? ३. किञ्चन पत्रं मात्रे पित्रे भ्रात्रे स्वस्रे जामात्रे वा लिखत॥

२) एकपदीकुरुत—लब्धुमिच्छन्. स्वस्य इदम्, परस्य इदम्। अन्यस्य इदम्, महत् अरण्यम्, मृतेन तुल्यम्॥

३) सुखेन कर्तुं शक्यम्=सुकरम्। दुःखेन कर्तुं शक्यम्=दुष्करम्। एवं सुलभः. दुर्लभः इत्यादयः द्रष्टव्याः॥

४) १. सुहृदः भावः=सुहृत्ता, सुहृत्वम्, सौहार्दम्,
२. सुभगस्य भावः=सुभगता, सुभगत्वम्, सौभाग्यम्।
३. सुजनस्य भावः=सुजनता, सुजनत्वम्, सौजन्यम्॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

५) कृत्प्रत्ययान्ताः—

लिख् to write = (लिखति) लिखितः, लिखितवान्, लिखन्, लिख्यमानः, लिखित्वा-लेखित्वा, विलिख्य, लेखितुम्, लेखनीयम्, लेखितव्यम्।

पठ् to study = (पठति) पठितः, पठितवान्, पठन्, पठ्यमानः, पठित्वा, प्रपठ्य, पठितुम्, पठनीयम्, पठितव्यम्।

६) पर्यायाः—

लिपिः २—लिखिताक्षरविन्यासे लिपिर्लिविरुभे स्त्रियौ।

प्रश्नः ३ / उत्तरं २ } प्रश्नोऽनुयोगः पृच्छा च प्रतिवाक्योत्तरे समे॥

उद्यत *ā* intent on
समापित *ppp.* completed
सम्मुख *d* front
प्रतिश्रुत *a* promised
विषय *m* subject matter
उपक्रम *m* beginning
समीचीन *a* right, good
अमुक *a* a person or thing, so and so, (To be used when a person or thing is referred to without a name.)
विनयप्रकर्ष *m* high modesty
विरह *m* separation
अविलम्बित *a* prompt
व्यवसाय *m* Industry
मितभाषिता *f* measured speech
सामयिकता *f* punctuality
निदर्शन *n* an example.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

११. अयः

लोके तावत् सुवर्णं रजतं ताम्रं पित्तलं अयः सीसमित्येवंविधा बहवो लोहाः सन्ति। ते तत्तदाकरेषु मृदा लोहान्तरेण वा व्यामिश्रा उपलभ्यन्ते, न तु शुद्धरूपाः। तादृशास्ते खनिभ्यः उद्धृत्य संस्क्रियन्ते। संस्कृताश्च ते जनानामुपयोगाय कल्पन्ते। तेषां मध्येऽस्य एवात्यन्तमुपयुक्तो लोहः॥

अयस्तावद् भूम्यन्तर्भागे शिलाखण्डैः सह सम्मिश्रमासाद्यते। तानि च शिलाखण्डान्युत्खाय चूर्णपेषं पिष्ट्वा द्रवीकृत्य शुद्धमयः सम्पाद्यते। अत एवेदं 'अश्मसारः' इत्यभिधीयते। तच्च भूमण्डले सर्वत्र प्रभूततयाऽधिगम्यते। तस्मादस्य लोहस्य मूल्यमत्यल्पम्॥

अयसः प्रयोजनानीयत्तया निर्देष्टुमशक्यानि। यद्यपि सुवर्णादयो लोहा अप्यस्माकमुपयुक्ता एव तथापि तैर्विना वयं जीवितुं शक्नुयाम। अयसा विना त्वस्माकं लोकयात्रैव दुष्करा स्यात्। कृषिं कर्तुं गृहादिकं निर्मातुं च न प्रभवेम॥

अस्माकं खननोपयुक्तानि खनित्रपिटकादीनि, तक्षणोपयुक्तानि वृक्षादनादीनि, व्रश्चनोपयुक्तानि परशुकुठारादीनि, च्छेदनोपयुक्तानि छुरिकादीनि, कर्तनोपयुक्तानि कर्तर्यादीनि चायसा क्रियन्ते॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अपि चाद्यत्वे नानाविधानि यन्त्राण्ययसा निर्मीयन्ते। अयसोऽभावे वाष्पशकटादीनां कथैव न स्यात्। साम्प्रतिको नागरिकपरिष्कारः सर्वोऽप्ययोमूलकः। आयसैरुपकरणैर्विना सुवर्णकारादयोऽपि स्वस्वकर्माणि कर्तुं न शक्नुवन्ति ॥

योऽयसा तत्तदुपकरणानि करोति सोऽयस्कार इत्युच्यते। अयस्कारोऽस्माकमुपयुक्तानि भर्जनकपालानि विविधान्यन्यानि च पात्राणि करोति। इत्थमल्पमूल्योऽप्यश्मसारो जनानाममूल्यो लोहः ॥

---

१) प्रश्नाः—१. प्रधानभूता लोहाः के? २. अयसः उत्पत्तिः कथम्? ३. अयसः प्रयोजनानि कानि? ४. को नामायस्कारः? ५. स कानि वस्तूनि करोति?

२) लोहान्तरेण, अल्पमूल्यः, अमूल्यम्, अयोमूलकः—एषां विग्रहवाक्यानि निर्दिशत ॥

३) अभूततद्भावार्थकाःच्विप्रत्ययान्ताः—

१. अद्रवं द्रवं सम्पद्यमानं कृत्वा = द्रवीकृत्य।
२. अनन्धमन्धं सम्पद्यमानं करोति = अन्धीकरोति-
३. अखलः खलः सम्पद्यमानो भवति = खलीभवति।
४ अपटुः पटुः सम्पद्यमानो भवति = पटूभवति ॥

४. कृत्प्रत्ययान्ताः—

१. पिष् to grind = (पिनष्टि) पिष्टः, पिष्टवान्, पिंषन्, पिष्यमाणः, पिष्ट्वा, निष्पिष्य, पेष्टुम्, पेषणीयम्, पेष्टव्यम् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२. सह् to tolerate = (सहति, सहते) सोढः, सोढवान्, (सहन्, सहमानः), सह्यमानः, सोढ्वा, प्रसह्य, सोढुम्, सोढव्यम्, सहनीयम्, सह्यम् ॥

५) पर्यायाः—

खनिः २—खनिः स्त्रियामाकारः स्यात् ।

अयः ५—अयोऽश्मसारो लोहोऽस्त्रीपिण्डं कालायसं तथा ।

बहु १२—प्रभूतं प्रचुरं प्राज्यमदभ्रं बहुलं बहु ।
पुरुहूः पुरु भूयिष्ठं स्फारं भूयश्च भूरि च ॥

अयस् *n* iron
सीस *n* lead
लोह *m* a metal
आकर *m* खनि *f* a mine
व्यामिश्र *a* mixed
इयत्ता *f* fixed measure
लोकयात्रा *f* the course of worldly life
खनित्र *n* a spade
तक्षण *n* paring, cutting
वृक्षादन *n* a carpenter's [chise]
व्रश्चन *n* cutting
परशु *m* an axe
छुरिका *f* a knife
कर्तन *n* lopping, cutting
कर्तरी *f* scissors
वाष्पशकट *m. n.* a steam carriage
साम्प्रतिक *a* modern
अयस्कार *m* an ironsmith
भर्जनकपाल *m* a fryingpan
सुवर्णकार *N. m* a goldsmith
अल्पमूल्य *a* of small value, cheap
अमूल्य *a* priceless, invaluable
अश्मसार *m. n.* iron.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१२. मैत्री

मृगा मृगैः सङ्गमनुव्रजन्ति गावश्च गोभिस्तुरगास्तुरङ्गैः ।
मूर्खाश्च मूर्खैः सुधियः सुधीभिः समानशीलव्यसनेषु सख्यम् ॥१

(पञ्चतन्त्रात्)

उदयन्नेव सविता पद्मेष्वर्पयति श्रियम् ।
विभावयन् समृद्धीनां फलं सुहृदनुग्रहम् ॥ २

(चन्द्रालोकात्)

परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।
वर्जयेत् तादृशं मित्रं विषकुम्भं पयोमुखम् ॥ ३

(चाणक्यनीतेः)

व्यतिषजति पदार्थानान्तरः कोऽपि हेतु-
र्न खलु बहिरुपाधीन् प्रीतयः संश्रयन्ते ।
विकसति हि पतङ्गस्योदये पुण्डरीकं
द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः ॥ ४

(उत्तररामचरितात्)

आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमुपैति पश्चात् ।
दिनस्य पूर्वार्धपरार्धभिन्ना छायेव मैत्री खलसज्जनानाम् ॥ ५

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

क्षीरेणात्मगतोदकाय हि गुणा दत्ताः पुरा तेऽखिलाः
क्षीरे तापमवेक्ष्य तेन पयसा स्वात्मा कृशानौ हुतः ।
गन्तुं पावकमुन्मनास्तदभवद्दृष्ट्वा स्वमित्रापदं
युक्तं तेन जलेन शाम्यति सतां मैत्रीपुनस्त्वीदृशी ॥ ६
(नीतिशतकात्)

---

१) प्रश्नाः—१. के कैः सह सङ्गमनुव्रजन्ति ? २. तेन किं ज्ञायते ? ३. उदयन्नेव सविता किं करोति ? ४ स किं विभावयंस्तथा करोति ? ५. कीदृशं मित्रं वर्जयेत् ? ६ पदार्थान् को व्यतिषजति ? ७. प्रीतयः कान् न संश्रयन्ते ? अत्र को दृष्टान्तः ? ८. खलसज्जनानां मैत्री कीदृशी ? ९. सतां मैत्री कीदृशी ?

२) भावार्थकप्रत्ययान्ताः—
१. मित्रस्य भावः = मित्रता, मित्रत्वम्, मैत्री ।
२. सख्युः भावः = सखिता, सखित्वम्, सख्यम् ।
३. सुहृदः भावः = सुहृत्ता, सुहृत्वम्, सौहार्दम् ॥

३) सुधियः, कार्यहन्ता, विषकुम्भः, हिमरश्मिः, उन्मनाः, आरम्भगुर्वी—एषां विग्रहवाक्यानि लिखत ॥

४) द्वन्द्वसमासः—
१. खलाश्च सज्जनाश्च = खलसज्जनाः ।
२. सूर्यश्च चन्द्रश्च नक्षत्राणि च = सूर्यचन्द्रनक्षत्राणि ।
३. कुन्दं च इन्दुश्च तुषारश्च = कुन्देन्दुतुषाराः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

५) अव्ययीभावसमासः—

१. अक्षि प्रति = प्रत्यक्षम् । ३. अक्षणः पश्चात् = अन्वक्षम् ।
२. अक्षणः परम् = परोक्षम् । ४. अक्षे इति = अध्यक्षम् ॥

६) गुरुः, लघु, बहुः, मृदुः—एषां स्त्रीलिङ्गे रूपाणि निर्दिशत ॥

७) पर्यायाः—

सख्यम् २—सख्यं साप्तपदीनं स्यात् ।
सखा ३—स्निग्धो वयस्यः सवया अथ मित्रं सखा सुहृत् ॥

८) नानार्थाः—पतङ्गः = पक्षी, सूर्यः च ॥

मैत्री *N. f.* friendship
विभावयत् *pr. a. p.* considering
सभृद्धि *f* prosperity
पयोमुख *a* having milk in the mouth
व्यतिषजति *P.* joins
आन्तर *a* internal
वहिरुपाधि *m* external attributes
पतङ्ग *m* the Sun. also a bird
द्रवति *P.* gets melted
हिमरश्मि *N. m.* the cool-rayed, the Moon
चन्द्रकान्त *m* moon-stone
क्षयिणी *a* diminishing
पूर्वापरार्धभिन्न *a. f.* divided by the former and latter half of the day
कृशानु, पावक *m* fire
उन्मनस् *a* eager.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१३. गुरुभक्तिमहिमा

धौम्यस्य महर्षेः शिष्य उपमन्युर्नाम। तं चोपाध्यायः प्रेषयामास—'वत्स! उपमन्यो! गा रक्ष'—इति। स उपाध्यायस्य वचनादरक्षद्गाः। सोऽहनि रक्षित्वा दिवसक्षये गृहमागम्योपाध्यायस्याग्रतः स्थित्वा नमश्चक्रे॥

तमुपाध्यायः पीवानमपश्यत्। अपृच्छच्चैनम्—'वत्स। उपमन्यो! केन वृत्तिं कल्पयसि? भृशं पीवाऽसि। कथम्?'—इति। स उपाध्यायं प्रत्युवाच—'भोः! भैक्षेण वृत्तिं कल्पयामि'—इति। तमुपाध्यायोऽब्रवीत्—'मह्यमनिवेद्य भैक्षं नोपभोक्तव्यम्'—इति। स तथोक्तो भैक्षं चरित्वोपाध्यायाय न्यवेदयत्। स तस्मादुपाध्यायः सर्वमेव भैक्षमगृह्णात्।

—4

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

स तथा कृत्वा पुनररक्षद्गाः। अहनि रक्षित्वा निशामुखे गुरुकुलमागत्य गुरोरग्रतः स्थित्वा नमश्चके। तमुपाध्यायस्तथापि पीवानमेव दृष्ट्वोवाच—वत्स! उपमन्यो! सर्वमशेषतस्ते भैक्षं गृह्णामि। केनेदानीं वृत्तिं कल्पयसि?'—इति। स उपाध्यायं प्रत्युवाच—'भगवते निवेद्य पूर्वम्, अपरं चरामि। तेन वृत्तिं कल्पयामि'—इति। तमुपाध्याय उवाच—'नैषा न्याय्या वृत्तिः। अन्येषां भैक्षोपजीविनां वृत्त्युपरोधं करोषि। एवं वर्तमानो लुब्धोऽसि'—इति॥

स तथेत्युक्त्वा गा अरक्षत्। रक्षित्वा च सायं गृहमागम्योपाध्यायस्याग्रतः स्थित्वा नमश्चके। तमुपाध्यायस्तथापि पीवानमेव दृष्ट्वा पुनरुवाच—'वत्स! उपमन्यो! अहं ते सर्वं भैक्षं गृह्णामि। न चापरं चरसि। पीवाऽसि भृशम्। केनेदानीं वृत्तिं कल्पयसि?'—इति। स एवमुक्तस्तमुपाध्यायं प्रत्युवाच—'भोः! एतासां गवां पयसा वृत्तिं कल्पयामि'—इति। तमुवाचोपाध्यायः—'नैतन्न्याय्यं पय उपभोक्तुम्। भवतो मया नाभ्यनुज्ञातम्' इति॥

स तथेति प्रतिज्ञाय गा रक्षित्वा पुनरुपाध्यायस्य गृहमेत्य गुरोरग्रतः स्थित्वा नमश्चके। तमुपाध्यायः पीवानमेव दृष्ट्वोवाच—'वत्स! भैक्षं नाश्नासि। नापरं चरसि। पयो न पिबसि। भृशं पीवरोऽसि। केनेदानीं वृत्तिं कल्पयसि'—

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

इति। स उपाध्यायं प्रत्युवाच—'भोः! फेनं पिबामि यमिमे वत्सा मातॄणां स्तनं पिबन्त उद्गिरन्ति'—इति। तमुपाध्यायोऽब्रवीत्—'एते त्वदनुकम्पया गुणवन्तो वत्साः प्रभूततरं फेनमुद्गिरेयुः। तदेतेषामपि वत्सानां वृत्त्युपरोधं करोष्येवं वर्तमानः। फेनमपि त्वं न पातुमर्हसि—इति॥

स तथेति प्रतिश्रुत्य निराहारः पुनररक्षद्गाः। तथा प्रतिषिद्धो भैक्षं नाश्नाति। नान्यच्चरति। पयो न पिबति। फेनं नोपयुङ्क्ते। स कदाचिदरण्ये क्षुधार्तोऽर्कपत्राण्यभक्षयत्। स तैरर्कपत्रैर्भक्षितैः क्षारतिक्तकटुरूक्षैः उपहतचक्षुरन्धो बभूव। ततः सोऽन्धश्चङ्क्रम्यमाणः कूपे पपात॥

अथ तस्मिन्ननागच्छति, सूर्ये चास्ताचलावलम्बिन्युपाध्यायः शिष्यानवोचत्—'मयोपमन्युः सर्वतः प्रतिषिद्धः। स नियतं कुपितस्ततो नागच्छति चिरगतः। अतः सोऽन्वेष्टव्यः'—इति। तत उपाध्यायः शिष्यैः सार्धमरण्यं गत्वा तस्याह्वानाय शब्दं चकार—'भो! उपमन्यो! क्वासि वत्स? एहि'—इति॥

स उपाध्यायस्याह्वानं श्रुत्वा प्रत्युवाचोच्चैः—'अयमस्मि कूपे पतितः?—इति। तमपृच्छदुपाध्यायः—'कथं त्वमस्मिन् कूपे पतितः?—इति। स उपाध्यायमुवाच—'अर्कपत्राणि भक्षयित्वा अन्धीभूतोऽस्मि। अतश्चङ्क्रम्यमाणः कूपे पतितः'—इति। तमुपाध्याय उवाच—'अश्विनौ स्तुहि। तौ देवभिषजौ त्वां चक्षुष्मन्तं कर्तारौ'—इति॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

स एवमुक्त उपाध्यायेनोपमन्युः विविधैः स्तवैरश्विनौ तुष्टाव। तेन तुष्टावश्विनावाजग्मतुः। आहतुश्चैनम्—'प्रीतौ स्वः। एष तेऽपूपः। अशानैनम्'—इति। स एवमुक्तः प्रत्युवाच—'नानृतमवोचतां भगवन्तौ। न त्वहमेनमपूपं भक्षयितुमुत्सहे गुरवेऽनिवेद्य'—इति॥

ततस्तमश्विनावब्रूताम्—'पूर्वं कदाचिद्भवत उपाध्यायेनाप्येवमेवाभिष्टुताभ्यामावाभ्यां तस्मा अपूपो दत्तः। सोऽपूपः आवयोः पुरस्तात् तेनोपयुक्तो गुरवेऽनिवेद्य। त्वमपि तथैव कुरुष्व यथा कृतमुपाध्यायेन'—इति। स एवमुक्तः प्रत्युवाच—'भोः! अश्विनौ? नानृतमाहतुर्भवन्तौ। अथापि नोत्सहेऽहमनिवेद्य गुरवेऽपूपमुपयोक्तुम्'—इति॥

अश्विनावाहतुः—'प्रीतौ स्वस्तवानया गुरुभक्त्या। त्वं चक्षुष्मान् भविष्यसि, श्रेयश्चावाप्स्यसि'—इति। स एवमुक्तोऽश्विभ्यां लब्धचक्षुः उपाध्यायसकाशमागत्याभ्यवादयत्। आह चैनमुपाध्यायः—'वत्स! उपमन्यो! एषः सर्वतः प्रतिषेधः तव गुरुभक्ति परीक्षणार्थमेव। तव असाधारण्या गुरुभक्त्या अहं अत्यन्तं सन्तुष्टः। तस्मात् यथाऽश्विनावाहतुस्तथा त्वं श्रेयोऽवाप्स्यसि। सर्वे च ते वेदाः प्रतिभास्यन्ति, सर्वाणि च धर्मशास्त्राणि'—इति॥

एवं उपाध्यायेन परीक्षितस्य भक्ताग्रेसरस्य उपमन्योः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सर्वे वेदाः सर्वाणि धर्मशास्त्राणि च प्रतिभान्ति स्म। अहो गुरुभक्तिमहिमानं पश्यत!!

(श्रीमन्महाभारते आदिपर्वणः संगृहीतम्)

---

१) प्रश्नाः—१. गाः पालयन्नुपमन्युः कां वृत्तिमकल्पयत्? २. किं निमित्तं स उपाध्यायेन तत्तद्वृत्तेः प्रत्यषेधि? ३. सर्वतः प्रतिषिद्धः स किमकरोत्? ४. अश्विनावागत्य किमाहतुः? ५. स किं प्रत्युवाच? ६. स कथं लब्धचक्षुरभवत्? ७. उपाध्यायस्तं किमाह?

२) उपहतचक्षुः, लब्धचक्षुः, निराहारः, महर्षिः क्षारतिक्तकटुरूक्षैः, अन्धीभूतः—एषां विग्रहवाक्यानि लिखत॥

३) मतुप्प्रत्ययान्ताः—
१. गुणः अस्यास्तीति = गुणवान्।
२. चक्षुषी अस्य स्त इति = चक्षुष्मान्।

४) न्यायात् अनपेतम्=न्याय्यम्। एवं धर्म्यपथ्यशब्दौ द्रष्टव्यौ॥

५) कृत्प्रत्ययान्ताः—
१. गॄ to swallow=(गिरति) गीर्णः, गीर्णवान्. गिरन्, गीर्यमाणः, गीर्त्वा, निगीर्य- गरितुम, गरीतुम्, गिरणीयम्, गरितव्यम्।
२. कॄ to scatter=(किरति) कीर्णः. कीर्णवान्. किरन्. कीर्यमाणः. कीर्त्वा. विकीर्य. करितुम्. करीतुम्. किरणीयम्, करितव्यम्॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

६) पर्यायाः—

कदाचित् २—कदाचिज्जातु ।
सह ७—सार्धं तु साकं सत्रा समं सह ।
भैक्ष २—भैक्षं भिक्षाऽर्थनाऽर्हना ॥

पीवन् *a. m.* fat, fleshy
वृत्ति *f.* livelihood
अनिवेद्य *in.* without making known
निशामुख *n.* night-fall
वृत्त्युपरोध *m* impediment to the means of subsistence
लुब्ध *m.* avaricious
अभ्यनुज्ञात *ppp.* allowed
फेन *m.* foam
अर्कपत्र *n.* leaf of the Arka-plant
तिक्त *a.* bitter
चङ्क्रम्यमाण *a* walking tortuously
अस्ताचलावलम्बिन् *a.* resting on the अस्तमनपर्वत
नियतम् *in.* surely, certainly
अश्विनौ *m.* the twin sons of अश्विनौ—the wife of the Sun
अशान *P.* eat
लब्धचक्षुस् *a. m.* furnished with eyes.

---

१४. कालिदासस्य गुरुः

(प्रथमो भागः)

धाराधीशो भोजराजः परमो दानशौण्ड इति श्रुत्वा कश्चिदकिञ्चनो ब्राह्मणः स्वयमपि द्रविणाशया भोजसभां

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

जगाम। गच्छंश्च पथि यदृच्छया कालिदासेन दृष्टः पृष्टश्च स ब्राह्मणः स्वमनोरथं कथयामास ॥

तदाकर्ण्य कविपुङ्गवः कालिदासः—'भो! ब्राह्मण! भवान् कविः? आहोस्विच्छास्त्रज्ञः?'—इत्यप्राक्षीत्। महाभाग! नाहं कविर्नापि शास्त्रज्ञः, किन्तु दरिद्रोऽस्मि। दक्षिणार्थं मया राजान्तिकं गम्यते'—इति ब्राह्मणोऽभाणीत्। तच्छ्रुत्वा कालिदासः आह—'आर्य! भोजस्य राज्ञः सभायां कविभ्यः शास्त्रज्ञेभ्यश्च सम्भावना दीयते, न तु ब्राह्मणेभ्यो दक्षिणा। मन्ये तत्र त्वया वराटिकाऽपि न लभ्येत'—इति ॥

तस्य भाषितं निशम्य विषण्णो ब्राह्मणः—'भद्र? अप्यस्ति कश्चिदुपायो येन यत्कञ्चिद् द्रविणं मया राज्ञः सकाशाल्लभ्येत?—इति पप्रच्छ। जरसाऽऽक्रान्तं तमवलोक्य सञ्जातकरुणः कालिदास आह—'अस्त्युपायो यदि मद्वचनमनुवर्तसे'। ब्राह्मणः प्रत्यवोचत्—'बाढं भवदाज्ञामनुवर्तिष्ये'॥

इत्याभाष्य कालिदासस्तं ब्राह्मणं स्वगृहे समुपवेश्य तस्मिन् अहनि चिरेण राजसभामगमत्। राजा च चिरायागतं कालिदासं वीक्ष्य पप्रच्छ—'महाकवे! किंकृतोऽयं विलम्बः?'। कालिदासोऽवदत्—'राजन्! वाराणसीतश्चतुश्शास्त्रपारगा मम गुरुचरणाः समागताः। तेषां वरिवस्यायां प्रवृत्तस्य ममैतावान् विलम्बः'—इति ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

"हन्त! कालिदासस्यापि गुरुचरणा इति श्रोत्रामृतं वचनम्। अद्धा! धन्योऽस्मि" इत्याकलय्य राजा—'महाकवे! परमानन्दतुन्दिलाः स्मः। तेषामिह सन्निधानेन वयमात्मानं सभां च कृतकृत्यतां नेतुमभिलषामः। श्व एव तेषामिहागमनं भवतु'—इत्यवोचत्। कालिदासो ब्रवीति—'राजन्! तेषामिहागमनं दुश्शकं पश्यामि। यतस्ते सर्वदैव कर्मानुष्ठाननिरताः क्षणमपि विश्रान्तिं न लभन्ते। अथापि तेषामभिप्रायं विदित्वा भवन्तं निवेदयामि'—इति॥

ततः कालिदासो गुरोरभिप्रायं जिज्ञासमान इव गृहं गत्वा सायं प्रत्यागम्य—'राजन्! यदुक्तं मया तदवितथमेव। अथापि तावत् सनिर्बन्धं मयाऽभ्यर्थितास्ते—'अनुल्लङ्घनीया शिष्यप्रार्थना' इत्युक्त्वा श्वः समागमनं प्रत्यपद्यन्त। अथ तु ते पञ्चषानेव निमेषानत्र स्थास्यन्ति। मितभाषिणस्ते त्रिचतुराण्यक्षराणि भाषिष्यन्ते। यत्तैरुच्यते तच्छिरसा वोढव्यम्। न तु तत्रानुयोगः कार्यः'—इत्यवादीत्॥

तत् सर्वं 'तथैव' इत्यङ्गीकृत्य राजा धन्यमात्मानं मन्यमानः सन्तोषस्य परां काष्ठामधिरूढो माल्यतोरणादिभिः सभामलङ्कारयामास। आकारयामास च धारावास्तव्यान् महाजनान्॥

कालिदासोऽपि गृहं गत्वा ब्राह्मणमाहूय—"त्वामहं श्वो राजान्तिकं नेष्यामि। तत्र च राजानं दृष्ट्वा 'त्रिपीडा-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

परिहारोऽस्तु इत्येतावदुक्त्वा विष्टरे तूष्णीमासितव्यं त्वया"—इत्यवोचत्। ब्राह्मणस्तदुक्तमङ्गीकृत्य सर्वान् व्यापारान् परित्यज्य कालिदासोक्तान्यक्षराणि महता यत्नेन ओष्ठगतान्यकरोत्॥

---

१) प्रश्नाः—१. अकिञ्चनो ब्राह्मणः किमर्थं भोजसभां जगाम? २. कालिदासस्तं किमब्रवीत्? ३. कालिदासो राजानमुपगम्य किमवोचत्? ४ राजा तं किमवादीत्? ५. गृहं गत्वा कालिदासो ब्राह्मणमाहूय किमभ्यधात्?

२) अकिञ्चनः, मद्वचनम्, भवदाज्ञा, किंकृतः, पञ्चपाणि, ओष्ठगतानि—एषां विग्रहवाक्यानि निर्दिशत॥

३) द्विगुसमासः—

चतुर्णां शास्त्राणां समाहारः=चतुश्शास्त्रम्। एवं पञ्चपात्रम्, त्रिभुवनम्, त्रिलोकी, पञ्चवटी—इत्यादयो बोध्याः॥

४) उपमानपूर्वपदस्तत्पुरुषः—

१. कुन्दमिव धवला	=	कुन्दधवला।
२. घन इव श्यामः	=	घनश्यामः।
३. शिरीषमिव मृदुलम्	=	शिरीषमृदुलम्।

५) उपमानोत्तरपदस्तत्पुरुषः—

१. कविः	पुङ्गव	इव	=	कविपुङ्गवः।
२. पुरुषः	व्याघ्र	इव	=	पुरुषव्याघ्रः।
३. राजा	सिंह	इव	=	राजसिंहः।
४. मुखं	चन्द्रः	इव	=	मुखचन्द्रः॥

६) कृत्प्रत्ययान्ताः—

१. यम् to check=(यच्छति) यतः, यतवान्, यच्छन्, यन्यमानः, यत्वा, नियम्य, यन्तुम्, यमनीयम्, यन्तव्यम्।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२. दा to give = (यच्छति, ददाति) दत्तः, दत्तवान्, यच्छन्, (ददत्) दीयमानः, दत्वा, प्रदाय, दातुम्, दानीयम्, दातव्यम्, देयम् ॥

७) पर्यायाः—

दाता ४—स्युर्वदान्य स्थूललक्ष्य दानशौण्डा बहुप्रदे।

सभा ९—समज्या पर्षिद्गोष्ठी सभासमितिसंसदः।
आस्थानी क्लीवमास्थानं स्त्रीनपुंसकयोः सदः ॥*

शुश्रूषा ४—वरिवस्या तु शुश्रूषा परिचर्याप्युपासना ॥

दानशौण्ड *a. m.* munificent
द्रविणाशा *f.* desire for wealth
आहोस्वित् *in.* or
विषण्ण *a* dejected
वाढम् *in.* certainly
किंकृत *ppy.* due to what
पारग *a. m.* one who has gone to the end of, one who is completely familiar with
वरिवस्या *f* service
धन्य *a* blessed
सन्निधान *n* presence
कृतकृत्य *a* he who has achieved his desires
दुश्शक *a* impossible
अवितथ *a* not false
सनिर्बन्धम् *in* pressingly
प्रत्यपद्यन्त *A* agreed
पराकाष्ठा *f* the highes limit
ओष्ठगत *a* learnt by heart.

---

* सदः सकारान्तः शब्दः। नपुंसके मनः शब्दवत्, स्त्रीलिङ्गे सदाः वेधस् शब्दवत्

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१५. कालिदासस्य गुरुः

(द्वितीयो भागः)

अपरेद्युः कालिदासो ब्राह्मणं वेषभूषादिभिः परिष्कृत्य तेन सह राजसभां प्रतस्थे। ब्राह्मणं च पुरोभागे कृत्वा स्वयं तस्य पृष्ठतो भक्तिमान् शिष्य इव बद्धाञ्जलिर्जगाम।

राजा च सभाद्वारमागतं ब्राह्मणं सवाद्यघोषमन्तः प्रवेश्य सादरं सत्कृत्य दर्शितविनयस्तस्य पादयोः पपात। ब्राह्मणोऽप्यदृष्टपूर्वाणां राजसभावैभवानां दर्शनमात्रेण सम्भ्रान्तः कालिदासोक्तां परिपाटीं विस्मृत्य राज्ञः समक्षं 'त्रिपीडा अस्तु' इत्युक्त्वा विष्टरे समुपविष्टः॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तच्छ्रुत्वा राजा परिम्लानवदनः पादपीठीमपश्यत्। सभास्ताराः सर्वे स्मेरमुखा अभूवन्। प्रत्युत्पन्नमतिः कालिदासस्तु समुपस्थितामात्मनो दुरवस्थां परिजिहीर्षन्—'अहह! गुरुपादानां वचसः प्रकर्षः! अहो! वाग्देवतायाः प्रसादः! अहो! महाराजस्य सुकृतम्!—इति वदन् नर्तितुमारेभे॥

तदवेक्ष्य राजाऽब्रवीत्—'कालिदास! तव गुरुपादनां वचसोऽर्थ एव नास्माभिरधिगतः, किमुत प्रकर्षः। अर्थं तावद्वर्णय'—इति। कालिदास आह—'महराज! किं ब्रवीमि! कीदृशं ते भागधेयम्। अहो! आचार्याणां महाराजे प्रेमातिशयः। अहो गुरुचरणानां वचसो गाम्भीर्यम्! गुरुचरणानन्तरेण कस्य वाऽन्यस्य मुखचन्द्रादीदृशं वचनामृतं स्यन्देत! आचार्याणाम् अहो! पाण्डित्यस्य प्रकारः। श्रूयतां तावदस्यार्थः—

आसने विप्रपीडास्तु शिशुपीडाऽस्तु भोजने।
शयने दारपीडाऽस्तु त्रिपीडास्तु नरेन्द्र ते॥

इति व्याख्याय—"राजन्! इतोधिकं किमस्ति जनिमता जगत्यभ्यर्थनीयम्! अनेन हि भवान् सम्पदः सन्ततेरसंगितायाश्च भाजनतामुपनीतः'—इत्याचख्यौ॥

तदाकर्ण्य सर्वेऽप्यतिमात्रं चमत्कृताः कालिदासस्य गुरुं साक्षात् भगवत्याः सरस्वत्या अवतारममन्यन्त। राजाऽप्यतितरां तुष्टस्तस्मिन् द्रविणराशिं ववर्ष। कालिदासोऽपि रहस्य-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

भेदभयेन ब्राह्मणं सत्वरं गृहं नीत्वा रात्रौ निभृतं स्वदेशं प्रेषयामास ॥

---

१) प्रश्नाः—१. परेद्युः कालिदासः किं चकार? २. ब्राह्मणः किमुक्त्वा विष्टरे समुपविष्टः? ३. कालिदासः किं वदन् नर्तितुमारेभे? ४. तमवेक्ष्य राजा किमब्रवीत्? ५ कालिदासः किमाचख्यौ? ६. तदनन्तरं किं सम्भूतम्?

२) अवधारणपूर्वपदस्तत्पुरुषः—

१. मुखमेव	चन्द्रः	=	मुखचन्द्रः।
२. विद्यैव	धनम्	=	विद्याधनम्।
३. वचनमेव	अमृतम्	=	वचनामृतम्।

३) बहुव्रीहिः—

१. तप	एव	धनं	येषां	ते	= तपोधनाः।
२. मान	एव	धनं	येषां	ते	= मानधनाः।
३. शापः	एव	अस्त्रं	येषां	ते	= शापास्त्राः॥

४) सन् प्रत्ययान्ताः—

१. हर्तुमिच्छति = जिहीर्षति। ३. अत्तुमिच्छति = जिघत्सति।
२. हन्तुमिच्छति = जिघांसति। ४. ग्रहीतुमिच्छति = जिघृक्षति॥

५) कृत्प्रत्ययान्ताः—

१. भ्रम् to wander = (भ्राम्यति, भ्रम्यति, भ्रमति) भ्रान्तः, भ्रान्तवान् (भ्राम्यन्, भ्रम्यन्, भ्रमन्), भ्रान्त्वा; भ्रमित्वा, परिभ्रम्य, भ्रमितुम्. भ्रमणीयम्. भ्रमितव्यम्॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२. शम् to be calm = (शाम्यति) शान्तः, शान्तवान्, शाम्यन्, शान्त्वा, शमित्वा, उपशम्य, शमितुम्, शमनीयम्, शमितव्यम् ॥

६) पर्यायाः—

दर्शनं ५—निर्वर्णनं तु निध्यानं दर्शनालोकनेक्षणम् ।

परिपाटी ४—आनुपूर्वी स्त्रियां वावृत् परिपाटी अनुक्रमः ।

सभ्यः ४—सभासदः सभास्तारः सभ्याः सामाजिकाश्च ते ॥

वैभव *m* magnificience

परिपाटी *f* **क्रम** *m* succession, order

पादपीठी *f* a foot stool

समुपस्थिता *a. f.* that has occured

दुरवस्था *f* miserable state

परिजिहीर्षन् *pr a p.* desiring to avoid

सुकृत *n* virtuous act

विप्रपीडा *f* trouble from Brahmins. (When a man is rich enough and charitable Brahmins will approach him for gifts. By this, Kalidasa interprets, the Guru wishes that the King should become very rich and charitable).

शिशुपीडा *f* trouble from children. (By this Kalidasa says, the Guru wishes the King many children.)

दारपीडा *f* trouble from wives. (By this Kalidasa says, the Guru wishes full wedded life to the King.)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१६. क्षेत्रकर्षणम्

इह क्षेत्रं कृष्यते। इदं शालेयक्षेत्रम्। शालीनामुत्पत्तौ प्रभूतं जलमपेक्ष्यते। तस्माज्जलस्यावस्थानाय क्षेत्राणि परितः सेतवः क्रियन्ते। गोधूमादयस्तु नातीव जलमपेक्षन्ते। अतस्ते पर्वतसानुष्वपि समृद्धतया प्ररोहन्ति। शालयस्तु जलमयेषु निम्नप्रदेशेषु केवलमुत्पद्यन्ते॥



चित्रेऽस्मिन् कर्षणाय द्वौ वृषभौ हलस्य धुरि नियुक्तौ वर्तेते। क्वचिन्महिषावपि नियुज्येते। यूरोपखण्डेऽमेरिकाखण्डे च नियमेनाश्वौ बध्येते। अद्यत्वे कर्षणाय क्वचिद्यन्त्राण्युपयुज्यन्ते। शर्करिलानां निष्कुटादीनामुत्कर्षणार्थमायसानि लाङ्गलान्युपकल्पितानि॥

चित्रमवलोकय। स कर्षको हलस्य पश्चाद्दण्डं हस्तेन धृत्वा हलस्याग्रं भूमौ खनन् वृषभौ चोदयति। हलस्याग्रभागे

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

निशिताग्रो लोहफालः सङ्घटितः। तेन यदा वृषभौ गच्छतस्तदा हलस्याधस्तात् पञ्चषाङ्गुलखाता पद्धतिर्जायते। सैषा पद्धतिः 'सीता' इत्युच्यते॥

सकृत् कृष्टे क्षेत्रे मृत्तिका न मृदूभवति। अतो द्विस्त्रिर्वा कर्षणं क्रियते। द्विः कृष्टं क्षेत्रे द्विगुणाकृतमिति, त्रिः कृष्टं त्रिगुणाकृतमिति चोच्यते। द्विगुणाकृते त्रिगुणाकृते वा क्षेत्रे बीजान्युप्यन्ते। बीजावापात् परं सकृत् कृष्ट्वा क्षेत्रं फलकाकर्षणेन समीक्रियते। तदा बीजानि मृदन्तः पतितानि त्रिचतुरैर्दिनैरुद्भिद्यन्ते। उद्भिन्नाश्च शालयः सकृदुत्खाय प्रतिरोप्यमाणाः प्रभूतानि फलानि वितरन्ति। शालीनां मञ्जर्योऽत्यन्तं मनोहराः पचेलिमाः शालयो लवित्रैर्लूयन्ते॥

सैषा कृषिः देवमातृकायां भूमौ वर्षाकाले सकृत् सम्पाद्यते। नदीमातृकायां तु वर्षस्य द्विस्त्रिर्वा क्रियते। क्वचिज्जलस्याभ्युक्षणेन कृषिः सम्पाद्यते। सर्वासु वृत्तिषु कृषिरेव प्रधानतमा। कृषितो नास्ति दुर्भिक्षम्॥

तथा च सुभाषितरत्नाकरे हरं प्रति गौरीवचः—

रामाद्याचय मेदिनीं धनपतेर्बीजं बलाल्लाङ्गलं
प्रेतेशान्महिषं तवास्ति वृषभः फालं त्रिशूलं तव।
शक्ताऽहं तव चान्नदानकरणे स्कन्दोऽस्ति गोरक्षणे
खिन्नाऽहं हर भिक्षया कुरु कृषिं गौरीवचः पातु वः॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२१. गुरुभक्तकेसरी एकलव्यः

पुरा पाण्डवानामास्थाने द्रोणाचार्यो नाम कश्चिद्धनुर्वेदकोविदो बभूव। यः खलु पाण्डवान् कौरवानन्यांश्च क्षत्रियकुमारान् धनुर्विद्यामध्याप्य लोके विश्रुतिमवाप। यं यं सोऽशिक्षयत् स सर्वोऽपि परेषामधृष्योऽभूत्॥

गच्छति काले कदाचिदेकलव्यो नाम निषादकुमारस्तस्मात् शस्त्रविद्यामधिगन्तुकामस्तदन्तिकं प्राप्य विनयान्वितः साष्टाङ्गं प्रणिपत्य स्वाभीष्टं तस्मै व्यजिज्ञपत्। द्रोणाचार्यस्तस्य

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विनयेन प्रीतोऽपि तस्येच्छां निर्वोढुमक्षमस्तमाह—'नैषादे! अहं केवलं क्षत्रियकुलोत्पन्नान् शिक्षयामि। त्वं च निषादानां कुले समुत्पन्नः। अतस्ते शिक्षणमशक्यमेव'—इति॥

तच्छ्रुत्वा स निषादः सविषादोऽरण्यं प्रत्यगमत्। गत्वा च कुत्रचिदेकान्ते मृन्मयीं द्रोणाचार्यस्य प्रतिकृतिं प्रतिष्ठाप्य तस्याः पुरस्तात् सविनयो भूत्वा स्वयमेव शस्त्रविद्यां पर्यशीलयत्। कियतैव कालेन स बाणस्य सन्धाने मोचने संहरणे च परमं प्रावीण्यमध्यगच्छत्॥

अत्रान्तरे पाण्डवाः कदाचिन्मृगयार्थं तदेवारण्यं प्राविक्षन्। तानेकः सारमेयोऽप्यन्ववर्तत। धीरः स सारमेयः प्रविष्टमात्रस्तारं भषन्नितस्ततो धावन्नेकलव्यमभ्यद्रवत्। आस्यं व्यादाय भषतस्तस्य मुखे युगपदेकलव्यः सप्त शरान् प्रेरयामास। स च शरविद्धवदनो रक्तसिक्ताङ्गः सारमेयः पाण्डवानामभ्यर्णमगच्छत्॥

पाण्डवाश्च तं तादृगवस्थं दृष्ट्वा व्याकुलीभावमुपगताः सद्य एव तेन शुना दर्श्यमानमार्गा एकलव्यस्यान्तिकमुपेत्य बाणप्रयोगे तस्य लोकोत्तरं हस्तलाघवं वीक्ष्य विस्मिताः—'अये! कस्त्वम्? कस्य शिष्यः?'—इत्यप्राक्षुः। सोऽवादीत्—'आर्याः अहं निषादाधिपतेर्हिरण्यधनुषः पुत्रस्तत्रभवतो द्रोणाचार्यस्य शिष्यश्चास्मि'—इति॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तदाकर्ण्य पाण्डवास्तस्य शस्त्रविद्यानैपुण्येनात्मन्यवज्ञां कुर्वन्तो गृहं प्रत्यागत्य द्रोणाचार्यं सखेदमवादिषुः—'आचार्य! वयमेव भवतः शिष्येष्वप्रतिमाः शूरा इत्यसकृदुक्तवता भवता नूनं वञ्चिताः स्मः। यतो ह्यस्ति कश्चिदरण्यैकान्ते शस्त्रविद्यायामस्मानतिशयानो भवतः शिष्यो निषादकुमारः'—इति॥

तन्निशम्य द्रोणाचार्यः साश्चर्यहृदयः सद्य एव पाण्डवैः साकं वनमागत्यैकलव्यमपृच्छत्—'अये! कथं त्वमसि मम शिष्यः?—इति। एकलव्यः सप्रश्रयं प्रणिपत्य प्रत्युवाच—'आचार्य! अहं तावद्भवन्तमेवानुध्यायन् भवत एव च नैपुण्यमनुचिन्तयन् शस्त्रविद्यां पर्यचैषम्। तस्मात् ते शिष्य एवास्मि'—इति॥

द्रोणाचार्योऽब्रवीत्—'यदि त्वं मम शिष्यस्तर्हि देहि मे गुरुदक्षिणाम्'—इति। तस्य वचनं श्रुत्वैकलव्यः परं तुष्टः प्रत्यब्रवीत्—'आचार्य! असंशयं दातव्या गुरुदक्षिणा। परन्तु यथावत्ति दातुमिदानीमक्षमोऽस्मि। अथापि मत्सकाशे यदस्ति तदवश्यमेव दास्यामि। विस्रब्धं कथ्यतां यदपेक्षितम्'—इति। द्रोणाचार्योऽवदत्—'यदि तथ्यमुक्तं त्वया तर्हि तव दक्षिणहस्तस्याङ्गुष्ठं मे दक्षिणां कल्पय'—इति। एकलव्यो द्राग्नक्षरं स्वीयं दक्षिणहस्ताङ्गुष्ठं छित्त्वा सभक्ति द्रोणाचार्याय समर्पयामास॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

निरङ्कुशुष्ठ एकलव्यस्ततः परं शब्दप्रयोगेऽसमर्थो जातः। अथापि स आत्मानमनृणं मन्यमानः सुतरां मुमुदे। पाण्डवाश्च वीतचिन्ता अभूवन्। एकलव्यस्य गुरुभक्तिम्त्रैलोक्येऽप्यश्लाघ्यत॥

---

१) प्रश्नाः—१. एकलव्यः कः? २. स किमर्थं द्रोणाचार्यमुपगतः? ३. कुतस्तस्य प्रार्थना तेन प्रत्याख्याता? ४. तत एकलव्यः किमकरोत्? ५. मृगयार्थमरण्यं गतेषु पाण्डवेषु किं सम्भूतम्? ६. ते प्रत्यागत्य द्रोणाचार्यं किमवोचन्? ७. द्रोणाचार्यः किमकरोत्? ८. पाण्डवाः कथं वीतचिन्ताः अभवन्?

२) सविनयः, रक्तसिक्ताङ्गः, गुरुदक्षिणा, अक्षमः, अनृणः, असंशयम्, निरङ्कुशुष्ठः—एषां विग्रहवाक्यानि लिखत॥

३) एकपदीकुरुत—प्रवीणस्य भावः, लघोः भावः, गुरोः भावः, निपुणस्य भावः, पटोः भावः॥

४) कृत्प्रत्ययान्ताः—

१. द्रु to run=(द्रवति) द्रुतः, द्रुतवान्, द्रुवन्, उपद्रूयमाणः द्रुत्वा, अनुद्रुत्य, द्रोतुम्, द्रवणीयम्, द्रोतव्यम्।

२. स्मि to smile=(स्मयते) स्मितः, स्मितवान्, स्मयमानः, स्मित्वा, विस्मित्य, स्मेतुम्, स्मयनीयम्, स्मेतव्यम्॥

५) पर्यायाः—

धन्वी ६—धन्वी धनुष्मान् धानुष्की निषङ्गयस्त्री धनुर्धरः।
धनुः ६—धनुश्चापौ धन्व शरासन कोदण्ड कार्मुकम्।
बाणः १२—पृषत्क बाण विशिखा अजिह्मग खगाशुगाः।
कलम्ब मार्गण शराः पत्री रोप इषुर्द्वयोः॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कोविद *m* learned
विश्रुति *f* fame, celebrity
अधृष्य *a* invincible
निर्वोढुम् *in* to carry on
प्रतिकृति *f* an image
सन्धान *n* fixing arrow to the bow-string
मोचन *n* discharging
संहरण *n* withdrawing
भषत् *pr. a. p.* barking
व्यादाय *in.* having opened
अभ्यर्ण *n* vicinity
लोकोत्तर *a* extra ordinary
अवज्ञा *f* contempt
अप्रतिम *a* matchless
अतिशयान *pr. a. p.* excelling
अनुध्यायत् *p. a. p.* meditating on
विस्रब्धम् *in.* without hesitation
तथ्य *a* true
द्राग् *in.* at once
अनृण *a* free from debts.

* इषुः द्वयोः=इषुशब्दः पुंलिङ्गे स्त्रीलिङ्गे च ॥

---

२२. महाकवि भवभूतेः सूक्तयः

लौकिकानां हि साधूनामर्थं वागनुवर्तते ।
ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति ॥ १

ऋषयो राक्षसीमाहुर्वाचमुन्मत्तदृप्तयोः ।
सा योनिः सर्ववैराणां सा हि लोकस्य निर्ऋतिः ॥ २

कामं दुग्धे विप्रकर्षत्यलक्ष्मीं कीर्तिं सूते दुष्कृतं या हिनस्ति ।
शुद्धां शान्तां मातरं मङ्गलानां धेनुं धीराः सूनृतां वाचमाहुः ॥ ३

वज्रादपि कठोराणि मृदूनि कुसुमादपि ।
लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति ॥ ४

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वितरति गुरुः प्राज्ञे विद्यां यथैव तथा जडे
न तु खलु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति वा।
भवति हि पुनर्भूयान् भेदः फलं प्रति तद्यथा
प्रभवति शुचिर्बिम्बग्राहे मणिर्न मृदां चयः॥ ५
(उत्तररामचरितात्)

शास्त्रे प्रतिष्ठा सहजश्च बोधः प्रागल्भ्यमभ्यस्तगुणा च वाणी।
कालानुरोधः प्रतिभानवत्त्वमेते गुणाः कामदुघाः क्रियासु॥ ६
(मालतीमाधवात्)

तमांसि ध्वंसन्ते परिणमति भूयानुपशमः
सकृत्संवादेऽपि प्रथत इह चामुत्र च शुभम्।
अथ प्रत्यासङ्गः कमपि महिमानं वितरति
प्रसन्नानां वाचः फलमपरिमेयं प्रसुवते॥ ७

निसर्गतः पवित्रस्य किमन्यत्पावनं तव।
तीर्थोदकं च वह्निश्च नान्यतः शुद्धिमर्हतः॥ ८
(महावीरचरितात्)

---

१) प्रश्नाः—१. केषां वाक् अर्थमनुवर्तते। २. केषां च वाचमर्थोऽनुधावति? ३. सूनृतां वाचं धीराः कुतो धेनुमाहुः? ४. लोकोत्तारणां चेतांसि कीदृशानि? ५. प्राज्ञजडयोर्भेदं स्ववाक्यैर्वर्णयत। ६. "एते गुणाः कामदुघाः क्रियासु" के ते गुणाः? ७. प्रसन्नानां वाचः किं किं कुर्वन्ति? ८. "नान्यतः शुद्धिमर्हतः"—कौ?

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२) उपपदसमासः—

१. कामं दुहन्तीति = कामदुघाः। २. कुम्भं करोतीति = कुम्भकारः। ३. तत्वं जानातीति = तत्वज्ञः। ४. तन्तुं वयतीति = तन्तुवायः॥

३) कृत्प्रत्ययान्ताः—

१. मद् to be glad = (माद्यति) मत्तः, मत्तवान्, माद्यन्, मदित्वा, संमद्य- मदितुम्, मदनीयम्, मदितव्यम्॥

२. दृप् to be proud = (दृप्यति) दृप्तः, दृप्तवान्, दृप्यन्, —, दर्पित्वा, संदृप्य, दर्पितुम, दर्पणीयम्, दर्पितव्यम्॥

४) पर्यायाः—

लोकः ६—विश्वं तु जगती लोको विष्टपं भुवनं जगत्।
मनः ७—चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः।
निकृतः २—निकृतः स्यात् विप्रकृतः॥

लौकिक *a* worldly
राक्षसी *a* belonging to an evil spirit, demonical
दृप्त *a* arrogant
योनि *f* source, origin
निर्ऋति *f* an evil
प्रतिभान *n* readiness of wit
कामदुघ *a* granting every desired object
ध्वंसन्ते *V. A.* be removed
उपशमः *n* quietness
विप्रकर्षति *P.* drives
सूनृत *a* true, pleasant
वज्र *m. n. a* diamond
प्रतिष्ठा *f* accomplishment
प्रागल्भ्य *n* boldness
प्रत्यासङ्गः *m. n.* association
अपरिमेय *a* unlimited
निसर्गत *ind.* by nature
पावनं *a* purificatory
तीर्थोदकं *n* Holy water.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२३. जीर्णधनश्रेष्ठिनोः कथा

आसीत् व्याघ्रपुरे जीर्णधनो नाम वणिक्। तस्य पित्र्यं धनं यत्किञ्चिदासीत्। स तत् क्रमशो भोगेन क्षपितवान्। अथ द्रव्यक्षयात् तत्र वस्तुं लज्जमानो देशान्तरं गन्तुं मतिं चक्रे। तस्य गृहे लोहमयी पूर्वपुरुषार्जिता तुला काऽप्यासीत्। तां स्वमित्रस्य कस्यापि श्रेष्ठिनो गृहे न्यासं कृत्वा देशान्तरं गतः। बहून् वर्षांस्तत्र तत्रोषित्वा पुनः स्वपुरमाजगाम। आगत्य च श्रेष्ठिगृहं गत्वा–'श्रेष्ठिन्! मदीया निक्षेपतुला दीयताम्'—इति तं प्रार्थयत ॥

वञ्चकः श्रेष्ठी तु तां स्वयमपहर्तुमिच्छन् प्राह–'भोः! त्वदीया तुला कस्याश्चिद्रात्रौ मूषिकैर्भक्षिता। तद्गम्यताम्'–इति। तच्छ्रुत्वा धीमान् जीर्णधनश्चिन्तयामास–'न हि लोहमयीं तुलां मूषिका भक्षयितुं शक्नुवन्ति। अन्तः सत्यामेव तुलायामयमेवम् असत्यं वदति। अहो! अस्य वञ्चकस्य मूर्खतायाः प्रकारः। तत् केनोपायेन तुला मे सुलभा भवेत्? अस्तु, एवं करिष्ये'—इति ॥

अथ जीर्णधनः श्रेष्ठिनमुवाच—'सुमुख! नास्त्यत्र तवापराधो यदि तुला मूषिकैर्भक्षिता। ईदृश एवायं संसारः। न किमप्यत्र शाश्वतमस्ति। आस्तामेतत्। स्नातुं नदीं गमिष्यामि

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तदिमं तव बालं स्नानोपकरणहस्तं मया सह प्रेषय'—इति। सोऽपि मूढस्तुलालाभेन नितरां तुष्यन् बालमुवाच—'वत्स! 'अयं तव पितृव्यः स्नातुं नदीं याति। अनेन सह स्नानोपकरणान्यादाय गच्छ'—इति॥

अनन्तरं जीर्णधनस्तेन बालेन सार्धं नदीं जगाम। तत्र स स्नात्वा तं बालं नदीगुहायां सङ्क्षिप्य तद्द्वारं बृहत्या शिलयाऽऽच्छाद्य सत्वरं श्रेष्ठिगृहं गतः। अथ बालमदृष्ट्वा श्रेष्ठी तं पप्रच्छ—'कुत्र मे बालः?—इति। स एवं प्रतिवचनं ददौ—श्रेष्ठिन्! तव बालं नदीतटे समुपवेश्य स्नानमाचरति मयि कोऽपि श्येनः समागत्य बलात् तमपाहरत्'—इति। तच्छ्रुत्वा स आह—'मिथ्यावादिन्! किमेवमसम्भावितं भाषसे? किं क्वचिच्छ्येनो बालमपहरेत्? समर्पय मे सुतम्। अन्यथा न्यायसभायां निवेदयिष्यामि-इति। जीर्णधनः प्राह-'श्रेष्ठिन्! यथेच्छं समाचर। किं मया क्रियताम्। पश्यतो मे तव बालं श्येनोऽपहृत्य डयितः'—इति॥

एवं विवादमानौ द्वावपि न्यायसभां गतौ। तत्र श्रेष्ठी तारस्वरेण प्रोवाच—'भो! न्यायाध्यक्ष! मम शिशुरनेन चोरेणापहृतः—इति। तदाकर्ण्य न्यायाधिपो जीर्णधनं पप्रच्छ-'भोः! किमस्य शिशुस्त्वयाऽपहृतः?'-इति। स प्राह-'राजन्! नाहमस्य शिशुमपाहरम्। किन्तु पश्यतो मे नदीतटादस्य

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शिशुः श्येनेनापहृतः'—इति। न्यायाधिपः प्राह—'भोः! न सत्यमभिहितं भवता। किं श्येनो बालमपहरेत्?'—इति॥

अथ जीर्णधनः प्राह—

न्यासीकृतां लोहतुलां यत्र खादन्ति मूषिकाः।
राजंस्तत्र हरेच्छ्येनो बालकं नात्र संशयः॥

न्यायाधिपः कथमेतदिति पप्रच्छ। जीर्णधनः सर्वं वृत्तं यथावत् तस्मै न्यवेदयत्। तदाकर्ण्य न्यायाधिपो जीर्णधनमतीव प्रशशंस। तुलालोभिनं श्रेष्ठिनं च निष्कशतेन दण्डयामास॥

---

१) प्रश्नाः—१. जीर्णधनः किन्निमित्तं क्वचित् लोहतुलां न्यासीकृत्य देशान्तरं गतः? २. प्रत्यागतेन तेन लोहतुलां प्रार्थितः श्रेष्ठी किं प्रत्यवोचत्? ३. तद्वचनं श्रुत्वा जीर्णधनः किं चिन्तयामास? ४ स श्रेष्ठिनो वञ्चनाय किमकरोत्? ५. न्यायसभायां किं वृत्तम्?

२) जीर्णधनः, न्यायसभा, लोहमयी, देशान्तरम्, सुमुखः, निष्कशतम्—एषां विग्रहवाक्यानि वदत॥

३) एकपदीकुरुत—अपहर्तुमिच्छन्, सुखेन लब्धुं शक्या· मूर्खस्य भावः, निपुणस्य भावः॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

४) निर्दिष्टेषु पूर्वाणि वाक्यानि सतिसप्तमीत्वेन विपरिणमयत—

१. देवदत्तो भुङ्क्ते यज्ञदत्तः समागच्छति ।

२. वणिक् स्नानमाचरति, बालः श्येनेनापाह्रियत ।

३. गुरुरध्यापयति, शिष्यो निद्राति ।

४. अहं विद्यालयं गन्तुं प्रस्थितः, त्वं समागतः ॥

५) अनादरे षष्ठी—पश्यतो मे श्येनस्तव बालमपहृत्य पलायितः-पश्यन्तं मामनादृत्येत्यर्थः । एवंविधान्युदाहरणान्तराणि दर्शयत ॥

६) पर्यायाः—मृषा २—मृषा मिथ्या च वितथे ।

मूषिकः ३—उन्दुरुर्मूषिकोऽप्याखुः ।

श्येनः ३—पत्री श्येनः शशादनः ॥

लोहमयी *a.f.* made of iron
पूर्वपुरुषार्जिता *af.* procured by ancestors
तुला *f* a balance
श्रेष्ठिन् *m* merchant
न्यास *m* a pledge
निक्षेपतुला *f* a balance deposited
सङ्गोप्य *in* having concealed
श्येन *m* a hawk
असम्भावित *a* unimaginable
ढयित *ppp.* flew
निष्कशत *n* hundred gold coins

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२४. आस्तिकनास्तिकयोः संभाषणम्

आस्तिकः 'सुतीर्थो' नाम कश्चित् तैर्थयात्रिकः कदाचित् क्वचिदातपक्लान्तः कस्यचिन्न्यग्रोधतरोर्मूलं विश्रमायाससाद। तदा 'सुकेशी' नाम कश्चिन्नास्तिको ग्रामान्तरं जिगमिषुस्तेनैव पथाऽऽगत्य तत्रैव वटच्छायायां तस्थौ। तत्र तयोरयं सँल्लापः सम्प्रवृत्तः —

नास्तिकः—आर्य! कुतस्त्यो भवान्? कुत्र च प्रस्थितः?

आस्तिकः—सौम्य! अहं तावद्दाक्षिणात्यो विप्रः, तीर्थक्षेत्राटनार्थं प्रस्थितः। बहूनि तीर्थानि क्षेत्राणि च मया संदृष्टानि। इदानीं वाराणसीं प्रति गम्यते॥

नास्तिकः—आर्य! किमनेन कायक्लेशेन प्रयोजनम्? नूनमात्मा निरर्थकमायास्यते भवता॥

आस्तिकः—अये! अपष्ठूक्तं भवता। अस्ति खल्वीश्वरः सर्वसाक्षी योऽस्मभ्यं कर्मानुरूपं फलं यच्छति। यश्च खलु सुकृतिनः स्वर्गं दुष्कृतिनो निरयं च प्रापयति। तस्माल्लोकान्तरे सुखमभिलषद्भिरवश्यमेवानुष्ठेयमीदृशं कर्म॥

नास्तिकः—आर्य! अस्तीश्वर इति मुग्धालापोऽयं भवतः। न खल्वीश्वरमभिज्ञाः प्रमाणयन्ति। ईश्वरो नाम कश्चिन्नास्त्येव॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

आस्तिकः—शान्तम् पापम्। देवानांप्रियेण भवता सह भाषमाणोऽहं मुग्ध एव। अस्तु नमस्ते॥

नास्तिकः—आचार्य! मा स्म कुप्यः। इदं पृच्छामि—ईश्वरस्य सद्भावे किं मानम्?

आस्तिकः—त्वमज्ञः। ईश्वरोऽस्तीति श्रुतयः शास्त्राणि चोद्घोषयन्ति?

नास्तिकः—श्रुतयः शास्त्राणि चोन्मत्तप्रलपितानि। तान्यस्माकमप्रमाणानि॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

आस्तिकः—कुतस्तेषामप्रमाण्यमुच्यते ?

नास्तिकः—तानि ह्यस्माभिरदृश्यमानमर्थं प्रतिपादयन्ति। ईश्वरः, स्वर्गः, नरकं; पुण्यं, पापम्—इमानि को वा विश्वस्यात् ?

आस्तिकः—यद्यस्माभिरदृश्यमानं वस्तु नास्तीति ब्रूषे तर्हि यूरोपखण्डे यल्लण्डन् पुरंतन्नास्तीति ब्रूमः ॥

नास्तिकः—लण्डन् पुरमस्तीति पुस्तकेभ्योऽवगच्छामः ॥

आस्तिकः—तानि पुस्तकानि भ्रान्तप्रलपितानीति ब्रूमः ॥

नास्तिकः—आस्तामेतत्। लण्डन् पुरं साक्षात् दृष्टवन्तो जनाः सन्ति। ते कथयन्ति तदस्तीति। तस्मात् तस्य सद्भावः प्रतीयते ॥

आस्तिकः—तथैव साक्षात्कृतधर्माणो योगिनः कथयन्ति—ईश्वरोऽस्तीति। तस्मात् तस्य सद्भावः प्रत्येतव्यः ॥

नास्तिकः—दृष्टान्तोयं व्यामोहयति ॥

आस्तिकः—अन्यदपि तावत् कथयामि। अस्य पटस्य कर्ता न त्वया दृष्टः। सोऽस्ति वा न वा ?

नास्तिकः—अस्त्येव। अन्यथा हि कथमुत्पद्येतायं पटः ॥

आस्तिकः—एवं तर्ह्यवधारय—यथा हि घटपटादीनामुत्पत्तौ कुलालतन्तुवायादयः कर्तारो भवन्ति तथैवास्मान् परितो दृश्यमानानां वृक्षलतादीनामुत्पत्तौ कर्ता कश्चिदपेक्ष्यत एव। स एवेश्वरो नाम ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नास्तिकः—सन्ति खलु लोके केचिन्निरीश्वरवादिनः। किं ते मूर्खाः?

आस्तिकः—सर्वेऽपीश्वरस्य सद्भावमङ्गीकुर्वन्त्येव। पश्य! क्रैस्तवा मुसल्मानाश्चापि सर्वे सेश्वरवादिन एव॥

नास्तिकः—क्रैस्तवेषु न विद्वांसस्तस्य सद्भावमभ्युपगच्छन्ति॥

आस्तिकः—प्राप्ते हि भानुवासरे यो देवालयं न याति तादृशः क्रैस्तवो दुर्लभ एव॥

नास्तिकः—आर्य! अस्ति चेदीश्वरः स किंरूपः? कथं च द्रष्टव्यः?

आस्तिकः—प्रश्नः सुकरः; उत्तरं दुष्करम्। अथाप्यवधेहि—ईश्वरः सर्वव्यापी सर्वकर्ता सर्वद्रष्टा सर्वशक्तः सर्वज्ञश्च भवति। स च ज्ञानैकगम्यः। चक्षुर्भ्यां द्रष्टुमशक्य एव॥

नास्तिकः—नानामतीयाः खलु भिन्नभिन्नमीश्वरं प्रतिपादयन्ति। तत्र को वा तथ्य ईश्वरः?

आस्तिकः—साधु पृष्टं त्वया! मतभेदादीश्वरस्य नामानि परं भिद्यन्ते। ईश्वरस्तावदेक एव। तमेव केचिद्विष्णुरिति अपरे शिव इति, अन्ये बुद्ध इति चाहुः॥

उक्तं च हनुमन्नाटके—

यं शैवाः समुपासते शिव इति ब्रह्मेति वेदान्तिनो
बौद्धा बुद्ध इति प्रमाणपटवः कर्तेति नैयायिकाः।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अर्हन्नित्यथ जैनशासनरताः कर्मेति मीमांसकाः
सोऽयं वो विदधातु वाञ्छितफलं त्रैलोक्यनाथो हरिः
—इति ॥

नास्तिकः—आर्य! अस्ति चेदीश्वरः स मूढः। यतो ह्येतस्मिन्नतिमहति न्यग्रोधपादपेऽत्यल्पानि फलानि, मृणालकोमलायां तनीयस्यां कूष्माण्डलतायामतिमहान्ति फलानि च सृजन्नीश्वरो बालिश एव भवितुमर्हति। (एवमाचक्षाणे तस्मिन्नेकं वटफलं नास्तिकस्य शिरस्यपतत्। तदवलोक्यास्तिकस्तमाह—

आस्तिकः—पाषण्डहतक! विद्धीदानीमीश्वरस्य महिमानम्। न्यग्रोधवृक्षोऽयं छायार्थिभिः पथिकैः पशुभिश्च प्रतिक्षणमाश्रीयते। यद्यस्य फलानीश्वरः कूष्माण्डतुल्यान्यसृक्ष्यत् तर्हि तेषां पतनेन बहवः प्राणिनो व्यपत्स्यन्त। तादृश्या विपत्तेः परिरक्षितुं न्यग्रोधवृक्षोऽयं भगवता छायाप्रधानः सृष्टः ॥

नास्तिकः—आचार्य! सत्यमुपन्यस्तं भवता। तत्त्वमेव कथयन्ति श्रुतयः शास्त्राणि च। अस्तीश्वरः सर्वज्ञः। सोऽत्यन्तं क्रान्तदर्शी दयालुश्च। तस्यैव कारुण्येनाहमित सजीवो व्रजामि। नमो भगवते लोकस्य नियन्त्रे सर्वशक्ताय ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१) प्रश्नाः—१. आस्तिकनास्तिकयोः सँल्लापः कुत्र प्रवृत्तः ? २. ईश्वरस्य सद्भावः कथं प्रत्येतव्यः ? ३. ईश्वरः किं रूपः ? ४. न्यग्रोधवृक्षो भगवता किमिति छायाप्रधानः सृष्टः ? ५. ईश्वरमधिकृत्य हनुमन्नाटके किमुक्तम् ?

२) जिगमिषुः, तिष्ठासुः, विवक्षुः, चिकीर्षुः एषां विग्रहवाक्यानि निर्दिशत ॥

३) आस्ति दिष्टमिति मतिरस्य = आस्तिकः, one who believes in God and another world i.e., सेश्वरवादी ।

नास्ति दिष्टमिति मतिरस्य = नास्तिकः—An atheist. One who denies the existence of God and another world i.e. निरीश्वरवादी ॥

४) भवार्थक प्रत्ययान्ताः—

१. दाक्षिणात्यः । ३. पौरस्त्यः । ५. अत्रत्यः । ७. कुत्रत्यः ।
२. औत्तराहः । ४. पाश्चात्यः । ६. तत्रत्यः । ८. यत्रत्यः ॥

५) सुष्ठु, दुष्ठु, अपष्ठु—एतैर्वाक्यानि रचयत ॥

६) अलुक् समासः— देवानांप्रियः, दास्याःपुत्रः, ग्रामेवासः अग्रेसरः, सरसिजम्, पङ्केरुहम्, आत्मनेपदम्, परस्मैपदम् ॥

७) कृत्प्रत्ययान्ताः—

१. मुह् to faint = (मुह्यति) मुग्धः—मूढः, मुग्धवान्—मूढवान्, मुह्यन्, मुहित्वा—मोहित्वा, विमुह्य, मोहितुम्, मोहनीयम्, मोहितव्यम् ॥

२. क्रम् to step = (क्रमति) क्रान्तः, क्रान्तवान्, क्रमन्, क्रम्यमाणः, क्रमित्वा—क्रान्त्वा, उपक्रम्य, क्रमितुम्, क्रमणीयम्, क्रमितव्यम् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

८) पर्यायाः —

स्वर्गः १—स्वरव्ययम् स्वर्ग-नाक-त्रिदिव त्रिदशालयाः।
सुरलोको द्यौदिबौ द्वे स्त्रियां क्लीबे त्रिविष्टपम् ॥

नरकः २—स्यान्नारकस्तु नरको निरयो दुर्गतिः स्त्रियाम्।

पापम् ११—अस्त्री पङ्क पुमान् पाप्मा पापं किल्बिष कल्मषम्।
कलुषं वृजिनैनोऽघम् अंहो दुरितदुष्कृतम् ॥
(अस्त्री=पुंलिङ्गः, नपुंसकलिङ्गश्च। पुमान्=पुंलिङ्गः)

पुण्यम् ५—स्याद्धर्ममस्त्रियां पुण्य श्रेयसी सुकृतं वृषः ॥

वटः ३—न्यग्रोधो बहुपात् वटः ॥

कुतस्त्य *a. m*, whence come

आयास्यते *A.* is being troubled

अपष्टु *in.* falsely

मुग्धालाप *m* a silly talk

अभिज्ञ *a. m* the wise

प्रमाणयन्ति *P.* recognise

मान *n* authority, means of proof

श्रुति *f* the Vedas

उन्मत्तप्रलपित *n* the words of insane

तत्त्वदृश् *a.m.* he who has realised truth

व्याकुलयति *P.* confounds

पट *m* cloth

तन्तुवाय *m* a weaver

प्रमाणपटु *a. m.* skilled in the means of proof

नैयायिक *N. m* a logician

जैनशासनरत *a. m* he who is devoted to Jain scriptures

मृणालकोमला *a. f.* as soft as a lotus stalk

तनीयसी *a. f.* comparatively thin

बालिश *N. m.* a fool

पाषण्डहतक *m* a wretched heretic

क्रान्तदर्शिन् *a. m.* omniscient

नियन्तृ *m* regulator.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२५. राजा कविश्च

अहं च त्वं च राजेन्द्र! [1]लोकनाथावुभावपि।
[2]बहुव्रीहिरहं राजन्! [3]षष्ठीतत्पुरुषो भवान्॥ १
राजंस्त्वत्कीर्तिचन्द्रेण तिथयः पूर्णिमाः कृताः।
मद्देहान्न बहिर्याति तिथिरेकादशी भयात्॥ २
सर्वज्ञ इति लोकोऽयं भवन्तं भाषते मृषा।
पदमेकं न जानीषे वक्तुं नास्तीति याचके॥ ३
अपूर्वेयं धनुर्विद्याभवता शिक्षिता कथम्।
मार्गणौघः समायाति गुणो याति दिगन्तरम्॥ ४
यदस्ति तद्ददासीति नैतच्चित्रमवैम्यहम्।
भयं स्वप्नेऽपि ते नास्ति दत्तं तद्द्विषां कथम्॥ ५
सर्वदा सर्वदोऽसीति मिथ्या त्वं कथ्यसे जनैः।
नास्यो लेभिरे पृष्ठं न वक्षः परयोषितः॥ ६
यशोदयामण्डितकान्तदेहो बाल्येऽपि गोपालजनस्य नेता।
गोमण्डलं पासि बलेन युक्तः कथं न राजन्! पुरुषोत्तमोऽसि॥

---

[1] लोकनाथ is both a बहुव्रीहि and a षष्ठीतत्पुरुष समास।

[2] As बहुव्रीहि it qualifies the कवि, लोकः नाथः यस्य सः = He to whom the people are Lords.

[3] As षष्ठीतत्पुरुष it qualifies राजा, लोकस्य नाथः = The Lord of People.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१) प्रश्नाः—१. कथं राजा कविश्चोभावपि लोकनाथौ ? २. का कस्य गेहान्न बहिर्याति ? कुतो न बहिर्याति ? ३. "सर्वज्ञ इति लोकोऽयं भवन्तं भाषते मृषा" कुतः ? ४. "अपूर्वेयं धनुर्विद्या भवता शिक्षिता" कथमपूर्वत्वम् ? ५. "नैतच्चित्रम्" किं तत् ? ६. "सर्वदोऽसीति मिथ्या त्वं कथ्यसे" कुतः ? ७. राज्ञः पुरुषोत्तमत्वं कथम् ?

२) उपपदसमासः—

१. सर्वं जानातीति = सर्वज्ञः ।
२. सर्वं ददातीति = सर्वदः ।
३. गगने तिष्ठतीति = गगनस्थः ।
४. पुरः सरतीति = पुरःसरः ॥

३) कृत्प्रत्ययान्ताः—

१. पा to protect=(पाति) पातः, पातवान्, पान्, पायमानः, पात्वा, परिपाय, पातुम्, पानीयम्, पातव्यम् ॥

२. पा to drink=(पिबति) पीतः, पीतवान्, पिबत्, पीयमानः, पीत्वा, निपीय, पातुम्, पानीयम्, पातव्यम्, पेयम् ॥

३. घ्रा to smell=(जिघ्रति) घ्रातः—घ्राणः, घ्रातवान्—घ्राणवान्, जिघ्रन्, घ्रायमाणः, घ्रात्वा, आघ्राय, घ्रातुम्, घ्राणीयम्, घ्रातव्यम्, घ्रेयम् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

४) पर्यायाः—

भयम् ७—आतङ्कः स्याद्दरत्रासौ भीतिर्भीः साध्वसंभयम्।
शत्रुः १९—रिपु वैपौ सपत्नारिद्विषद् द्वेषण दुर्हृदः।
द्विड् विपक्षाहितामित्र दस्यु शात्रव शत्रवः।
अभिघाति परारति प्रत्यर्थि परिपन्थिनः॥

कीर्तिचन्द्र *m* the moon-like glory
मद्गेह *n* my house
अपूर्वा *a. f.* unprecedented
मार्गणौघ *m* the stream of arrows and also of beggars
गुण *m* a bow-string and also merit
दिगन्तर *n* the distant extremity
विद्विष् *m* an enemy
यशोदयामण्डितकान्तदेह *a.m.* He whose lovely body is adorned by Yasoda and also by यशस्=glory and दया=kindness
गोपालजन *m* cowherds and also princes
गोमण्डल *n* the multitude of cows and also kingdom
बल *m* Balarama and also (*n*) strength of force
पुरुषोत्तम *m* Lord Vishnu and also the best of men.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२६. शरणागतरक्षणम्

आसीत् पूर्वमुशीनरेषु धार्मिको दयालुः सत्यसन्धश्च शिबिर्नाम नरपतिः। यः खलु सर्वाणि भूतान्यात्मवत् पश्यन् न केवलं मनुष्यानेव किन्तु पशुपक्ष्यादीनपि प्रेम्णा पर्यपालयत्। इतरेषां प्राणिनां जायमानमुपद्रवमात्मन एवामन्यत॥

श्रूयते च—एकदा कश्चिच्छ्येनो बुभुक्षितः कपोतमेकमन्वधावत्। कपोतोऽपि श्येनाद्भीतो द्रुतं पलायमानः शिबिं राजानं शरणमगच्छत्। राजा च तमभयप्रदानेन सान्त्वयामास। तेन समयेन श्येनोऽपि द्रुतं धावन् राजान्तिकमाजगाम। उवाच च—'राजन्! बुभुक्षा मामत्यन्तं पीडयति: चिरादिमं कपोतमनुधावन्नस्मि। परं ग्रहीतुं नाशकम्। इदानीं मे मनोरथः फलितः। मुञ्च मे कपोतम्'—इति। राजाऽब्रवीत्—'विहगोत्तम! अयं तपस्वी कपोतो रक्षार्थं मामुपगतः। शरणागतस्य परिपालनमेव राज्ञः प्रथमो धर्मः। तस्मादिमं न मोक्तुमुत्सहे'—इति॥

श्येनोऽवदत्—'राजन्! यथाऽयं कपोतो रक्षार्थी तथाऽहमपि भिक्षार्थी त्वामुपपन्नः। शरणागतयोरेकस्य पुरस्कारः अन्यस्य तिरस्कारश्चायुक्तः। अपि च निराहारस्य मे द्वित्राणि दिनान्यतीतानि। यदि कपोतमिमं न मुञ्चसि तर्ह्यद्यैव मे प्राणा विपत्स्यन्ते। विपन्ने च मयि मम पुत्रा दाराश्चानाथा

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मरिष्यन्ति। तेन ते महानधर्मः स्यात्। अतो बहूनां रक्षणार्थं मुच्यतामयमेकः कपोतः'—इति। राजाऽऽचष्ट—'महाभाग! तव तावदन्यदेव भक्ष्यं कल्पयामि। तेन त्वं जीवितं धारयिष्यसि। कपोतश्चायं रक्षितो भविष्यति'—इति॥

श्येनोऽकथयत्—'राजन्! कपोतो नाम श्येनानां विधात्रा विहित आहारः। अतः कपोतादन्यैर्वस्तुभिर्न मे प्रयोजनम्'—इति। राजाऽऽह—अयि! पतत्रिन्! वृथाऽयं ते निर्बन्धः। मम जीवितस्य व्ययेनाप्यस्य प्राणाः परिरक्षणीया इति धीरो मे निश्चयः। अतः कपोतादन्यदभिमतं वस्तुयाचस्व। तत् ते दास्यामि—इति॥

श्येन आह—'राजन्! यदीदृशस्ते निश्चयः तर्हि मा नाम मुच्यतां कपोतः। तव शरीरस्य दक्षिणभागात् कपोतप्रमाणं मांसमुत्कृत्य मह्यं देहि। तद्भक्षणेनाहंतृप्तो गमिष्यामि—इति। तच्छ्रुत्वा राजा सन्तुष्टान्तरङ्गो यदि मद्देहमांसेनैकस्य प्राणिनो रक्षणं भविष्यति तर्हि कृतार्थं मे जनुरित्याभाष्य सविधे तिष्ठन्त्याः स्वभार्याया मुखे चक्षुः पातयामास॥

राजन्यपुत्री सा साध्वी पत्युराकूतमवगत्य तस्य विशदं यशः पालयितुमिच्छन्ती खड्गमादाय तस्य दक्षिणाङ्गान्येकैकशश्छित्वा मांसमादाय तुलामारोपयत्। यथा यथा मांसेनाऽपूर्यते तुला तथा तथा कपोतः गुरुतामुच्छति। शरीरस्य

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

दक्षिणभागः समग्रोऽप्यवसन्नः । तदानीं राज्ञो वामनयनादेकोऽश्रुबिन्दुः क्षितौ पपात । तदवलोक्य श्येनः—'राजन्! मांसदाने तवास्ति खेद इत्यश्रुबिन्दुः कथयति । नाहं ते मांसं गृह्णीयाम्'—इति वदन् प्रस्थितः ॥

राजा ब्रवीति—'महासत्व! अन्यथा न मन्तव्यं भवता। तुलायां कपोतमद्यापि गुरुतरं दृष्ट्वा दक्षिणभागस्येवात्मनोऽपीदानीं परं प्रयोजनं भविष्यतीति चिन्तयतो वामभागस्याविरासीत् प्रमोदः । तेनायं वामादक्ष्णः सन्तोषबाष्पः समजनि, न तु शोकबाष्पः । अतः कपोतस्यप्रतिनिधित्वेन मम कृत्स्नं शरीरमेव स्वीक्रियतामिति वदन् स्वयं तुलामारुरोह । तस्मिन्नेव क्षणे नभस्तः पुष्पवृष्टिः पपात । देवदुन्दुभयो नेदुः । सर्वे लोकाः साश्चर्या बभूवुः ॥

श्येनकपोतावपि दिव्यरूपधरौ भूत्वा—'राजन्! आवां वासवानलौ! तव भूतदयां परीक्षितुमागतौ । सत्यं दयालुरेवासि । चिरं विजयस्व'—इत्युक्त्वा स्वस्थानमारोहताम् । राजाऽपि देवतानां प्रसादेन सद्य एवाक्षताङ्गो भूत्वा प्रथितयशाश्चिरं राज्यं चक्कार ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१) प्रश्नाः—१. शिबिः कीदृशो नरपतिरासीत्? २. कस्तं शरणमगच्छत्? ३. श्येनो राजानमुपेत्य किमाह? ४. राज्ञा किमब्रवीत्? ५. श्येनः किमवदत्? ६. राजा किमाचष्ट? ७. श्येनः कपोतस्य प्रतिनिधितया किं प्रार्थयत? ८. राजा किं चकार? ९. तस्य भार्या किं व्यधात्? १०. राज्ञो नयनात् पतितमश्रुबिन्दुमवलोक्य श्येनः किं प्राह? ११. राजा किं प्रत्यवोचत्? तथोक्त्वा राजा किं चकार? १२. ततः किमभूत्? १३. तौ श्येनकपोतौ कौ; किमुक्तवन्तौ? १४. शरणागतपरिपालनधर्मेण राज्ञः को महिमा समभवत्?

२) सत्यसन्धः, विहगोत्तमः शरणागतः, निराहारः, कृतार्थः, दक्षिणभागः, श्येनकपोतौ—एषां विग्रहवाक्यानि लिखत॥

३) मत्वर्थीयप्रत्ययान्ताः—मायावी, मेधावी, स्रग्वी, यशस्वी॥

४) एकपदीकुरुत—आत्मना तुल्यम्, प्राणाः एषां सन्तीति, भोक्तुमिच्छा, धर्मं चरति॥

५) वि+जयति, प्र+तिष्ठति,, उप+क्रामति, वि+क्रीणाति, वि+वदति—एषां परिनिष्ठतरूपैर्वाक्यानि रचयत॥

६) 'तसिल्' प्रत्ययान्ताः—नभस्तः, नदीतः, ततः, इतः, कुतः॥

७) कृत्प्रत्ययान्ताः—

१. कृत् to cut=(कृन्तति) कृत्तः, कृत्तवान्, कृन्तन्, कर्तित्वा, निकृत्य, कर्तितुम्, कर्तनीयम्।

२. क्षण् to hurt=(क्षणोति) क्षतः, क्षतवान्, क्षण्वन्, क्षण्यमानः, क्षत्वा—क्षणित्वा, क्षणितुं क्षणनीयम्, क्षणितव्यम्॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३. क्षि to destroy=(क्षिणोति) क्षीणः-क्षितः, क्षीणवान्-क्षितवान्, क्षिण्वन्, क्षीयमानः, क्षित्वा, संक्षीय, क्षेतुम्, क्षयणीयम्, क्षेतव्यम्॥

८) पर्यायाः—

जन्म ६—जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भवः।
मांसम् ६—पिशितं तरसं मांसं पललं क्रव्यमामिषम्।
रक्तम् ७—रुधिरेऽसृग्लोहितास्रं रक्त क्षतज शोणितम्।
कपोतः ४—पारावतः कलरवः कपोतो रक्तलोचनः॥

उशीनर *m* name of a country
कपोत *m* a pigeon
विहगोत्तम *a. m.* the best of birds
रक्षार्थिन् *m* seeking protection
पुरस्कार *m* acceptance
तिरस्कार *m* rejection
विहित *ppp.* prescribed
पतत्रिन् *m* a bird
कपोतप्रमाण *a* with weight equal to the pigeon
उत्कृत्य *in.* having cut off
जनुस् *n* birth
राजन्य *m* क्षत्रिय
आकूत *n* intention
विशद् *a.n.* pure, spotless
ऋच्छति *P.* attains
अवसन्न *a* completed
खेद *m* disinclination
अनल *m* fire
भूतदया *f* compassion towards all beings
अक्षताङ्ग *a.m.* he whose body is not wounded

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२७. भारतवर्षम्

पुरा भरतनाम्ना चक्रवर्तिना परिपालनादस्य देशस्य भारतवर्षमिति व्यपदेशः सिद्धः। यदधुना 'इन्द्य' इति व्याहरन्ति तदस्य वैदेशिकैः कल्पितं नामधेयम्। भारतवर्षमिदं



यद्यप्येष्याखण्डस्यैकदेशत्वेन विभक्तं तथाप्यतिविशालतया देशान्तरेभ्यो विश्लिष्टतया च खण्डान्तरत्वेन विभागमर्हति।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तदिदं पूर्वतो वङ्गाब्धिना, दक्षिणतो भारतमहासागरेण, सिन्धु नदारभसमुद्राभ्याम्, उत्तरतो हिमालयश्रेण्या च परिगतं प्रायेण त्रिकोणाकारं भवति ॥

भारतखण्डस्यास्य दैर्घ्यं काश्मीरदेशात् कन्याकुमारी-पर्यन्तं पञ्चाशदुत्तरनवशतं (९५०) क्रोशाः विस्तारः, सिन्धु-मुखात् गङ्गामुखपर्यन्तं नवशतं (९००) क्रोशाश्च भवन्ति। इदं च भारतवर्षम् 'उत्तरापथः, इति 'दक्षिणापथः' इति च द्वेधा विभज्यते। आलेख्यं पश्यत—भारतवर्षस्य मध्यभागे पूर्वा परायतस्तिष्ठति। हिमाद्रेर्विन्ध्याद्रेश्चान्तराले भाग उत्तरापथः। विन्ध्याद्रिमारभ्य दक्षिणतः भागो दक्षिणापथः ॥

उत्तरापथः प्रायेण समभूभागः। हिमालयादुद्भूय बह्व्यस्तरङ्गिण्यो भूभागेऽस्मिन् प्रवहन्ति। तासु गङ्गाब्रह्मपुत्रा-भिधाने नद्यौ सिन्धुसमाख्यो नदश्च प्रधानभूताः। गङ्गासिन्धू हिमाद्रेरुद्भवतः। ब्रह्मपुत्रा तु हिमाचलगतां सुरङ्गामार्गमा-श्रित्य तिबेतदेशात् प्रवहति। उत्तरापथोऽयं विविधानां पुण्यतीर्थानां पुण्यक्षेत्राणां चायतनत्वात् पुण्यभूमिरिति, आर्याणामधिवासत्वादार्यावर्त इति च व्यपदिश्यते ॥

दक्षिणापथः पर्वतैर्नदीभिश्चाकीर्णः सस्याढ्यो देशः। मुम्बापुरादारभ्य कन्याकुमारीपर्यन्त पश्चिमपर्वतावलिः तत्पूर्वतः पूर्वपर्वतावलिश्च सन्तिष्ठते। पश्चिमपर्वतावलेः पश्चिमतः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

समुद्रपर्यन्तमायतो भागः परशुरामक्षेत्रमित्याख्यायते। दक्षिणापथेऽस्मिन् प्रधानभूता नद्यः—महानदी, गोदावरी, कृष्णा, कावेरी च। एताः सर्वाः पूर्वसागरमभिधावन्ति॥

भारतवर्षमिदं पुरा भरतभगीरथदशरथप्रभृतयस्ततो हर्षा-शोकप्रभृतयश्च हैन्दवा राजानः परिपालयामासुः। ततः क्रमेण ग्रीसदेशीया पोर्तगीसदेशीयाः फ्रान्सदेशीयाश्च जैत्रयात्राप्रस-ङ्गादभ्येत्य राज्यमिदं स्वायत्तीकर्तुं बहुतरमयतन्त। किन्तु तेषां यत्ना मुधाऽभूवन्। तदनु मुसल्मानाः समेत्य राज्यमिदं कञ्चित्कालमबिभरुः। परन्त्वन्तत इदमाङ्गलाधिपतेर्वशम-यासीत्। तस्य शासनमनुरुन्धानाः शताधिका हैन्दवा मुसल्मानाश्च सामन्तास्तत्तद्देशस्याधिपत्यं अभजन्॥

अथ चिरम् आङ्गलाधिपतेः शासने परतन्त्राः प्रजाः महता क्लेशेन १९४७ आगस्ट् १५ दिने प्रजाधिपत्यं स्वायत्ती-चक्रुः। प्रजायत्तस्वाराज्यभरणे प्रथमः जनाधिपतिः श्रीमान् बाबु राजेन्द्रप्रसाद् महाशयः सर्वासां प्रजानां प्रीतिपात्रं चकास्ति॥

भारतवर्षेऽस्मिन्नद्यत्वे परश्शतानि नगराणि विद्यन्ते। तेषाम् अष्टसप्ततिर्नगराणि लक्षार्धाधिकैः, एकोनत्रिंशन्नगराणि लक्षाधिकैश्च जनैरध्युष्यन्ते। तत्रापि डिल्लीपुरं कालिघट्टपुरं मुम्बापुरं मद्रपुरं चेति चत्वारि नगराणि प्रधानतमानि। आहत्य भारतवर्षेवासिनां जनानां सङ्ख्या मा किं षट्त्रिंशत्कोटिरित्याहुः॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

भारतखण्डेऽस्मिन् प्रधानभूता वृत्तिः कृषिः। अत्रत्यानां जनानां त्रिषु द्वौ भागौ कृषिकर्मणैव जीविकां निर्वर्तयतः। अत्र प्राधान्येन संवर्ध्यमानानि धान्यानि प्रियङ्गुः शालिर्गोधूमश्च। माषमुद्गादीन्यपि धान्यानि तत्र तत्राभिवर्ध्यन्ते। कार्पासीनीलीप्रभृतयस्तन्तूपयुक्ता ओषधयोऽप्यदभ्रतया प्रोप्यन्ते। वाणिज्यम् अपि भारतीयैः साधारण्येनाभ्युपगता वृत्तिः। अथापि नैषा वृत्तिस्तेषां मध्ये लब्धोपचया दृश्यते॥

विविधासु कलासु च भारतीयाः प्रावीण्यमभजन्त। वयने सीवने चित्रलेखने शिल्पकलायां च नितरां निपुणा अभूवन्। भारतीयैः पुरा मसृणमसृणान्यंशुकानि निरमायिषत। इतराण्यपि लोकयात्रापेक्षितान्युच्चावचानि वस्तून्युदपादिषत। परन्त्विदानीं विदेशीयानां वस्तूनामभियोगेन भूयस्यो भारतवर्षीया वृत्तयः कथावशेषतामगमन्॥

विद्यायां विषये भारतवर्षमिदं खण्डान्तराण्यतिशेते। अस्मिन्नेव भारतवर्षे अपौरुषेयाः अनादयः चत्वारो वेदाः अद्य यावत् अध्ययनक्रमेण अभ्यस्यमानाः चकासति। पुराकल्प एवात्र जना व्युत्पन्नमतयोऽभूवन्। तत्फलत्वेन च तैर्वेदाङ्गानि शास्त्राणि पुराणानि इतिहासानि काव्यान्यन्यानि च विविधानि ग्रन्थरत्नानि विरचय्य गुरुशिष्यपरम्परायां परिपाल्यन्ते। सम्प्रति जगत्युपलभ्यमानेषु ग्रन्थेषु वैदिकग्रन्था एव प्राचीनतमाः। खण्डान्तरेषु पुनः प्राक्कालभावानां ग्रन्थानां वार्ताऽपि

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

न श्रूयते। व्याकरणे गणिते ज्योतिषे साहित्ये अश्ववेदे धनुर्वेदे च भारतीया लोकोत्तरं वैचक्षण्यं प्राचकटन् ॥

किं बहुनोक्तेन! सर्वविधानां सम्पदामाकरभूतमिदं भारतवर्षं समुत्कृष्टत्वेन गणनीयेषु मातृकादेशेष्वन्यतमं भवति। सैषा भारतभूमिः भूमण्डलमण्डनायमाना भूतात्मनो देवदेवस्य हृदयकमलमिव बाभाति ॥

सैषा भारतभूमिरतिशयेनास्माकम् आदरणीया—तथा चोक्तम्—

जननी जन्मभूमिश्च जाह्नवी च जनार्दनः।
जनकः पञ्चमश्चैव जकाराः पञ्च दुर्लभाः ॥

अपि च—

जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ॥

---

१) प्रश्नाः—१. अस्माकं देशस्य भारतवर्षमिति व्यपदेशः कथं सिद्धः? २. भरतवर्षमिदं कस्यखण्डस्यैकदेशत्वेन विभक्तम्? ३. अस्य सीमानः का? ४. प्रधानभूतौ विभागौ कौ? ५. भारतवर्षीयाः प्रधानभूता नद्यः काः? ६. प्रधानभूतानि नगराणि कानि? ७. भारतवर्षमिदं कैः पूर्वं परिपालितं कैश्चेदानीं परिपाल्यते? ८. भारतवर्षीयाणां प्रधानभूतावृत्तिः का? ९. विद्याविषये भारतीयाः कीदृशं स्थानमभजन्त?

२) दक्षिणापथः, गङ्गासिन्धू, महानदी, शताधिकाः, दैर्घ्यम्, वैचक्षण्यम्, वैदेशिकाः—एतेषां विग्रहवाक्यानि लिखत ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३) शतात् परे=परःशताः, सहस्रात् परे=परःसहस्राः ॥

४) पर्यायाः—

वृत्ति ६—आजीवो जीविका वार्ता वृत्तिर्वर्तनजीवने ।
नदी ११—नदी सरित् शवलिनी तटिनीह्रादिनी धुनी ।
स्रोतस्विनी द्वीपवती स्रवन्ती निम्नगाऽऽपगा ॥

आभरणम् ४—अलङ्कारस्त्वाभरणं परिष्कारो विभूषणम् ॥

वैदेशिक *m* a foreigner
विश्लिष्ट *ppp.* separated from
पूर्वापरायत *a.m.* extending from east to west
अन्तराल *n* intermediate space
तरङ्गिणी *f* a river
नद *m* a river (flowing to the western sea)
नदी *f* a river (flowing to the eastern sea)
आयतन *n* an abode
सस्याढ्य *m* fertile
अविभरुः *P* ruled
सामन्त *m* a tributary prince
कालिघट्टपुर *n* Calcutta
पियङ्गु *m. f* Indian corn
माष *m* black-gram
मुद्ग *m* green-gram
कार्पासी *f* the cotton plant
नीली *f* the indigo plant
तन्तु *m* thread
अदभ्रतया *f* in plenty
कला *f* an art
वयन *n* weaving
सीवन *n* sewing
मसृण *a* soft, smooth
अंशुक *n* a garment
अतिशेते *A* excels
पुराकल्प *n* olden days
आकर *m* a store house.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२८. पद्यमाला-प्रथमा पञ्चिका

गुणी गुणं वेत्ति न वेत्ति निर्गुणो
बली बलं वेत्ति न वेत्ति निर्बलः ।
पिको वसन्तस्य गुणं न वायसः
करी च सिंहस्य बलं न मूषिकः ॥ १

दुर्गस्त्रिकूटः परिखा समुद्रो
रक्षांसि योधा धनदाच्च वित्तम् ।
शस्त्रं च यस्योशनसा प्रणीतं
स रावणो दैववशाद्विपन्नः ॥ २

यः परस्य विषमं विचिन्तयेत्
प्राप्नुयात् स कुमतिः स्वयं हि तत् ।
पूतना हरिवधार्थमाययौ
प्राप सैव वधमात्मनस्ततः ॥

सत्सङ्गाद्भवति हि साधुता खलानां
साधूनां न हि खलसङ्गमात्खलत्वम् ।
आमोदं कुसुमभवं मृदेव धत्ते
मृद्गन्धं न हि कुसुमानि धारयन्ति ॥ ४

विद्यया विमलयाऽप्यलङ्कृतो
दुर्जनः सदसि माऽस्तु कश्चन ।
साक्षरा हि विपरीततां गताः
केवलं जगति तेऽपि राक्षसाः ॥ ५

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१) प्रश्नाः—१. गुणं बलं च को वेत्ति कश्च न वेत्ति? किं तत्रोदाहरणम्? २. "स रावणो दैववशाद्विपन्नः" स कीदृशः? ३. "प्राप सैव वधमात्मनः" का? अनेन किं ज्ञायते? ४. सत्सङ्गात् किं भवति? खलसङ्गात् किं न भवति? (किमत्रोदाहरणम्?) ५. "जगति तेऽपि राक्षसाः" के?

२) विग्रहवाक्यानि लिखत—गुणी, निर्बलः. धनदः, कुमतिः॥

३) निर् + नीतम्, प्र + नमति, प्र + मानम्, प्र+नश्यति, परि + नाहः, प्र+नयः एषां परिनिष्ठितरूपाणि लिखत॥

४) वि + पद्, विद्, वि + धा, वि + रम्, अङ्गीकृ—एषां क्त्वाप्रत्ययान्तैः रूपैः वाक्यानि रचयत॥

५) पूतनायाः कथां संस्कृतवाक्यैः संग्रहेण लिखत॥

६) पर्यायाः—

शुक्रः ६ — शुक्रो दैत्यगुरुः काव्य उशना भार्गवः कविः।
दुर्जनः५ — कर्णेजपः सूचकः स्यात् पिशुनो दुर्जनः खलः।
राक्षसः १५-राक्षसः कौणपः क्रव्यात् क्रव्यादोऽस्रप आशरः।
रात्रिञ्चरो रात्रिचरः कर्बुरो निकषात्मजः।
यातुधानः पुण्यजनो नैर्ऋतो यातुरक्षसी॥

पञ्चिका *f.* consisting of five
त्रिकूट *m.* a mountain in which लङ्का was situated
परिखा *f.* a ditch round a fort
विषम *a.* evil, adverse
आमोद *m.* fragrant smell
मृद् *f.* clay, earth
साक्षरा *a.* possessed of letters
विपरीत *a.* perverse
Note the letters of the word साक्षरा reversed make it राक्षसा.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२९. पद्यमाला—द्वितीया पञ्चिका

कर्पूरधूलीरचितालवालः
कस्तूरिकाकुङ्कुमलिप्तदेहः ।
सुवर्णकुम्भैः परिषिच्यमानो
निजं गुणं मुञ्चति नो पलाण्डुः ॥ २

रत्नैर्महाब्धेस्तुतुषुर्न देवा
न भेजिरे भीमविषेण भीतिम् ।
सुधां विना न प्रययुर्विरामं
न निश्चितार्थाद्विरमन्ति धीराः ॥ २

अद्यापि नोज्झति हरः किल कालकूटं
कूर्मो बिभर्ति धरणीं खलु पृष्ठभागे ।
अम्भोनिधिर्वहति दुस्तरबाडवाग्नि-
मङ्गीकृतं सुकृतिनः परिपालयन्ति ॥ ३

पद्माकरं दिनकरो विकचीकरोति
चन्द्रो विकासयति कैरवचक्रवालम् ।
नाभ्यर्थितो जलधरोऽपि जलं ददाति
सन्तः स्वयं परहिते विहिताभियोगाः ॥ ४

सर्पाः पिबन्ति पवनं न च दुर्बलास्ते
शुष्कैस्तृणैर्वनगजा बलिनो भवन्ति ।
कन्दैः फलैर्मुनिवराः क्षपयन्ति कालं
सन्तोष एव पुरुषस्य परं निधानम् ॥ ५

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१) प्रश्नाः—१. किं क्रियमाणः पलाण्डुर्निजं गुणं न मुञ्चति? २. 'न निश्चितार्थाद्विरमन्ति धीराः कथमिदं ज्ञायते? ३. अङ्गीकृतं के परिपालयन्ति? उदाहरणानि कथयत। ४. सन्तः स्वयं परहिते विहिताभियोगा इत्येतत् उदाहरणैः समर्थयत। ५. सन्तोष एव पुरुषस्य परं निधानमिति कथं ज्ञायते?

२) महाब्धिः, भीमविषम्, निश्चितार्थः, अम्भोनिधिः, दिनकरः, जलधरः, दुर्बलः—एषां विग्रहवाक्यानि लिखत॥

३) परि+सिञ्चति, वि+सीदति, वि+सहिते, नि+सेवते, नि+सेधति, परि+स्वजते—एषां परिनिष्ठितरूपाणि लिखत॥

४) पर्यायाः—

धूलिः ४—रेणुर्द्वयोः स्त्रियां धूलिः पांसुर्ना न द्वयो रजः।
अमृतम् ३—सुधा पीयूषममृतम्।
विषम् ३—क्ष्वेडस्तु गरलं विषम्।
कूर्म ३—कूर्मे कमठकच्छपौ॥

कर्पूरधूली *m. f.* camphor-dust

आलवाल *n* basin for water round the root of a tree

पलाण्डु *m. n*, an onion

विराम *m.* discontinuance

कालकूट *m. n.* a deadly poison

कूर्म *m.* a tortoise

धरणी *f.* the earth

दुस्तर *n.* insurmountable

वाडवाग्नि *m.* submarine-fire

पद्माकर *m.* a lotus tank

विकच *a.* blown, opened

कैरवचक्रवाल *n.* a group of night lotuses

विहिताभियोग *a.* he who is making energetic efforts

निधान *n.* treasure.

---

* रेणुः पुंसि स्त्रियां च; धूलिः स्त्रियाम्; पांसुः पुंसि; रजः नपुंसके॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३०. पद्यमाला—तृतीया पञ्चिका

प्राक् पादयोः पतति खादति पृष्ठमांसं
कर्णे कलं किमपि रौति शनैर्विचित्रम् ।
छिद्रं निरूप्य सहसा प्रविशत्यशङ्कः
सर्वं खलस्य चरितं मशकः करोति ॥ १

धूमः पयोधरपदं कथमप्यवाप्य
वर्षाम्बुभिः शमयति ज्वलनस्य तेजः ।
दैवादवाप्य कलुषप्रकृतिर्महत्वं
प्रायः स्वबन्धुजनमेव तिरस्करोति ॥ २

हंसोऽध्वगः श्रममपोहितुमश्रमेण
कारण्डकाकबककोककुलं प्रविष्टः ।
मूकोऽयमित्युपहसन्ति लुनन्ति पक्षान्
नीचाश्रयो हि महतामपमानहेतुः ॥ ३

आबद्धकृत्रिमसटाजटिलांसभित्ति-
रारोपितो मृगपतेः पदवीं यदि श्वा ।
मत्तेभकुम्भतटपाटनलम्पटस्य
नादं करिष्यति कथं हरिणाधिपस्य ॥ ४

रात्रिर्गमिष्यति भविष्यति सुप्रभातं
भास्वानुदेष्यति हसिष्यति पङ्कजश्रीः ।
इत्थं विचिन्तयति कोशगते द्विरेफे
हा हन्त हन्त नलिनीं गज उज्जहार ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१) प्रश्नाः—१. खलो मशकश्च किं कुरुतः? २. कलुषप्रकृतिः किमवाप्य किं करोति? ३. "मूकोयऽमित्युपहसन्ति" के? कम्? ४. "नादं करिष्यति कथं हरिणाधिपस्य" कः? ५. कस्मिन् कथं चिन्तयति कां क उज्जहार?

२) प्रयोगं विपरिणमयत—

१. धूमो वर्षाम्बुभिः शमयति ज्वलनस्य तेजः।
२. श्वा नादं करिष्यति कथं हरिणाधिपस्य।
३. रात्रिर्गमिष्यति भविष्यति सुप्रभातम्॥

३) पर्यायाः—

श्रोत्रम् ६—कर्णशब्दग्रहौ श्रोत्रं श्रुतिः स्त्री श्रवणं श्रवः।
छिद्रम् ७—छिद्रं रन्ध्रं शुषिः श्वभ्रं सुषिरं विवरं विलम्॥
नीचः १०—विवर्णः पामरो नीचः प्राकृतश्च पृथग्जनः।
निहीनोऽपसदो जाल्मः क्षुल्लकश्चेतरश्च सः॥

कलम् *in.* sweetly
अशङ्क *a* fearless
मशक *m* a mosquito
पयोधरपद *n* the place of clouds, sky
ज्वलन *m* fire
कलुषप्रकृति *a. m.* wicked-natured
अध्वग *a* traveller
कारण्ड *a* a kind of duck also **कारण्डव**
कृत्रिम *a* artificial
सटा *f* a name of a lion
जटिल *a* dense
अंसभित्ति *f* wall-like shoulder
पाटन *n* splitting
लम्पट *a* hankering after
हरिणाधिप *m* a lion
पङ्कजश्री *f* the splendour of a lotus
कोशगत *a* caught in the fold of a lotus
नलिनी *f* a lotus tank.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३१. पद्यमाला—चतुर्थी पञ्चिका

भवित्री रम्भोरु त्रिदशवदनग्लानिरधुना
स ते रामः स्थाता न युधि पुरतो लक्ष्मणसखः ।
इयं यास्यत्युच्चैर्विपदमधुना वानरचमू-
र्लंघिष्ठेदं षष्ठाक्षरपरविलोपात् पठ पुनः ॥ १

कस्त्वं वानर ? रामराजभवने लेखार्थसंवाहको
यातः कुत्र पुरागतः स हनुमान्निर्दग्धलङ्कापुरः ? ।
बद्धो राक्षससूनुनेति कपिभिः सन्ताडितो भर्त्सितः
स व्रीडात्तपराभवो वनमृगः कुत्रेति न ज्ञायते ॥ २

कस्त्वं भद्र ? खलेश्वरोऽहमिह किं धीरे वने स्थीयते ?
शार्दूलादिभिरत्र हिंस्रपशुभिः खाद्योऽहमित्याशया ।
कस्मात् कष्टमिदं त्वया व्यवसितं ? मद्देहमांसाशिनः
प्रत्युत्पन्ननृमांसभक्षणधियस्ते घ्नन्तु सर्वानिति ॥ ३

विप्रास्मिन्नगरे महान् कथय कः ? तालद्रुमाणां गणः
को दाता ? रजको ददाति वसनं प्रातर्गृहीत्वा निशि ।
को विद्वान् ? परवित्तवञ्चनविधौ सर्वेऽपि विद्वज्जनाः
कस्माज्जीवसि ? हे सखे ! विषकृमिन्यायेन जीवाम्यहम् ॥ ४

या पाणिग्रहलालिता सुसरला तन्वी सुवंशोद्भवा
गौरी चारुमुखी मदन्तिकचरी नित्यं मदाज्ञाकरी ।
सा केनापि हृता तया विरहित स्थातुं न शक्नोम्यहं
भिक्षो ! ते दयिता हृता ? नहि नहि प्राणप्रिया यष्टिका ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१) टिप्पणि :—(१) अयं सीतारावणसंवादः । तत्र प्रथमे त्रयः पादा रावणस्य, अन्तिमः पादः सीतायाश्च वचनम् षष्ठाक्षरात् परं=सप्तममक्षरम्, तस्य लोपेन पुनः पठने प्रथमं पादत्रयं रावणं प्रति सीतायाः प्रतिवचः सम्पद्यते। (२) लङ्कां प्रविश्य मध्यरात्रसमयेऽङ्गदो रावण-गृहं गत्वा तदीयशय्या गृहस्य कवाटं पाणिना बलवत् प्रजहार। तेन शब्देन प्रबुद्धस्य रावणस्याङ्गदस्य च संवादः। (३) अरण्यैकदेशे निभृतम् आसीनस्य खलस्य तेन पथा गच्छतः पथिकस्य च सम्भाषणम्। (४) वैदे-शिकस्य तद्देशीयस्य च सम्भाषणम्। (५) भिक्षोरन्यस्य च संवादः ॥

२) लक्ष्मणसखः, वनमृगः, मद्देहमांसाशिनः, विद्वज्जनाः, सुसरला, चारुमुखी—एषां विग्रहवाक्यानि लिखत ॥

३) प्रयोगं विपरिणमयत—

१. लधिष्ठेदं षष्ठाक्षरपरविलोपात् पठ पुनः ।
२. बद्धो राक्षससूनुनेति कपिभिः सन्ताडितो भर्त्सितः ।
३. प्रत्युत्पन्ननृमांसभक्षणधियस्ते घ्नन्तु सर्वानिति ।
४. सा केनापि हृता तया विरहितः स्थातुं न शक्नोम्यहम् ॥

४) कृत्प्रत्ययान्ताः—

१. ग्ला to fade=(ग्लायति) ग्लानः, ग्लानवान्, ग्लात्वा, परिग्लाय, ग्लातुम्, ग्लानीयम्, ग्लातव्यम् ॥

२. म्ला to fade=(म्लायति)म्लानः, म्लानवान्, म्लात्वा, परिम्लाय, म्लानीयम्, म्लातव्यम् ॥

३. रु to cry=(रौति) रुतः, रुतवान्. रुत्वा, विरुत्य. रवितुम्, रवणीयम्, रवितव्यम् ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

५) भविता, कर्ता, वक्ता, द्रष्टा, प्रष्टा, पठिता—एषां स्त्रीलिङ्गे प्रथमैकवचने रूपाणि वदत ॥

६) पर्यायाः—

संपत्तिः ६—संपत्तिरुदयः श्रेयः।
विपत्तिः ३—विपत्तिर्विपदापदौ।
लज्जा ६—मन्दाक्षं ह्रीस्त्रपा व्रीडा लज्जा साऽपत्रपाऽन्यतः ॥
(अन्यतः=सा लज्जा अन्यस्मात् चेत् अपत्रपा) ॥

रम्भोरू *f* a handsome lady
ग्लानि *f* displeasure
लघिष्ठ *a* the lightest
षष्ठाक्षरपरविलोपात् *m* by dropping the letter following the sixth one
लेखार्थ संवाहक *a* letter-carrier
व्रीडात्तपराभव *a. m.* being ashamed of humiliation he received
तालद्रुम *m* a palmyra tree
रजक *m* a Washerman
वसन *n* a cloth
तन्वी *f* slender
विरहित *a* separated from
यष्टिका *f* a walking stick
विषकृमिन्याय *m* the maxims of the worm born and bread in poison. (The poison is fatal to others but not to the worms born and bread therein)
पाणिग्रहलालिता *a. f.* fondled by taking in the hand and also by marrying
सुसरला *f* straight and straight-forward
सुवंशोद्भवा *a. f.* made of beautiful bamboo and also born of noble family.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३२. पद्यमाला—पञ्चमी पञ्चिका

अङ्कं केऽपि शशङ्किरे जलनिधेः पङ्कं परे मेनिरे
सारङ्गं कतिचिच्च सज्जगदिरे भूच्छायामैच्छन् परे।
इन्दौ यद्दयितेन्द्रनीलशकलश्यामं दरीदृश्यते
तत्सान्द्रं निशि पीतमन्धतमसं कुक्षिस्थमाचक्ष्महे ॥ १

खर्वाटो दिवसेश्वरस्य किरणैः सन्तप्तितो मस्तके
गच्छन् देशमनातपं विधिवशात्तालस्य मूलं गतः।
तत्राप्यस्य महाबलेन पतता भग्नं सशब्दं शिरः
प्रायो गच्छति यत्र दैवहतकस्तत्रैव यान्त्यापदः ॥ २

एते सत्पुरुषाः परार्थघटका स्वार्थान् परित्यज्य ये
सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये।
तेऽमी मानुषराक्षसा परहितं स्वार्थाय निघ्नन्ति ये
ये तु घ्नन्ति निरर्थकं परहितं ते के न जानीमहे ॥ ३

बह्निस्तस्य जलायते जलनिधिः कुल्यायते तत्क्षणा-
न्मेरुः स्वल्पशिलायते मृगपतिः सद्यः कुरङ्गायते।
व्यालो माल्यगुणायते मृगपतिः सद्यः कुरङ्गायते
यस्याङ्गेऽखिललोकवल्लभतरं शीलं समुन्मीलति ॥ ४

क्षुत्क्षामोऽपि जराकृशोऽपि शिथिलप्राणोऽपि कष्टां दशा-
मापन्नोऽपि विपन्नदीधितिरपि प्राणेषु नश्यत्स्वपि।
मत्तेभेन्द्रविभिन्नकुम्भपिशितग्रासैकबद्धस्पृहः
किं जीर्णं तृणमत्ति मानमहतामग्रेसरः केसरी ॥ ५

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१) प्रश्नाः—१. चन्द्रस्य कलङ्कं कवयः कैः प्रकारैरुत्प्रेक्षन्ते? २. खर्वाटस्य वृत्तान्तः कः? तेन किं ज्ञायते? ३. चतुर्विधाः पुरुषाः के? ते किं कुर्वन्ति? ४. शीलवतः पुरुषस्य वह्न्यादयः किमिवाचरन्ति? ५. "किं जीर्णं तृणमत्ति" कः? कीदृशः?

२) प्रयोगं विपरिणमयत—

१. तत्सान्द्रं निशि पीतमन्धतमसं कुक्षिस्थमाचक्ष्महे।
२. ये तु घ्नन्ति निरर्थकं परहितं ते के न जानीमहे।
३. किं जीर्णं तृणमत्ति मानमहतामग्रेसरः केसरी॥

३) पर्यायाः —

अङ्कः ६—कलङ्काङ्कौ लाञ्छनं च चिह्नं लक्ष्य च लक्षणम्।
मेरुः ५—मेरुः सुमेरुर्हेमाद्री रत्नसानुः सुरालयः॥

दलित *a* cut, split
सान्द्र *a* thick
खर्वाट *m* a bald-headed man
जलायते *A.* acts like water
कुल्यायते *A.* acts like a small channel
स्वल्पशिलायते *A.* acts like a small rock
कुरङ्गायते *A.* acts like a deer
माल्यगुणायते *A.* acts like the string of a garland
व्याल *m* a serpent
पीयूषवर्षायते *A.* acts like a shower of nectar
वल्लभतर *a* more pleasing
समुन्मीलति *P.* becomes manifest
शिथिलप्राय *a* slackened to a great extent
आपन्न *a* distressed
विपन्नदीधिति *a* with one's splendour lost
पिशितग्रास *m* a mouthful of flesh

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

३३. पद्यमाला—षष्ठी पञ्चिका

कस्त्वं ? शूली मृगय भिषजं नीलकण्ठः प्रियेऽहं
केकामेकां कुरु पशुपतिर्नैव दृश्ये विषाणे ।
स्थाणुर्मुग्धे न वदति तरुर्जीवितेशः प्रियाया-
गच्छाटव्यामिति हतवचाः पातु वश्चन्द्रचूडः ॥ १

किं गोत्रं ? किमु जीवनं ? किमु धनं ? का जन्मभूः ? किं वयः ?
किं चारित्र्यममुष्य के सहचराः ? के वंशजाः प्राक्तनाः ?।
का माता ? जनकः शिवस्य क ? इति प्रश्नेन पृथ्वीभृता
पृष्टाः सस्मितनम्रमूकवदनाः सप्तर्षयः पान्तु वः ॥ २

कोऽयं द्वारि ? हरिः प्रयाह्युपवन शाखामृगस्यात्र किं ?
कृष्णोऽहं दयिते ! बिभेमि सुतरां कृष्णादहं वानरात् ।
राधेऽहं मधुसूदनो व्रज लतां तामेव पुष्पान्विता—
मित्थं निर्वचनीकृतो दयितया हीणो हरिः पातु वः ॥ ३

अङ्गुल्या कः कवाटं प्रहरति ? कुटिले माधवः किं वसन्तः ?
नो चक्री किं कुलालो ? नहि धरणिधरः किं द्विजिह्वः फणीन्द्रः ?।
नाहं घोराहिभर्ता किमुत खगपतिर्नो हरिः किं कपीन्द्रः ?
इत्येवं सत्यभामाप्रतिजितवचनः पातु वश्चक्रपाणिः ॥ ४

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कृष्णेनाम्ब गतेन रन्तुमसकृन्मृद्भक्षिता स्वेच्छया
सत्यं कृष्ण ? क एवमाह ? मुसली मिथ्याऽम्ब पश्याननम् ।
व्यादेहीति विदारिते च वदने दृष्ट्वा समस्तं जग-
न्माता यस्य जगाम विस्मयपदं पायात्स वः श्रीपतिः ॥ ५

---

१) टिप्पणिः—(१) पार्वतीपरमेश्वरयोः संवादः । (२) परमेश्वरस्य कृते पार्वत्याः वरणार्थं गतानां सप्तर्षीणां सन्निधौ हिमवतो वचनम् । (३) रात्रावसाने प्रत्यागतस्य कृष्णस्य राधायाश्चोक्तिप्रत्युक्ती श्लोकेऽस्मिन् द्रष्टव्ये ; (४) श्रीकृष्णस्य सत्यभामायाश्चोक्तिप्रत्युक्ती । (५) क्रीडार्थं गतयोः रामकृष्णयोः रामो मातरमुपसृत्य कृष्णेन कृतं मृद्भक्षणं निवेदयति : तदा कृष्णमुपसृत्य पृच्छन्त्या यशोदायाः कृष्णस्य च मिथः संवादः॥

२) शूली, नीलकण्ठः, हतवचाः, वंशजाः, प्राक्तनाः, शास्त्रामृगः, चन्द्रचूडः, चक्रपाणिः—एतेषां विग्रहवाक्यानि निर्दिशत ॥

३) प्रयोगं विपरिणमयत—मृगय भिषजम् । केकामेकां कुरु । न वदति तरुः । प्रयाह्युपवनम् । अङ्ग्या कः कवाटं प्रहरति । कृष्णेनाम्ब गतेन रन्तुमसकृन्मृद्भक्षिता ॥

४) पृष्टः, भीतः, कृतः, हीणः, रन्तुम्, गन्तुम्—एषां लटि प्रथमपुरुषैकवचने रूपाणि निर्दिशत ॥

५) व्यधिकरणबहुव्रीहिः—
चन्द्रचूडः, चक्रपाणिः, पद्मनाभः, सुवंशोद्भवा ॥

६) एकपदीकुरुत—भुवः छाया, अन्धं च तत् तमश्च, प्रियश्चासौ सखा च, जलमिव आचरति ॥

७) बिभर्ति, बिभेति, ददाति, चकास्ति—एतदीय ',शतृ'' प्रत्ययान्तानां पुल्लिङ्गे स्त्रीलिङ्गे च प्रथमैकवचने रूपाणि निर्दिशत ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

८) इच्छति, आचष्टे, भनक्ति, हन्ति, जीर्यति—एतेषां क्तप्रत्ययान्तानि रूपाणि निर्दिशत ॥

९) नानार्थाः—

हरिः १४—यमानिलेन्द्रचन्द्रार्कविष्णुसिंहाशुवाजिषु।
शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिषु ॥—इत्यमरः

शूली=शिवः व्याधितश्च। नीलकण्ठः=शिवः मयूरश्च।
पशुपतिः=शिवः वृषश्च। स्थाणुः=शिवः शङ्कुश्च।
शिवा=पार्वती जम्बुकी च। हरिः=कृष्णः कपिश्च।
माधवः=कृष्णः वसन्तश्च। चक्री=कृष्णः कुलालश्च।
धरणिधरः=कृष्णः शेषश्च। घोराहिमर्दी=कृष्णः गरुडश्च।
कृष्णः=श्रीकृष्णः कृष्णवर्णो वानरश्च।
मधुसूदनः=श्रीकृष्णो मधुकरश्च :

मृगय $P.$ seek after
विषाण $m.$ $n.$ a horn
मुग्धा f a lovely or foolish lady
हतवचस् a he whose words are refuted
प्रह्व a bent low, modest
ह्रीण a ashamed
कवाट n a leaf of a door
व्यादेहि $P.$ open
विस्मयपद $n.$ point of wonder
पायात् $P.$ May He protect
श्रीपति m Lord Vishnu.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कृत्प्रत्ययान्तानां वर्णानुक्रमणिका

धातुः	पृष्ठम्	धातुः	पृष्ठम्
कृत्	१०६	पृ	३४
क	५३	भिद्	७५
क्रम्	९७	भी	७५
क्षणू	१०६	भ्रम्	६१
क्षि	१०१	मद्	८७
खन्	१०	मुह्	९७
ग	५३	म्ला	१२०
ग्ला	१२०	यम्	५७
घ्रा	१००	रु	१२०
छिद्	२९	लिख्	४२
जन् (जा)	१५	लू	६५
दा	५८	वद्	३७
दिश्	१०	वप्	६५
दृप्	८७	शम्	६२
दृश् (णिच्)	३४	शंस्	८०
द्रु	८४	शस्	७२
नह्	७९	शास्	९
पठ्	४२	सह्	४५
पा (पाने)	१००	स्मि	८४
पा (रक्षणे)	१००	स्मृ	३
पिष्	४४	हा	६८

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पर्यायपदानां वर्णानुक्रमणिका

नामानि	पृष्ठम्	नामानि	पृष्ठम्
अङ्कः	१२३	धन्वी	८४
अमृतम्	११६	धूलिः	११६
अयः	४५	नदी	११२
आभरणम्	११२	नरकः	२८
इदानीम्	३४	निकृतः	८७
उत्तरम्	४२	नीचः	११८
कदाचित्	५४	पतिव्रता	३७
कपोतः	१०६	परिपाटी	६२
कुठारः	२९	पान्थः	८०
कूर्मः	११६	पापम्	९८
कृषीबलः	६५	पुण्यम्	९८
खनिः	४५	प्रश्नः	४२
गरुडः	९	बन्धुः	६८
गृहम्	७६	बहु	४५
छिद्रम्	११८	बाणः	८४
जन्म	१०६	भयम्	१०१
दर्शनम्	६२	भृत्यः	२६
दाता	५८	भैक्षम्	५४
द्वारपालः	७१	मङ्गलम्	२६
दुर्जनः	११४	मनः	८७
धनम्	६८	मनोरथः	१५
धनिकः	२६	मन्त्री	७१
धनुः	८४	मांसम्	१०६

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नामानि	पृष्ठम्	नामानि	पृष्ठम्
मूषिकः	९१	व्याधः	२२
मृषा	९१	शत्रुः	१०१
मेरुः	१२३	शिरः	७६
याञ्चा	५४	शुकः	११४
रक्तम्	१०६	शुश्रूषा	५८
राजा	७१	श्येनः	९१
राक्षसः	११४	श्रोत्रम्	११८
लज्जा	१२२	सखा	४८
लिपिः	४२	सख्यम्	४८
लोकः	८७	सभा	५८
वंशः	१५	सभ्यः	६२
वचः	३	सम्पत्तिः	१११
वटः	९८	सरस्वती	३
वनम्	३४	सर्वम्	३७
वरुणः	२९	सह	५४
वार्ता	७६	सुन्दरम्	१८
विपत्तिः	१२२	सैन्यम्	८०
विषम्	१२६	सौन्दर्यः	८०
वीणा	३	स्वर्गः	९८
वृत्तिः	११२	हरिणः	१८
वृषभः	६५		

आहत्य पर्याय सङ्ख्या ८७

शुभं भूयात्। समस्तसन्मङ्गळानि सन्तु॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal